ॐ श्रीगणेशाय नमः ॥ स्वभक्तपक्षपातेन तद्विपक्षविदारणं नृसिंहमद्भुतं वंदे परमानंदविग्रहम् ॥ ऊतिः पंचदशाध्यायैः सप्तमे वर्ण्यतेऽधुना ॥
ऊतिश्च वासना प्रोक्ता तत्तत्कर्मानुसारिणी ॥ अशुभा च शुभा चेति द्विधा सा हेतुभेदतः अशुभा महतां कोपाच्छुभा महदनुग्रहात् ॥ हरेर्द्वारप
योर्यद्वद्वैकुंठे वसतोरपि चतुःसनरुषा विष्णुद्वेषाद्यशुभवासना ॥ यथा हि दैत्यगर्भेपि प्रह्लादस्य सतः स्थिरा नारदानुग्रहाद्दासविष्णौ
सद्भक्तिवासना ॥ स्वभक्तं च सदा विष्णुर्हिंषंतमपि रक्षति तृतीये च भवे ब्रह्मास्स्यावकरोदात्मसात्सुनः ॥ अतो मनीषिणा यत्नः कार्यो महदनु
ग्रहे इत्येतदर्थमूतीनामत्र लक्षणमुच्यते ॥ तत्रादौ दशभिर्दैत्यतत्सुतमतिभेदतः महत्कोपानुकंपोत्थवासनाभेद उच्यते ॥ सद्वासनाचयु
ज्येतकर्मभिः स्वच्छचेतसः परैस्तु पंचभिस्तस्मात्क्रियते धर्मनिर्णयः ॥ तत्र तु प्रथमेऽध्याये हिरण्यकशिपोः सुते विष्णुभक्तौ विरोधस्तु विप्र

राजोवाच ॐ समः प्रियः सुहृद्ब्रह्मन्भूतानां भगवान्स्वयम् इंद्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा १ न ह्यस्य
स्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि २ इति नः सुमहाभागनारा
यणगुणान्प्रति संशयः सुमहान्जातस्तद्भवांश्छेत्तुमर्हति ॥ ३ ॥ श्रीराम राम॥

शापजईर्यते ॥ यदुक्तं सर्वस्कंधांते ॥ हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयदिति तच्छ्रु
त्वा विस्मितः परीक्षित्पृच्छति समइतित्रिभिः ॥ न हि समस्य सुहृदश्च वैषम्यं नामास्ति न च प्रियस्य प्रीतिकर्तृत्वे वैषम्यं युक्तमित्य
र्थः ॥ १ ॥ किंच यस्यार्थैः प्रयोजनं सिद्ध्यति स तस्य पक्षपाती भवति येभ्यो विभेति तान्द्वेष्टि द्वेषेण हंति न तु तदत्रास्ती
त्याह ॥ न हीति निःश्रेयसं परमानंद एवात्मा स्वरूपं यस्य ॥ असुरेभ्यश्चोद्वेगो भयं नास्ति ॥ अतो विद्वेषोपि
नास्त्येव तत्र हेतुः अगुणस्येति २ ॥ श्रीनारायणस्य
गुणान्नुग्रहनिग्रहादीन्प्रति तत्तं संशयं ३ राम ॥

भागवतस्य प्रश्नादस्य माहात्म्यं ४ कृष्णाय व्यासाय कृष्णं मुनिं नत्वेत्यर्थः ५ यस्मात्प्रकृतेः परः अतो निर्गुणः अत एवाजः अत एवा-
व्यक्तः रागद्वेषादिनिमित्तभूतदेहेन्द्रियादिरहितः सोऽपि स्वमायागुणं सत्त्वादिकमाविश्य अधिष्ठाय बाध्यान्प्रति असुरान्प्रतिबाधकः
संपन्नः यद्वा देवासुरादीनां या परस्परं बाध्यबाधकता तां गतः प्राप्तः तत्र हेतुर्जात इत्यर्थः ६ ननु गुणानां स्वीयत्वे सति प्राकृतपुरुष-
वद्विषमः स्यात् न तु तदस्तीत्याह सत्त्वमिति न तु स्वेच्छया गुणाधिष्ठानेनापि पक्षपाते वैषम्यं स्यादेव न तस्य कालकृतत्वादित्याह

श्रीशुकः साधु पृष्टं महाराज हरेश्चरितमद्भुतम् यद्भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ४ गीयते परमं पुण्यमृ-
षिभिर्नारदादिभिः नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ५ निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान्प्रकृतेः परः स्व-
मायागुणमाविश्य बाध्यबाधकतां गतः ६ सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः न तेषां युगपद्राजन् ह्रास उ-
ल्लास एव वा ७ जयकाले तु सत्त्वस्य देवर्षीन् रजसोऽसुरान् तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥ ८ ॥
ज्योतिरादिरिवाभाति संघातान्न विविच्यते ८ ॥

न तेषामिति सार्धेन उल्लासो वृद्धिः ७ सत्त्वस्य जयकाले देवादीन् ऋषींश्चाभजत् तत्तद्देहं प्रविश्य वर्धयतीत्यर्थः रज-
सो जयकाले तमसो जयकाले इत्यन्वयः तस्य कालस्यानुगुणः सन् ॥ ८ ॥ समस्यापि निमित्तभेदेन वैषम्ये दृष्टा-
न्तः ज्योतिर्यथा काष्ठादिषु जलं यथा पात्रेषु आकाशं यथा घटादिषु तथा नानारूपश्चाभाति ॥ ननु तर्हि तद्-
देवं विवेकेन प्रतीयते तत्राह ॥ संघातात् सुरादिदेहात् न विविच्यते न पृथक् प्रतीयते ॥ ८ ॥ राम॥

श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम।

तर्हि तान् भजतीति कुतो ज्ञायते तत्राह विंदंतीति आत्मस्थं परमात्मानं कवयो निपुणाः मथित्वा कार्यदर्शनलिंगेन विचार्य जानंति अंततः स्वभावकर्मादिवादनिषेधेन विंदंतीति पाठे लाभोपि ज्ञानमेव अत्रापि ज्योतिरादिरिवेति द्रष्टव्यम् यथा सूर्यकांतादौ दाहदर्शनात् ज्योतिर्ज्ञायते यथा च गंधदर्शनाद्वायुरित्यादि । तदेवं मायागुणवशेनैतद्वैषम्यं न स्वाभाविकमित्युक्तं ॥९॥ तर्हि गुणपारतंत्र्यादनीश्वरत्वमाशंक्याह ॥ यदा आत्मनो जीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा साम्येन स्थितं रजः पृथक् सृजति ॥ विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुः सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन् तमः पृथगीरयति प्रेरयति १० यदा सिसृक्षुरित्यादिनिर्दिष्टगुणप्रतीतं कालपारतंत्र्यं वारयन् प्रधानपुरुषपारतंत्र्यमपि वारयति कालमिति हे नरदेव ।

विदंत्यात्मानमात्मस्थं मथित्वा कवयोंततः ९ यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ।
सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ १० कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नर
देव सत्यकृत् य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः तत्प्रत्यनीकानसुरान् सुरप्रियो रज
स्तमस्कान् प्रमिणोत्युरुश्रवाः ११ अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा प्रीत्या महाक्रतौ राजन् पृच्छतेऽजा
तशत्रवे १२

प्रधानपुंभ्यां निमित्तभूताभ्यां सत्यकृत् अमोघकर्ता ईश्वरः तयोः सहकारित्वेनाश्रयभूतं चरंतं वर्तमानं कालं स्वयमेव सृजति स्वचेष्टारूपत्वात् कालस्य न तत्पारतंत्र्यमित्यर्थः तथापि प्रस्तुते किमायातं तत्राह य एष कालः स सत्त्वमेधयति अतो हेतोः ईशितापि ईश्वरोपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयतीवेत्यर्थः तत्प्रत्यनीकान् सुरप्रतिपक्षान् प्रमिणोति हिनस्तीवेत्यन्वयः उरुश्रवाः कीर्तिर्यस्य सः कालशक्तिदृंभितगुणगतवैषम्यं सन्निधिमात्रेण तदधिष्ठातरि स्फुरतीति प्रकरणार्थः ॥११॥ इदानीं तयोर्वैधोन सुरपक्षपातेन किं तु ब्राह्मणशापेनासुरीयोनिं प्राप्तयोरनुग्रहार्थमेवेति वक्तुमितिहासमुपक्षिपति अत्रैवेति द्वेषादिरहितस्यापि दे

भा॰ चेदिभुजः शिशुपालस्य १३ सुरर्षिं नारदं सुरर्षिमिति वक्तव्ये संध्यभाव आर्षः इदं वक्ष्यमाणं १४ एकान्तभक्तानामपि दुर्लभा प्राप्तिर्विद्विषो जातेत्येतदद्भुतं हि १५ तस्य तु वेनवन्नरकपात एवोचित इत्याह भगवन्निंदयेति तमसि नरके १६ दमघोषस्य सुतः शिशुपालः कलभाषणात् बाल्ये कोमलभाषणमारभ्य संप्रति अधुनापि अमर्षी क्रोधी मत्सरी वा १७ श्वित्रः कुष्ठं १८

दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ वासुदेवे भगवति सायुज्यं चेदिभूभुजः १३ तत्रासीनं सुरर्षिं राजा पांडुसुतः क्रतौ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदं ॥१४॥ युधिष्ठिरः ॥ अहो अत्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः १५ एतद्वेदितुमिच्छामः सर्व एव वयं मुने भगवन्निंदया वेनो द्विजैस्तमसि पातितः ॥१६॥ दमघोषसुतः पाप आरभ्य कलभाषणात् संप्रत्यमर्षी गोविंदे दंतवक्रश्च दुर्मतिः १७ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययं श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः १८ कथं तस्मिन्भगवति दुरवग्राह्यधामनि पश्यतां सर्वलोकानां लयमीयतुरंजसा ॥ १९ ॥ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणम् २० ॥ श्रीशुकः ॥ राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः २१॥

दुरवग्राह्यं दुःप्राप्यं धाम स्वरूपं यस्य तस्मिन् लयं सायुज्यमीयतुः अभूत्तस्यापि दंतवक्रस्य तस्मिन् लयं सायुज्यं तज्ज्ञातकप्रामाण्येन सिद्धवन्निर्देशः १९ एतत् अद्भुततमं हि अत एतत्प्रति भ्राम्यति भगवान् सर्वज्ञः त्वं ब्रूहि २० आभाष्य संबोध्य सीदंति निषीदंत्यस्यामिति सत् सभा तस्याः सदः सदः शृण्वत्याः सत्याः कथाः प्राहेत्यन्वयः ॥२२॥ श्रीरामराम॥

श्रीभा॰ भगवन्निंदकस्यनरकपातेनभाव्यमितिवदतस्तवकोभिप्रायः भगवत्पीडाकरत्वेनवा तदभावेपिसुरापानादिवन्निषिद्धनिंदाच
स॰टी॰ रणाद्वा तत्रतावद्देहाभिमानकृतनिंदानिमित्तत्वात् पीडादीनांभगवतश्चतदभावान्नपीडाशंकास्तीत्याह सार्द्धैस्त्रिभिः निं
३ दनंदोषकीर्तनं न्यक्कारः तिरस्कारः निंदनस्तुत्यादिज्ञानार्थंप्रधानपुरुषयोरविवेकेनकलेवरंकल्पितंरचितं २२ तद
भिमानेनभूतानांयथाममाहमितिवैषम्यं तत्कृतंहिंसादिकंचभवति तथानयस्येत्युत्तरेणान्वयः दंडःताडनंपारुष्यंनिंदा॥

नारदउवाच निंदनस्तवसत्कारन्यक्कारार्थंकलेवरं प्रधानपरयोराजन्नविवेकेनकल्पितं २२ हिंसा
तदभिमानेनदंडपारुष्ययोर्यथा वैषम्यमिहभूतानांममाहमितिपार्थिव २३ यन्निबद्धोभिमानोयंतद्व
धात्प्राणिनांवधः तथानयस्यकैवल्यादभिमानोखिलात्मनः २४ परस्यदमकर्तुर्हिहिंसाकेनापिक
ल्प्यते २४ तस्माद्वैरानुबंधेननिर्वैरेणभयेनवा स्नेहात्कामेनवायुंज्यात्कथंचिन्नेक्षतेपृथक् २५

तयोर्देहभूतयोर्हिंसापीडाचभवति २३ यस्मिन्निबद्धोयमभिमानःतस्यदेहस्यवधाद्वधश्चयथा तथायस्याभिमा
नोनास्ति अतोस्यपरमेश्वरस्यहिंसाकेनहेतुनाकल्प्यतेनकेनापि अभिमानाभावेहेतुःकैवल्यात् अद्वितीयत्वे
नाभिमतव्याभावात् वैषम्याभावेहेतुः अखिलात्मनःसर्वात्मनइति॥ तर्हिकिमितिहंतितत्राह॥परस्येति दमक॰
र्तुःहिंसार्थंदंडंकरोतिइत्यर्थः॥२४ यस्माद्भगवतोनिंदादिकृतंवैषम्यंनास्ति तस्माद्येनकेनाप्युपायेनध्यायत ३
[illegible]नैवनिंदादिकृतपापस्यापिनाशात्सायुज्यंस्तुमित्याशयेनाह॥तस्मादितिसप्तभिः॥नास्तिवैरंकेनापियस्मिन्नु
तेनभक्तियोगेनेत्यर्थः युंज्यात्मनइतिशेषः तस्मादेतैरुपायैः पृथङ्नेक्षेत २४ श्रीराम राम॰

तेषामपि वैरानुबंधः श्रेष्ठ इत्याह यथेति न तथा भक्तियोगेनापीति २६ अत्र दृष्टांतः कीटः पेशस्कृता भ्रमरेण संरंभो द्वेषः ।
भयं च स एव योगस्तेन २७ वैरेणायानुचिंता तयैव पूतः पाप्मा येषां ते तं प्रापुः २८ तदघं कामादिनिमित्तं पापं हित्वा ॥
२९ ३० नहि वेनः किमिति नरके पातितः तीव्रध्यानाभावात् पापमेव तत्र फलितमित्याह कतमोपीति पुरुषं श्रीहरिं प्रति ।

यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् न तथा भक्तियोगेन इति मे निश्चिता मतिः २६ कीटः पेशस्कृता
रुद्धः कुड्यायां तमनुस्मरन् संरंभभययोगेन विंदते तत्स्वरूपतां २७ एवं कृष्णे भगवति मायामनुज ईश्वरे वै
रेण पूतपाप्मानस्तमीयुरनुचिंतया २८ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः आवेश्य तदघं हित्वा
बहवस्तद्गतिं गताः २९ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ३०
कतमोपि न वेनः स्यात् पंचानां पुरुषं प्रति तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ३१ मातृस्वस्रेयो वश्चै
द्यो दंतवक्त्रश्च पांडव पार्षदप्रवरौ विष्णोर्विप्रशापात्पदाच्च्युतौ ३२ युधिष्ठिरः कीदृशः कस्य वा शा
पो हरिदासाभिमर्शनः अश्रद्धेय इवाभाति हरेरेकांतिनां भवः ॥ ३३ ॥ श्रीराम राम

पुरुषे पुरुषस्य कामासंभवात् भयादिभिश्चिंतयतां पंचानां मध्ये नैकतमोपीत्युक्तम् ३१ तदेवमितिहासप्रस्तावकथा
श्रुत्वा श्रीकृष्णे शिशुपालस्य वैरानुबंधे को हेतुरित्यपेक्षायां तमेवेतिहासं वक्तुमाह मातृस्वस्रेय इति, पदाद्वैकुंठाच्
च्युतौ ३२ हरिदासावभिमृशति अभिभवतीति तथा अश्रद्धेयः अनादरणीय इव असंभवात् भवो जन्म ३३ राम
राम राम राम राम

असंभवमेवाह जन्मदेहस्तैः प्राकृतैर्देहेंद्रियासुभिर्हीनानां शुद्धसत्वमयदेहानामित्यर्थः प्राकृतदेहसंबंधेन संबद्धमेतदा
ख्यानमाख्यातुमर्हसि ३४ ३५ कथंभूताः सनंदनादयः पंचवाषड्वाहायनानियेषांते अर्भा बालास्तद्वदाभायेषांते पूर्वेषां
मरीच्यादीनामपि दिग्वाससः दिगंबराः अतः शिशून्मत्वा ३६ वासमपि नार्हथः कुतः पुनः तत्सेवामितिचकारार्थः॥ देवालि

देहेंद्रियासुहीनानां वैकुंठपुरवासिनां देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ३५ नारद उवाच एकदाब्रह्मणः
पुत्राविष्णोर्लोकं यदृच्छया सनंदनादयोजग्मुश्चरंतोभुवनत्रयं ३६ पंचषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः॥
दिग्वाससः शिशून्मत्वाद्वाःस्थौतान्प्रत्यषेधतां ३६ अशपन्कुपिताएवंयुवांवासंनचार्हथः रजस्तमोभ्यांर
हितेपादमूलेमधुद्विषः ३७ पापिष्ठामासुरींयोनिंबालिशौयातमाश्वतः ३७ एवंशप्तौस्वभवनात्पतंतौतौकृ
पालुभिः प्रोक्तौपुनर्जन्मभिर्वांत्रिभिर्लोकायकल्पतां ३८ जज्ञातेतौदितेःपुत्रौदैत्यदानववंदितौ हिरण्यक
शिपुर्ज्येष्ठोहिरण्याक्षोनुजस्तथा ३९ हतोहिरण्यकशिपुर्हरिणासिंहरूपिणा हिरण्याक्षोधरोद्धारेबिभ्रता
सौकरंवपुः ४० राम॥

यौ अतोहेतोः आश्वयातं ३७॥ वांयुवयोः त्रिभिर्जन्मभिर्लोकायस्वस्थानप्राप्तये कल्पताम् तावत्
अयंशापः समाप्यतामितिपुनः प्रोक्तावित्यर्थः ३८ ३९ धरोद्धारेनिमित्तेतत्रातिघाती॰
हतः ४० श्रीरामायनमः॥

८

हिरण्यकशिपोर्वधे कारणं सूचयति हिरण्यकशिपुः पुत्रमिति ४१ सर्वभूतानामात्मभूतं अतः समः ब्रह्मैव पश्यती
ति तथा तं अतः प्रशांतं द्वेषादिरहितं अत एव भगवत्तेजसा स्पृष्टं व्याप्तं उद्यमैः शस्त्रप्रहारादिभिः ४२ विश्रवसः

हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् जिघांसुरकरोन्नानायातनामृत्युहेतवे ४१ सर्वभूतात्मभू
तं तं प्रशांतं समदर्शनम् भगवत्तेजसा स्पृष्टं नाशक्नोद्धंतुमुद्यमैः ४२ ततस्तौ राक्षसौ जातौ केशिन्यां
विश्रवः सुतौ रावणः कुंभकर्णश्च सर्वलोकोपतापनौ ४३ तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ॥
रामवीर्यं श्रोष्यसि त्वं मार्कंडेयमुखात्प्रभो ४४ तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव अधुना
शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ४५ वैरानुबंधतीव्रेण ध्यानेनाच्युतसात्मताम् नीतौ पुनर्ह
रेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ४६ युधिष्ठिर उवाच विद्वेषो दयिते पुत्रे कथमासीन्महात्मने ब्रू
हि मे भगवन्येन प्रह्लादस्याच्युतात्मता ४७ इति श्रीभागवते सप्तमस्कंधे प्रथमोऽध्यायः ॥ १ ॥

सुतौ ४३ न्यहनत् हतवानित्यर्थः तर्हि तदेव कथनीयमित्युत्कं प्रत्याह रामवीर्यमिति ४४ कृष्णचक्रे
ण हतमंहो ययोः तौ न तयोः पापमेव हतं न तु तावित्यर्थः ४५ ४६ येन कारणेन प्रह्लादस्याच्युतात्मता
अच्युतैकचित्तत्वं तदपि ब्रूहीति भावः ४७ इति श्रीभावार्थदीपिकायां सप्तमे प्रथमोऽध्यायः ॥ १ ॥ श्रीराम ॥

द्वितीयेविष्णुरोषेणलोकंविद्राव्यदानवैः हतंतभ्रातृपुत्रादीनितिहासैरसांत्वयत् भगवद्द्वेषएवतद्द्वेषेपिकारणमित्याशयेनाह ॥
भ्रातरीत्यादिना एवंदेवपक्षपातेन॥१॥कोपेनउत्अतिशयेनज्वलद्भ्यां कोपाग्निधूमेनैवधूम्रमंबरंनिरीक्षमाणः २ करालदंष्ट्राभिर्युक्तयाउग्रयादृष्ट्यादुःप्रेक्ष्यंभ्रुकुटीयुक्तंमुखंयस्यसः ३ ४ ५ ॥ समेनापिउपधावनैर्भजनैर्निमि

नारदउवाच ॐभ्रातर्येवंविनिहतेहरिणाक्रोडमूर्तिना हिरण्यकशिपूराजन्पर्यतप्यद्रुषाशुचा १॥
आहचेदंरुषापूर्णःसंदष्टदशनच्छदः कोपोज्ज्वलद्भ्यांचक्षुर्भ्यांनिरीक्षन्धूम्रमंबरं २ करालदंष्ट्रोग्रदृष्ट्या
दुष्प्रेक्ष्यभ्रुकुटीमुखः शूलमुद्यम्यसदसिदानवानिदमब्रवीत् ३ भोभोदानवदैतेयाद्विमूर्धंस्त्र्यक्षशंबर श
तबाहोहयग्रीवनमुचेपाकइल्वल ४ विप्रचित्तेममवचःपुलोमन्शकुनादयः शृणुतानंतरंसर्वे
क्रियतामाशुमाचिरं ५ सपत्नैर्घातितःक्षुद्रैर्भ्रातामेदयितःसुहृत् पार्ष्णिग्राहेणहरिणासमे
नाप्युपधावनैः६ तस्यत्यक्तस्वभावस्यघृणेर्मायावनोकसः भजंतंभजमानस्यबालस्येवास्थि
रात्मनः ७ ॥

त्तभूतैःपार्ष्णिग्राहेणसता ६ एवंत्यक्तःस्वभावःसमत्वंयेन तस्यघृणेःशुद्धतेजोमयस्यापि माययावनौकसः
वराहरूपस्यसतः अस्थिरात्मनः अव्यवस्थितचित्तस्य अतःयोभजतितंभजमानस्यानुसरतः ॥७॥ राम॥

तस्यरुधिरेणयावत्तर्पयिष्यामितावद्यूयंभुवंयातेतितृतीयेनान्वयः ननुदेवैःतद्वधःकारितः अतस्तेकिंनहन्यंतेतत्रा =
ह तस्मिन्नुत्कूटेकपटे अहितेप्रतिपन्ने कूटमीहितंयस्येतिवा नष्टेअदृष्टेसंतिदेवाःशुष्यंति स्वयमेवनाशंयास्यंति उ
तःविष्णोरेवप्राणायेवाते ९ तपोयज्ञादियुक्तान्सूदयध्वंघातयध्वं ननुतैःकिमपराद्धंतत्राह विष्णुरिति द्विजानांक्रि

मच्छूलभिन्नग्रीवस्यभूरिणारुधिरेणवै रुधिरप्रियंतर्पयिष्येभ्रातरंमेगतव्यथः ८ तस्मिन्कूटेहितेनष्टे
कृत्तमूलेवनस्पतौ विटपाइवशुष्यंतिविष्णुप्राणादिवौकसः ९ तावद्यातभुवंयूयंविप्रक्षत्रसमेधि
तां सूदयध्वंतपोयज्ञस्वाध्यायव्रतदानिनः १० विष्णुर्द्विजक्रियामूलोयज्ञोधर्ममयःपुमान् देवर्षि
पितृभूतानांधर्मस्यचपरायणम् ११ यत्रयत्रद्विजागावोवेदावर्णाश्रमाःक्रियाः तंतंजनपदंयातसं
दीपयतवृश्चत १२ इतितेभर्तृनिर्देशमादायशिरसादृताः तथाप्रजानांकदनंविदधुःकदनप्रियाः॥ -
१३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् खेटखर्वटघोषांश्चददहुःपत्तनानिच १४ राम ॥

याऽनुष्ठानंमूलंयस्यसः यतोसौयज्ञोधर्ममयश्चपरायणंपरमआश्रयः अतोयज्ञरूपस्यविष्णोर्मूलत्वान्माम
नाहत्यतदाश्रयणाद्वातेवध्याइतिभावः ११ तस्मात्परमंमंत्रंपठतइत्याह यत्रयत्रेति॥संदीपयतदहतवृश्चतछेदंकु
रुत १२ पुरंहट्टादिमत् ग्रामस्तद्रहितः व्रजोगवांवासः उद्यानंकृत्रिमंवनं क्षेत्रंव्रीह्यादेः आरामोऽकृत्रिमंवनं आश्रम
ऋषीणांस्थानं आकरोरत्नादीनां खेटःकर्षीवलानांवासः खर्वटोगिरिद्रोण्याश्रयोग्रामः घोषःआभीराणांवासः ॥

खनित्रैः खननसाधनैः आजीव्यान् उपजीव्यान् शरणानि गृहान् १४ विप्रकृते उपद्रुते यज्ञभागानामभावात् दिवं परित्यज्य
१५ तदेवं प्रजानां कदनं दानवेषु कुर्वत्सु स्वयं स्वर्गराज्यादि साधयितुं तपस्तप्तुकामः प्रथमं यत्कृतवान् तदाह हिरण्यकशि
पुरित्यादिना कटोदकं प्रेताय प्रदेयमुदकं आदिशब्दात्प्रेतश्राद्धं च १६ १७ १८ हे वधूरिति भ्रातृभार्यां संबोधयति॥१९॥

केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः प्रादहन्
शरणान्यन्ये प्रजानां ज्वलितोल्मुकैः १४ एवं विप्रकृते लोके दैत्येंद्रानुचरैर्मुहुः दिवं देवाः परित्यज्य
भुवि चेरुरलक्षिताः १५ हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः कृत्वा कटोदकादीनि भ्रातृपुत्रान
सांत्वयत् १६ शकुनिं शंबरं धृष्टं भूतसंतापनं वृकम् कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् १७
तन्मातरं रुषाभानुं दितिं च जननीं गिरा श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर १८ हिरण्यकशिपु
रुवाच अंबांब हे वधूः पुत्रा वीरं मार्हथ शोचितुं रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः १९ भूताना
मिह संवासः प्रपायामिव सुव्रते दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः २० राम राम

भवतु नाम तस्य श्लाघ्यो वधः तथाप्यस्माकं तावत्बंधुर्गत एवेति चेत् तत्राह भूतानामिति दैवेन प्राचीनकर्मणा एक
त्रनीतानां संयोजितानां पुनश्च स्वैः स्वैः कर्मभिरुन्नीतानां वियोजितानां २० ॥ श्रीराम राम राम राम

एवंलोकदृष्ट्याशोकंनिवार्यतत्त्वदृष्ट्यावारयतिनित्यइति नित्यःमृत्युशून्यः अव्ययःअपक्षयशून्यः शुद्धःनिर्मलः सर्व
गःसर्वगतः सर्ववित्सर्वज्ञश्च सर्वज्ञहेतुः परोदेहादिव्यतिरिक्तः अतोमृतःइतिकृशइतिमलिनइति वियुक्तइति अज्ञ
इतिशोकोनकार्यइत्यर्थः कथंतर्हितस्यसंसारःतत्राहधत्तेइति आत्मनोमाययास्वाविद्ययालिंगंधत्ते गुणानुच्चावचान्

नित्यआत्माव्ययःशुद्धःसर्वगःसर्ववित्परः धत्तेसावात्मनोलिंगंमाययाविसृजन्गुणान् २१ यथांभसाप्रच
लनातरवोपिचलाइव चक्षुषाभ्राम्यमाणेनदृश्यतेचलतीवभूः २२ एवंगुणैर्भ्राम्यमाणेमनस्यविकलः
पुमान् यातितत्साम्यतांभद्रेह्यलिंगोलिंगवानिह २३ एषआत्मविपर्यासोह्यलिंगेलिंगभावना ए
षप्रियाप्रियैर्योगोवियोगःकर्मसंसृतिः २४ संभवश्चविनाशश्चशोकश्चविविधःस्मृतः अ
विवेकश्चचिंताचविवेकास्मृतिरेवच २५ श्रीराम राम श्रीराम राम राम

देहान्सुखदुःखादीन्वाविशेषेणसृजन्स्वीकुर्वन्लिंगंशरीरोपाधिःसंसारइत्यर्थः २१ एतत्सदृष्टांतंप्रपंचयति॥
यथेतिचतुर्भिः तरवःप्रतिबिंबिताः उपाधिधर्माउपहितेभवंतीतिदृष्टांतमुक्त्वाग्राहकधर्मोग्राह्येभवंतीतिदृष्टांतमाह॥
चक्षुषेति॥२२ अविकलःपरिपूर्णएवतत्साम्यतांमनःसमतामित्यर्थः २३ लिंगभावनादेहाभिमानः एषआत्म
नोविपर्यासःअन्यथाभावः तमेवाह प्रियैर्वियोगः अप्रियैर्योगश्चकर्मचसंसृतिश्चनानागर्भेषुप्रवेशः २४ ततश्च
संभवउत्पत्तिः विवेकस्याऽस्मृतिःअननुसंधानम् २५ श्रीरामचंद्रायनमः॥ श्रीराम राम राम

अत्रापि शोकहेतुं विनादृष्टएवायं शोकइत्यस्मिन्नर्थे प्रेतस्य मृतस्य तस्य ये बांधवास्तेषां च २६ उपासत तत्समीपे आवृत्य स्थिताः २७ विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टानि आभरणानि स्रजश्च यस्य शरेण निर्भिन्नं हृदयं यस्य असृजा रक्तेन आविलं लिप्तं २८ प्रकीर्णाः केशा यस्य ध्वस्ते अक्षिणी यस्य रभसा संरंभेण दष्टो दच्छदः ओष्ठो येन रजसा कुंठं आवृतं मु

अत्राप्युदाहरंतीममितिहासं पुरातनम् यमस्य प्रेतबंधूनां संवादं तं निबोधत २६ उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत २७ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजं शरनिर्भिन्नहृदयं शयानमसृगाविलम् २८ ॥ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् रजःकुंठमुखांभोजं छिन्नायुधभुजं मृधे २९ उशीनरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः हताः स्म नाथेति करैरुरो भृशं घ्नंत्यो मुहुः तत्पदयोरुपापतन् ३० रुदंत्य उच्चैर्दयितांघ्रिपंकजं सिंचंत्य अस्रैः कुचकुंकुमारुणैः विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्य आक्रंदनया विलेपिरे ३१ अहो विधात्राकरुणेन नः प्रभो भवान् प्रणीतो दृगगोचरां दशाम् उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्द्धनः ३२ ॥

खांभोजं यस्य छिन्नमायुधं भुजश्च यस्य २९ तस्य पादयोरुपसमीपे आसमंतात् अपतन् ३० ३१ विलापमेवाह अहो इति द्वाभ्याम् ॥ अकरुणत्वमेवाह दृशामगोचरां दशां येन प्रणीतो गमितः तेन विधात्रा त्वमधुना शुचां विवर्द्धनः कृतोऽसीत्यन्वयः ३२

त्वयासुहृत्तमेनविनावयंकथंस्यामभवेमजीवेम अतःहेवीरयत्रत्वंयास्यसितत्रतेअनुयानमनुगमनंतवपादयोःशुश्रू
षांकुर्वतीनामस्माकंदिशदेहि ३३ निर्हारंदाहार्थंनयनेअस्तंअस्ताचलंप्रति ३४ परिदेवितंरोदनंस्वभार्यामेवाश्रुत्य
श्रुत्वा तत्रस्वयमेवोपयातोयमः तानाह अहोइत्यादिना ३५ वयसाअस्मत्तोधिकानामपिलोकस्यविधिं जन्ममर

त्वयाहृततज्ञेनवयंमहीपतेकथंविनास्यामसुहृत्तमेनते तत्रानुयानंतववीरपादयोःशुश्रूषतीनां
दिशयत्रयास्यसि ३३ एवंविलपतीनांवैपरिगृह्यमृतंपतिम् अनिच्छतीनांनिर्हारमर्कोस्तंसंन्यवर्त
त ३४ तत्राहश्रेतवंधूनांआश्रुत्यपरिदेवितं आहतान्बालकोशस्त्वायमःस्वयमुपागतः ३५ य
मउवाच ॥ अहोअमीषांवयसाधिकानांविपश्यतांलोकविधिंविमोहः यत्रागतस्तत्रगतं
मनुष्यंस्वयंसधर्माअपिशोचंत्यपार्थम् ॥ ३६ ॥ श्रीरामायनमः श्रीराम ॥

णादिप्रकारंविपश्यतामपिपूंविमोहमेवाह यत्रयस्मादव्यक्तादागतः तत्रैवगतमपार्थंशोचंति ॥ ॥ तदुक्तं
गीतासु ॥ अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत अव्यक्तनिधनान्येवतत्रकापरिदेवनेति ॥ किंच
स्वयमपिसधर्मामृतेनसहसमानोमृत्युलक्षणोधर्मोयेषांतथाभूताअपि ३६ राम राम.

अबलाउबेलाअपिवृकादिभिरभक्ष्यमाणावयं तत्रहेतुः योंतर्गर्भेरक्षतिसएवहिविश्वंरक्षितारक्षति ३७ ननुतस्यरक्षणेकिंप्रयोजनं नकिंचिदपिकिंतुक्रीडैवकेवलमित्याह॥ यइदंविश्वंसृजतिरक्षतिसंहरतिचभोअबलाः तस्ये

अहोवयंधन्यतमायदत्यक्ताःपितृभ्यांनविचिंतयामः अभक्ष्यमाणाअबलावृकादिभिःसरक्षितारक्षतियोहिगर्भे ३७ यइच्छयेशःसृजतीदमव्ययोयएवरक्षत्यवलुंपतेचयः तस्याबलाःक्रीडनमाहुरीशितुःचराचरंनिग्रहसंग्रहेप्रभुः ३८ पथिच्युतंतिष्ठतिदिष्टरक्षितंगृहेस्थितंतद्विहतंविनश्यति जीवत्यनाथोपितदीक्षितोवनेगृहेपिगुप्तोस्यहतोनजीवति ३९ राम राम॰

शितुःचराचरंक्रीडासाधनमाहुः ॥ ॥ अतएवनिग्रहेसंहारेसंग्रहेपालनेचप्रभुः ३८ ॥ प्रभुत्वमेवअन्वयव्यतिरेकाभ्यांदर्शयति पथीति॥ दिष्टेनदैवेन ईश्वरेणरक्षितं तेनेश्वरेणविहतं अस्यहतःतेनोपेक्षितः ३९ श्रीरामचंद्रायनमः श्रीराम राम॥

ॐश्रीराम राम श्रीराम राम श्रीराम राम श्रीराम राम ॥ ८

नन्वेवमात्मनो जन्ममरणादिकमंगीकृत्य स्वराधीनत्वान्न शोकः कार्य इत्युक्तं इदानीं तु देहानामेव जन्मादि न त्वात्मन इ
त्याह त्रिभिः भूतानि देहाः निजयोनिः स्वकारणभूतं लिंगशरीरं तन्निमित्तैः कर्मभिः भवंति जायंते न भवंति नश्यंति च
सर्वशः देवादिदेहा अपि तत्र ह तदा प्रकृतो देहे स्थितोप्यात्मा तस्या गुणैर्देहधर्मैः जन्मादिभिर्न बध्यते न युज्यते अतः अ
न्यतमो देहादत्यंतविलक्षणः ४० ननु देहः कृशः स्थूल इत्यादौ न वैलक्षण्यं प्रतीयते तत्राह इदं मोहजं अविवेका
दात्मत्वेन ज्ञातं वस्तुतस्तु पृथगेव यत ईयते दृश्यते भौतिकं च यथा गृहमित्यन्वयः अत्रैवं प्रयोगः इ॰शर भौति

भूतानि तैस्तैर्निजयोनिकर्मभिर्भवंति कालेन भवंति सर्वशः न तत्र हात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यत
मो निबध्यते ४० इदं शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिकमीयते गृहं यथोदकैः पार्थिवतैजसैर्जनः का
लेन जातो विकृतो विनश्यति ४१ यथानलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक्स्थितः यथान
भः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः ४२ राम श्रीराम ॥

कात्वपुरुषात् शरीरं भिन्नं दृश्यत्वात् भौतिकत्वाच्च यथात्यंताविवेकिनात्मत्वेनाभिमतमपि गृहं ततः पृथक् तद्वदिति ॥
भौतिकत्वात्तु मानं विहएव नात्मनो जन्माद्यभावमुपसंहरति यथा ओदकैः परमाणुभिर्जातो बुद्बुदादिः यथा च पा
र्थिवैर्जातो घटादिः यथा च तैजसैर्जातः कुंडलादिर्विनश्यति तथा नैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव
विकृतः परिणतः सन् विनश्यति न त्वात्मेत्यर्थः ४१ पृथगवस्थानाभावेपि भिन्नत्वे दृष्टांतद्वयमाह ॥ यथानलो दा
रुष्वेव स्थितोपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते यथा च देहगतोप्यनिलो नासिकादिषु पृथक्स्थित एव
प्रतीयते देहस्थत्वेप्यात्मनः तद्धर्मयोगाभावे दृष्टांतमाह ॥ यथा नभो न सज्जते क्वापि संगं न प्राप्नोति तथा पुमान
पि सर्वेषां गुणानां देहेंद्रियादीनामाश्रयः तेषामाश्रितो वा परः पृथगेवेत्यर्थः ॥ ४२ ॥ श्रीराम राम

श्री॰ भा॰ सु॰ टी॰ ६

किंचहेमूढाः यमनुशोचथ सोयंयुष्मद्गतो स्वयज्ञःशेतेकिमितिशोचथ नन्वेतावंतंकालमसौशृणोति अनंतरं
प्रतिवक्तिच इदानींतस्यादर्शनान्मृतइतिशोचामइतिचेत् सतुशोचनीयोनभवति प्रागपितस्यादर्शनादि
त्याह यःश्रोतेति ४३ ननुमुखनासिकासंचारीप्राणःश्रोतावक्ताचदृष्टएवनासौश्रोतावक्ताच अचेतनत्वादि
त्याह नश्रोतेति महानसुर्सर्वेंद्रियचेष्टाहेतुः अतएवमुख्यः प्राणोवैमुख्यइतिश्रुतेः कस्तर्हिवक्ताश्रोता
चतत्राह ॥

स्वयज्ञोनन्वयंशेतेमूढायमनुशोचथ यःश्रोतायोनुवक्तेहसनदृश्येतकर्हिचित् ४३ नश्रो
तानानुवक्तायंमुख्योप्यत्रमहानसुः यस्त्विहेंद्रियवानात्मासचान्यःप्राणदेहयोः ४४ भूतें
द्रियमनोलिंगान्देहानुच्चावचान्विभुः भजत्युत्सृजतिह्यन्यस्तच्चापिस्वेनतेजसा ४५

यस्त्विहदेहेंद्रियेस्तत्तदर्थद्रष्टाआत्मा सतुप्राणदेहाभ्यामन्यएवसचेतनः ४४ ननुचेतनत्वेअन्यत्वेच
तस्याहंप्राः स्थूलः काणोबधिरइत्यादिदेहधर्मोपलब्धिःकुतस्तत्राह भूतेंद्रियमनोभिर्लिंग्यंतेलक्ष्यंतेइति
तथातान्देहान् तेभ्योऽन्यएवभजति अहमितिमन्यते तर्हिकथंमोक्षइत्यतआह तच्चभजनं स्वेनते
जसाविवेकबलेनउत्सृजत्यपिहिइत्यनुभवंप्रमाणयति ४५ ६

ननु विवेकानंतरमप्याहारादिकर्मसु प्रवृत्तेर्बंधः स्यादेवेत्यत आह यावल्लिंगशरीरेणान्वितः तदभिमानवानात्माभ
वति तावदेव तस्य तत्कर्म निबंधनं बंधहेतुर्भवति ततो विपर्ययः देहधर्मेभात्कं ततः क्लेशश्चानुवर्तते नतु लिं
गाभिमाने निवृत्तेपि यतोयं मायायोगो विपर्ययादिर्मायया प्रयुज्यत इति तथा न परमार्थ इत्यर्थः ॥४६॥ ननु स्वर्गसुखदुः
खादीनां तत्साधनानां च सत्यत्वप्रतीतेः कुतो मायामयत्वं तथा च बहवो वादिनः सत्यत्वमेव च वदंति तत्राह ॥

यावल्लिंगान्वितो ह्यात्मा तावत्कर्मनिबंधनं ततो विपर्ययः क्लेशो मायायोगोनुवर्तते ४६ वितथोभि-
निवेशोयं यद्गुणेष्वर्थदृग्वचः यथा मनोरथः स्वप्नः सर्वमैंद्रियकं मृषा ४७ अथ नित्यमनित्यं वा नेह
शोचंति तद्विदः नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ४८ लुब्धको विपिने कश्चित्पक्षिणां
निर्मितोंतकः वितत्य जालं विदधे तत्र तत्र प्रलोभयन् ४९ कुलिंगमिथुनं तत्र विचरत्समदृश्यप
त तयोः कुलिंगी सहसा लुब्धकेन प्रलोभिता ॥ ५०॥ श्रीराम राम

वितथो मिथ्याभूतोयमभिनिवेशः कोसौ गुणेषु तत्कार्येषु सुखादिष्वर्थः परमार्थ इति दृक् च वचश्चेति यत् कुत इत्यत आ
ह यथेति ४७ उपसंहरति अथ तस्मान्नित्यमात्मानमनित्यं देहं वा तद्विदः नित्यमनित्यं च जानंतः ॥ नन्वेवमुपदेष्टारोपि शो
चंतो दृश्यंते तत्राह नान्यथेति ज्ञानदार्ढ्याभावात् स्वभावो न निवर्तत इत्यर्थः ४८ स्वयं सधर्मा अपीति यदुक्तं तद्वेतिहासमा
ह लुब्धक इत्यादिना पक्षिणामंतक ईश्वरेण निर्मितः सन् यत्र तत्र तत्र तान् प्रलोभयन् जालं विस्तार्य विशेषेण धृत
वान् पाठांतरे तेषामामिषादिभिः प्रलोभनं कृतवानित्यर्थः ४९ कुलिंगः कंदभक्षी पक्षिविशेषः कुलिंगयो

श्री॰ भा॰ स॰ टी॰ १०

शिचसंतंयांजालस्यसूत्रेसज्जतवंधंप्रापश्रापन्नांश्रापन्नांप्राप्ता ५१ श्राकरुणया सर्वतोनुकंपया ५२ श्रात्मनोदेहस्यार्धेनवि
धुरायुग्माभार्याशून्यजीवितेनानेनदुःखंयथाभवत्येवंजीवताकिंमेप्रयोजनं श्रतोमामपिकामंनयत्वित्यन्वयः ५३ न
जाताःपक्षायेषांतान्कथंबिभर्मिपोष्यामिमेप्रजामातरंप्रतीक्षंते ५४ शाकुनिकःपक्षहंता निलीनःसन् ५५ श्रात्मा

सासज्जतशिचसंतंयामद्दिषीकालयंत्रिता कुलिंगस्तांतथापन्नांनिरीक्ष्यभृशदुःखितः स्नेहादकल्पःकृपणः
कृपणांपर्यदेवयत् ५१ श्रहोश्रकरुणोदेवःस्त्रियाकरुणयाविभुः कृपणंमानुशोचंत्यादीनयाकिंकरिष्य
ति ५२ कामंनयतुमांदेवःकिमर्द्धेनात्मनोहिमे दीनेनजीवतादुःखमनेनविधुरायुषा ५३ कथंत्वजात
पक्षांस्तान्मातृहीनान्बिभर्म्यहम् मंदभाग्याःप्रतीक्षंतेनीडेमेमातरंप्रजाः ५४ एवंकुलिंगंविलपंतमारात्प्रि
यावियोगातुरमश्रुकंठम् सएवतंशाकुनिकःशरेणविव्याधकालप्रहितोविलीनः ५५ एवंस्त्वमपश्यंत्य
श्रात्मापायमबुद्धयः नैनंप्राप्स्यथशोचंत्यःपतिंवर्षशतैरपि ५६ हिरण्यकशिपुरुवाच बालएवंप्रवद
तिसर्वेविस्मितचेतसः ॥ ज्ञातयोमेनिरेसर्वमनित्यमयथोत्थितम् ५७ यमएतदुपाख्यायतत्रैवांतरधी
यत ज्ञातयोपिसुयज्ञस्यचक्रुर्यत्सांपरायिकं ५८ ततोशोचतमात्वंयंपरंचात्मानमेवच कश्रात्माकः
परोवात्रस्वीयःपारक्यएवच ५९ स्वपराभिनिवेशेनविनाज्ञानेनदेहिनां ५९ नारदः इतिदैत्यपतेर्वा
क्यंदितिराकर्ण्यसस्नुषा पुत्रशोकंक्षणात्त्यक्त्वातत्त्वेचित्तमधारयत् ६० इतिश्रीभागवतेसप्तमेद्वितीयः॥२॥

पायंस्वसृत्यु ५६ श्रयथोत्थितंमिथ्यैवाविर्भूतं ५७ सांपरायिकंपरलोककृत्यं ५८ श्रशोचतेतिपाठेश्रडागमश्रार्षः स्वःप
रइत्यभिनिवेशएवाज्ञानंतेनविना ५९ सस्नुषास्नुषयासहिता ६० ॥ इतिश्रीभागवतेसप्तमेद्वितीयः॥२॥ राम॥

तृतीये तस्य तपसा तप्तं वीक्ष्य जगद्विधिः आगत्य विस्मितस्तेन संस्तुतः सवरानदात् ॥ तदेवं साधूनां कदनेदानवानां दिष्टप
बंधूनां शोकं तत्त्वनिरूपणेनापनीय यत्कृतवान् तदाह हिरण्यकशिपुरित्यादिना अप्रतिद्वंद्वं प्रतिपक्षहीनं एकराजं एक
मेव राजानं व्यधित्सत कर्तुमैच्छत् १ ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादांगुष्ठेनाश्रिता अवनिर्येन २ जटानां दीधितिभिः

नारद उवाच हिरण्यकशिपू राजन्नजेयमजरामरं आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत १ स
तेपे मंदरद्रोण्यां तपः परमदारुणं ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः २ जटादीधितिभिः रे
जे संवर्तार्क इवांशुभिः तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ३ तस्य मूर्ध्नः समुद्भूतः सधूमो
ग्निस्तपोमयः तिर्यगूर्ध्वमधो लोकानतपद्विष्वगीरितः ४ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचा
लभूः निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ५ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः ॥
धात्रे विज्ञापयामासुर्देवदेव जगत्पते ६ दैत्येंद्रतपसा तप्ता दिवि स्थातुं न शक्नुमः तस्य
चोपशमं भूमन्विधेहि यदि मन्यसे लोका न यावन्नंक्ष्यंति बलिहारास्तवाभिभो ७ राम ॥

कांतिभिः अंशुभिः रश्मिभिः प्रलयकर्तार्क इव रेजे पूर्वं ये अलक्षिताः संतो विचेरुः ते देवाः पुनः स्वानि स्थानानि भेजि
रे ३ विष्वगीरितः सर्वतः प्रसृतः सन् ४ द्वीपैरद्रिभिश्च सहिता भूश्चलिता ५ ६ तव बलिहाराः करप्रदाः पूजाका
रिण इति वा अभितो भवतीत्यभिभुः हे अभिभो सर्वाधिपते पाठांतरे भो इति संबोधनं अभि अभितो यावन्न
नंक्ष्यतीति संबंधः ७

श्री० भा० स० टी० ११

ब्रह्मणस्तस्मिन्नुद्वेगमुत्पादयितुं तत्संकल्पमाह तस्येति चतुर्भिः अथाप्यस्माभिर्निवेदितं त्वया श्रूयतां ८ तपोयोगयोः
समाधिना निष्ठया सर्वधिष्ण्येभ्यः श्रेष्ठं निजासनं सत्यलोकं यथा अध्यास्ते अधितिष्ठति ९ तत्तथैवात्मनः साधयिष्यामि ॥
ननु ब्रह्मणोऽतिदीर्घायुष्ट्वात् तपस्त्वात् तत्साधितं अन्यः कुतः तत्साधयेत् तत्राह कालात्मनोरिति यद्यप्यायुषोऽल्पत्वे
न देहो वारंवारं म्रियेत तथापि कालस्यात्मनश्च नित्यत्वात् बहुभिर्जन्मभिः तपस्त्वात् तत्साधयिष्याम्येवेति १० वर्द्धमा

तस्यायं किल संकल्पश्चरतो दुश्चरं तपः श्रूयतां किं न विदितस्तवाथापि निवेदितं ८ सृष्ट्वा चराचर
मिदं तपोयोगसमाधिना अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ९ तदहं वर्धमानेन तपोयो
गसमाधिना कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः १० अन्यथेदं विधास्येऽहमयथापूर्वमो
जसा किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिः ११ इति शुश्रुम निर्बंधं तपः परममास्थितः ॥
विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वर १२ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते भवाय श्रेयसे भूत्यै
क्षेमाय विजयाय च १३ इति विज्ञापितो देवैर्भगवानात्मभूर्नृप परितोऽभ्युदस्ताशेषैर्यो दैत्येश्वरा
श्रमम् १४ ॥

नेनेति यदुक्तं तस्य फलमाह अन्यथेति सुरादिव्यत्ययेन अयथापूर्वं पुण्यपापादिव्यत्ययेन इदं जगद्विधास्यामि वैष्णवादि
भिः ध्रुवादिपदैः किं प्रयोजनं अतस्तदेव साधयिष्यामि ११ इति त्वत्पदापहरणे तस्य निर्बंधं शुश्रुम अत एवासौ परमं तप
आस्थितः यदत्र युक्तं तदनंतरमेव विधत्स्व अन्यथा तवस्थानभ्रंशो सति साधूनामनिष्टं स्यादिति शोचं तमाह तवेति ॥ ११
१२॥ तव पारमेष्ठ्यमिदमासनं द्विजानां गवां चोद्भवाय श्रेयसे सुखाय भूत्यै ऐश्वर्याय क्षेमाय लब्धपालनाय विजयाय उत्कर्षाय १३
१४ ।

वल्मीकादिभिः प्रतिच्छन्नं प्रथमं न ददर्श पश्चात्कथंचिद्विलक्ष्यतं प्राहेति द्वयोरन्वयः आचीर्णं समंतात्भक्षितं मेदःत्व
ङ्मांसशोणितं च यस्य अभ्रैरापिहितं छन्नं रविमिव विलक्ष्य १६ हत्वारं धैर्यं दर्शीमेदिकाविशेषैर्भक्षितो देहो यस्य १८
निरंबुः निषिद्धमंबुर्येन सः त्यक्तोदक इत्यर्थः १९ तेऽनेनैन व्यवसायेनैव तावज्जितोऽहं तपोनिष्ठेन भवता स्तुतराजितः २०

न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः पिपीलिकाभिराचीर्णं मेदस्त्वङ्मांसशोणितं १५ तपंतं
तपसा लोकान्यथा अपिहितं रविं विलक्ष्य विस्मितः प्राह ब्रह्म सनुर्हंसवाहनः १६ ब्रह्मोवाच ॥
उत्तिष्ठोत्तिष्ठ भद्रं ते तपः सिद्धोसि काश्यप वरदोहमनुप्राप्तो व्रियतामीप्सितो वरः १७ अङ्गात्महमेत
तेऽत्सारंमहदद्भुतं दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते १८ नैतत्पूर्वर्षयश्चक्रुर्न करिष्यंति चा
परे निरंबुर्धारयेत्प्राणान्को वै दिव्यसमाः शतं १९ व्यवसायेन तेनेन दुष्करेण मनस्विना तपोनिष्ठे
न भवता जितोऽहं दितिनंदन २० ततस्त आशिषः सर्वा ददाम्यसुरपुंगव मर्त्यस्य ते अमर्त्यस्य द
र्शनेनाफलं मम २१ श्रीनारदः इत्युक्त्वादिभवो देवो भक्षितांगं पिपीलिकैः कमंडलुजलेनौक्षद्दि
व्येनामोघराधसा २२ स तत्कीचकवल्मीकात्सहओजोबलान्वितः सर्वावयवसंपन्नो वज्रसंह
ननो युवा उत्थितस्तप्तहेमाभो विभावसुरिवैधसः २३ स निरीक्ष्याम्बरे देवं हंसवाहमवस्थितम् न
नाम शिरसा भूमौ तद्दर्शनमहोत्सवः २४ राम राम राम

अमर्त्यस्य मम दर्शनं अफलं न भवति २१ आदौ भवतीत्यादिभवः औक्षत्प्रोक्षितवान् २२ वज्रवत्संहननं अंगं दार्ढ्यं
यस्य तप्तस्य हेम्न इव आभा यस्य २३ तस्य दर्शनमेव महानुत्सवो यस्य २४ राम राम

श्री· भा· स· टी· १२ हर्षेणाश्रूणि पुलकोद्भेदश्च यस्य २५ अंधेन निविडेन तत्र हेतुः कालसृष्टेन प्रकृतिगुणरूपेणांधेनतेन तमसावृतमिदं जगत्
यः अभिव्यनक् अभिव्यक्तमकरोत् २६ यश्च त्रिगुणेनात्मना इदं सृजति अवति लुंपति च तस्मै रजःसत्त्वतमसां धाम्ने आ
श्रयाय महते पराय परमेश्वराय नम इति द्वयोरन्वयः २७ अत्र च स्वप्रकाशकत्वं जगत्प्रकाशकत्वं तत्कारणत्वं सृ
ष्ट्यादिकर्तृत्वं महत्त्वं परमेश्वरत्वं चेति षड्विधं ब्रह्मलक्षणं तदेव प्रपंचयन् नमस्करोति नम इति चतुर्भिः॥ बीजाय कारणा
य नमः तत्र हेतुः आद्याय ज्ञानं ज्ञप्तिः विज्ञानं विषयाकारं ज्ञानं ते मूर्त्ती यस्य तस्मै अनेन स्वप्रकाशत्वं जगत्प्रकाश

उत्थाय प्रांजलिः प्रह्व ईक्षमाणो दृशा विभुं हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयागृणात् २५ हिरण्यकशिपुरुवा
च कल्पांते कालसृष्टेन योंधेन तमसावृतं अभिव्यनक् जगदिदं स्वयंज्योतिः स्वरोचिषा २६ आत्मना त्रिवृता चेदं
सृजत्यवति लुंपति रजःसत्त्वतमोधाम्ने पराय महते नमः २७ नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये प्राणेंद्रिय
मनोबुद्धिविकारैर्व्यक्तिमीयुषे २८ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् चित्तस्य चि
त्तैर्मनइंद्रियाणां पतिर्महान् भूतगुणाशयेशः २९ श्रीरामचंद्राय नमः श्रीराम राम राम·

कत्वं च दर्शितं बीजायेति निमित्तत्वमुक्तं उपादानत्वं चाह प्राणादयो ये विकाराः तै रूपैर्व्यक्तिं कार्याकारं ईयुषे प्राप्नुवते ॥२८॥
एवमात्मना त्रिवृता चेत्यनेनोक्तं कारणत्वं द्वेधा दर्शितं महत्त्वमीश्वरत्वं चाह त्वमेव जगतो जंगमस्य तस्थुषः स्थावरस्य
च ईशिषे नियंता भवसि केन मुख्येन प्राणेन सूत्रात्मरूपेण अतस्त्वं प्रजापतिः तासां चित्तस्य चित्तैश्चित्तपरिणामभूताया
श्चेतनायाः मनसश्च तन्नियम्यानामिंद्रियाणां च पतिः अतस्त्वमेव महान् भूतानामाकाशादीनां तद्गुणानां शब्दा
दिविषयाणां आशयानां तद्वासनानामीशश्च ॥ एतेनैव स्रष्टृत्वं दर्शितम् २९ राम राम· १२

इदानीं यज्ञप्रवर्तकत्वेन अंतर्यामित्वेन जगत्पालकत्वमाह त्वमेव सप्ततंतून् अग्निष्टोमादियज्ञान् विस्तारयसि कथं त्रय्या तन्वा वेदत्रयरूपेण कथंभूतया चत्वारो होतारो यत्र तच्चतुर्होत्रिकं कर्म तद्विषयया विद्यया आत्मवतां प्राणिनामात्मभूतः त्वमेवांतरात्मा च अंतर्यामी [यतः] कुतः कविः सर्वज्ञः तत्कुतः एकः अखंडः तत्र हेतुः अनादिः अनंतपारश्चेति नास्त्यंतः कालतः पारं च देशतो यस्य सः ३० कालरूपेण संहर्तृत्वमाह त्वमेवेति लवाद्यैरवयवैः क्षिणोषि क्षपयसि तदेवं सृष्ट्यादि कर्तृत्वेपि निर्विकारत्वमेवाह कूटस्थ इति तत्र हेतवः आत्मा ज्ञानरूपः परमेष्ठी परमेश्वरः अजः जन्मशून्यः ॥

त्वं सप्ततंतून्वितनोषि तन्वा त्रय्या चतुर्होत्रिकविद्यया च त्वमेक आत्मात्मवतामनादिरनंतपारः कविरंतरात्मा ३० त्वमेव कालो निमिषोजनानामायुर्लवाद्यावयवैः क्षिणोषि कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ३१ त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति विद्याकलास्ते तनवश्च सर्वा हिरण्यगर्भोसि बृहत्त्रिपृष्ठः ३२ श्रीरामाय नमः ॥

महान् अपरिच्छिन्नः किंच जीवलोक एव कर्मवशाज्जन्मादिभिर्विक्रियते त्वं तु तस्य जीवः जीवनस्य हेतुः यतस्तस्यात्मा नियंता ३१ तत्कुतः तत्राह त्वत्त इति त्वत्तो व्यतिरिक्तं यदि किंचिद्भवेत् तर्हि तस्माज्जन्मादिविकारस्तव नियम्यत्वादिकं वा भवेत् त्वत्तः परं कारणं अपरं कार्यं तत्रैव जगत् जंगमं अनेजत् स्थावरं च व्यतिरिक्तं नास्ति ॥ बोधकं शास्त्रं व्यतिरिक्तमस्तीति चेत् न यतः विद्या वेदोपवेदादि विद्यास्थानानि कलाश्च तदंगानि तवैव तनवः न त्वद्व्यतिरिक्ताः तत्कुतः यतस्त्वं बृहत् ब्रह्मैवासि तदपि कुतः तत्राह हिरण्यरूपं ब्रह्मांडं गर्भे यस्य सः ॥ त्रिपृष्ठः त्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः अक्षरात्परतः पर इत्यादिश्रुतेः ३२ राम ॥

श्री॰ भा॰ स॰ टी॰ १३ ननु ब्रह्मांडशरीरस्य (जीवस्य) मम कुतो ब्रह्मत्वं कुतो वा ब्रह्मांडगर्भत्वादित्यत्राह । व्यक्तं कार्यमिदं तव शरीरं व्यक्तं सत्यमिति वा येन शरीरेण त्वमिंद्रियप्राणमनसां गुणान् विषयान् भुंक्षे किंतु पारमेष्ठ्ये परमे स्वर्ये धामनि स्वरूपे स्थित एव भुंक्षे न तु स्वरूपतिरोधानेन अतस्त्वमव्यक्त आत्मा निरुपाधिब्रह्मैव पुराणपुरुषश्चेत्यर्थः ॥ ३३ ॥ ननु ब्रह्मत्वं पुराणपुरुषत्वं कथमेकस्य तत्राह । हे अनंत येन त्वया अव्यक्तेन मनोवचनागोचरेण रूपेण इदं विश्वं ततं व्याप्तं तस्मै तुभ्यं

व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ३३ अनंताव्यक्तरूपेण येनेदमखिलं ततं चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ३४ यदि दास्यस्यभिमतान्वरान्मे वरदोत्तम भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ३५ नांतर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि व्यसुभिर्वासुमद्भिर्वा सुरासुरमहोरगैः ३६ अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां सर्वेषां लोकपालानां महिमानं यथात्मनः तपोयोगप्रभावानां यन्न रिष्यति कर्हिचित् ३७ इति श्रीभागवते सप्तमस्कंधे तृतीयोऽध्यायः ३ श्रीराम ॥

भगवते अचिंत्यैश्वर्याय नमः भगवत्त्वे हेतुः चिच्छक्तिर्विद्या अचिच्छक्तिर्माया ताभ्यां युक्तायेति ३४ ३५ अन्यस्मात् त्वत्सृष्टव्यतिरिक्तादपि भगवत आयुधैश्च मा भूत् ३६ व्यसुभिः अप्राणैः असुमद्भिः सप्राणैः ~~३६~~ यथा आत्मनस्तवास्ति तथा अप्रतिद्वंद्वतादिकं देहीति शेषः । तपसा योगेन च प्रभावो येषां तेषां यत् अणिमाद्यैश्वर्यं न रिष्यति नश्यति तत्त्वं देहीत्यर्थः ३७ ॥ १३

चतुर्थे तु वरांल्लब्ध्वा विजित्याखिललोकपान् विष्णुद्वेषेण तान्सर्वान् दैत्येंद्रः समपीडयत् १ शतधृतिर्ब्रह्मा १ मम मत्तः
यद्यपीमे दुर्लभाः २ अमोघोऽनुग्रहो यस्य ३ यदर्थं तपस्तप्तं तदाह एवमित्यादिना ४ ५ ६ सर्वेषां सत्वानां प्राणिजातानां

श्रीनारद उवाच एवं वृतः शतधृतिर्हिरण्यकशिपोरथ प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १ ब्रह्मो
वाच तातेमे दुर्लभाः पुंसां यान्वृणीषे वरान्मम तथापि वितराम्यंग वरान्यदपि दुर्लभान् २ ततो जगाम
भगवानमोघानुग्रहो विभुः पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ३ एवं लब्धवरो दैत्यो बिभ्रद्धेम
मयं वपुः भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ४ स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरः देवासु
रमनुष्येंद्रगंधर्वगरुडोरगान् ५ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् यक्षरक्षः पिशाचे
शान्प्रेतभूतपतीनथ ६ सर्वसत्वपतीन्जित्वा वशमानीय विश्वजित् जहार लोकपालानां स्थानानि स
ह तेजसा ७ देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपं महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा त्रैलोक्य
लक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ८ यत्र विद्रुमसोपाना महामारकता भुवः यत्र स्फटिककुड्या
नि वैडूर्यस्तंभपंक्तयः ९ यत्र चित्रवितानानि पद्मरागासनानि च पयःफेननिभाः शय्या मुक्तादामपरिच्छ
दाः १० कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इतस्ततः १० ॥ राम राम॥

ये ये पतयः तान् ७ त्रिविष्टपं स्वर्गमध्यास्ते स्म अधिष्ठितवान् तत्र महेंद्रभवनमध्युवास अधिवसति स्म ८ अखिलस
मृद्धियुक्तत्वमेवाह यत्रेति त्रिभिः ९ मुक्तादामानि परिच्छदाः परिकराः यासां १० राम राम

सुदतीः सुदत्यः ११ ऊर्जितमधिकं चंडं तीव्रं शासनं यस्य १२ अंग हे राजन् उरुगंधिना उरुर्गंधेन मधुना सुरया मत्तं अ
तएव विह्वलं विघूर्णिते ताम्रे अक्षिणी यस्य तं अशेषधिष्ण्यपाः सर्वलोकपालाः उपायनयुक्तैः पाणिभिरुपासत त्रिभिः

रत्नस्थलीषु पश्यंति सुदतीः सुंदरं मुखं यद्‌ ११ तस्मिन् महेंद्रभवने महाबलो महामना निर्जितलोक एकराट्
रेमेभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचंडशासनः १२ तमंग मत्तं मधुनोरुगंधिना विवृत्तताम्रा
क्षमशेषधिष्ण्यपाः उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम् १३ जगुर्महेंद्रासनमो
जसा स्थितं विश्वावसुस्तुंबुरुरस्मदादयः गंधर्वसिद्धा ऋषयोस्तुवन्मुहुर्विद्याधराश्चाप्सरसश्च पांडव १४
स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा १५ अकृष्टपच्यातस्या
सीत्सप्तद्वीपवती मही तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः १६ रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चो
ह्यरूर्मिभिः क्षारशीधुघृतक्षौद्रदधिक्षीरामृतोदकाः १७ शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान् द्रुमाः द
धार लोकपालानामेक एव पृथग्गुणान् १८ श्रीरामायनमः श्रीराम ॥

ब्रह्मविष्णुरुद्रैर्विना पदमाश्रयभूतं उपासनप्रकारमाह जगुरिति १४ १६ तत्पत्न्यो नद्यऊहुः वहंतिस्म रत्नाकरा
नेवाहरंतारेति १७ आक्रीडं क्रीडास्थानं गुणान् पुष्पफलादीन् सर्वलोकपालानां पृथग्विधानात् गुणान् वर्षण
दहनशोषणादीन् एक एव दधार १८ राम राम ॥ १४

निर्जिताः ककुभो येन यथोपजोषं यथाप्रीति १९ यत्स्यां काष्ठां २२ अरूपा चक्षुरहिता तामेवाह ममदर्शनं श्रवणं सर्वे
षां श्रेयसामुपपत्तये संधिरार्षः २५ २७ ननु देवादिविद्वेषेप्यस्य विनाशो नास्ति ब्रह्मवरेणोर्जितत्वात् तत्राह निर्वैरायेति ॥

सहस्रं निर्जितककुबेकराड्विषयान्प्रियान् यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः १९ एवमैश्वर्यम
त्तस्य दृप्तस्योच्छास्त्रवर्तिनः कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः २० तस्योग्रदंडसंविग्नाः सर्वे लो
काः सपालकाः अन्यत्रालब्धशरणाः शरणं ययुरच्युतं २१ तस्यै नमोस्तु काष्ठायै यत्रात्मा हरिरीश्वरः
यद्गत्वा न निवर्तंते शांताः संन्यासिनोमलाः २२ इति ते संयतात्मानः समाहितधियोमलाः उपतस्थुर्हृ
षीकेशं विनिद्रा वायुभोजनाः २३ तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना संनादयंती ककुभः साधूना
मभयंकरी २४ माभैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये २५ ज्ञा
तमेतस्य दौरात्म्यं दैतेयापसदस्य यत् तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत २६ यदा देवेषु वेदेषु
गोषु विप्रेषु साधुषु धर्मे मयि च विद्वेषः स वा आशु विनश्यति २७ निर्वैराय प्रशांताय स्वसुताय महा
त्मने प्रह्लादाय यदा द्रुह्येद्धनिष्येपि वरोर्जितम् २८ नारद उवाच इत्युक्ता लोकगुरुणा तं प्रणम्य
दिवौकसः न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतम् २९ श्रीरामायनमः श्रीराम राम॥

सर्वमहं सहे न मद्भक्तद्रोहमिति भावः २८ ॥ ॥ असुरं च हतं मेनिरे तदानीं ।
तत् द्वेषस्य प्रवृत्तत्वात् इति भावः २९ श्रीरामचंद्रगुरवेनमः श्रीराम राम राम

तमेवद्वेषं वक्तुमादौस्तुतस्य महत्त्वमाह तस्येत्यादिना गुणैर्महान्भूत गुणानेवाह महदुपासकइत्यादिना ३० सत्यासंधाप्रति
ज्ञायस्य एकएवप्रियश्चसुहृत्तमश्च सम्यक्कृनताञ्चार्याणामेवप्रयोयेनईश्वरइतिभावनायस्य ३२ व्यसनेषुनोद्विग्नचि
त्तः गुणेषुविषयेषुनिःस्पृहः यतस्तेषुअवस्तुदृक् दांताइंद्रियादयोयस्य रहितआसुरोभावोमत्सरादिर्यस्यसः असुरो

तस्यदैत्यपतेःपुत्राःचत्वारःपरमाद्भुताः प्रह्लादोऽभून्महांस्तेषांगुणैर्महदुपासकः ३० ब्रह्मण्यःशी
लसंपन्नःसत्यसंधोजितेंद्रियः आत्मवत्सर्वभूतानामेकःप्रियसुहृत्तमः ३१ दासवत्सन्नतार्यां
घ्रिःपितृवद्दीनवत्सलः भ्रातृवत्सदृशेस्निग्धोगुरुष्वीश्वरभावनः ३२ विद्यार्थरूपजन्माढ्योमानस्तंभवि
वर्जितः ३२ नोद्विग्नचित्तोव्यसनेषुनिःस्पृहः श्रुतेषुदृष्टेषुगुणेष्ववस्तुदृक् दांतेंद्रियप्राणशरीरधीःसदा
प्रशांतकामोरहितासुरोऽसुरः ३३ यस्मिन्महद्गुणाराजन्गृह्यंतेकविभिर्मुहुः नतेधुनापिधीयंतेयथा
भगवतीश्वरे ३४ यंसाधुगाथासदसिरिपवोपिसुरान्नृप प्रतिमानंप्रकुर्वंतिकिमुतान्येभवादृशाः ॥
३५ गुणैरलमसंख्येयैर्माहात्म्यंतस्यसूच्यते वासुदेवेभगवतियस्यनैसर्गिकीरतिः ३६ न्यस्तक्रीडनको
बालोजडवत्तन्मनस्तया कृष्णग्रहगृहीतात्मानवेदजगदीदृशं ३७ आसीनःपर्यटन्नश्नन्शयानःप्रपि
बन्ब्रुवन् नानुसंधत्तएतानिगोविंदपरिरंभितः ३८ श्रीराम श्रीराम श्रीः॥

पिसन् ३३ अधुनापितेगुणानपिधीयंते तिरोहितानभवंति अत्रहेतुः गृह्यंतेकविभिरिति ३४ साधुगाथासदसिसाधुकथायाःप्र
संगवत्यांसभायां प्रतिमानंदृष्टांतं ३५ सूच्यतेमयाकेवलंद्योत्यतेनतुकथ्यतेइतिवा ३५ नैसर्गिकरतेर्लिंगान्याह न्यस्तक्रीड
नकइतिषड्भिः ॥ तन्मनस्तयातदेकचित्ततेन ३७ एतान्यासनादीनिगोविंदेनपरिरंभितः आत्मनाएवक्रीडितः ३८ ॥राम॥

रुदतिरोदितिवैकुंठस्यचिंतयाशवलाव्यामिश्राप्रभिताचेतनायस्य तस्यचिंतयाह्लादोयस्य ३९ उत्कंठः सुतरांकंठः सन् अ
नुचकार तच्चेष्टादिकंस्वयंकृतवान् ४० संस्पर्शस्तद्भावापत्तिः तेननिर्वृतः अस्पंदः स्थिरोयः प्रणयः तेनयः आनंदः तेनयत्
सलिलं तेनयत्के आमीलिते ईषन्निमीलिते ईक्षणेयस्य ४१ आत्मनः परांनिर्वृतिंतन्वन् दुःसंगेनदीनस्यापिमनसः शमं

क्वचिद्रुदतिवैकुंठचिंताशवलचेतनः क्वचिद्धसतितच्चिंताह्लादउद्गायतिक्वचित् ३९ नंदतिक्वचि
दुत्कंठोविलज्जोनृत्यतिक्वचित् क्वचित्तद्भावनायुक्तः तन्मयोनुचकारह ४० क्वचिदुत्पुलकःतू
ष्णीमास्तेसंस्पर्शनिर्वृतः अस्पंदप्रणयानंदसलिलामीलितेक्षणः ४१ सउत्तमश्लोकपदारविंद
योर्निषेवयाकिंचनसंगलब्धया तन्वन्परांनिर्वृतिमात्मनोमुहुर्दुःसंगदीनस्यमनःशमंव्यधात् ४२ त
स्मिन्महाभागवतेमहाभागेमहात्मनि हिरण्यकशिपुराजन्नकरोदघमात्मजे ४३ युधिष्ठिरउवा
च देवर्षएतदिच्छामोवेदितुंतवसुव्रत यदात्मजायशुद्धायपितादात्साधवेह्यघम् ४४ पुत्रान्वि
प्रतिकूलान्स्वान्पितरःपुत्रवत्सलाः उपालभंतेशिक्षार्थंनैवाघमपरोयथा ४५ ॥ श्रीराम

शांतिंव्यधात् ४२ अघंद्रोहमकरोत् ४३ प्रथमाध्यायांतेपृष्टमेवार्थमतिविस्मयेनपुनःपृच्छति
देवर्षइति तवत्वत्तः तववाक्यमितिवा साधवेअघमदात् साधोःद्रोहंकृतवान् इतियत् एतद्वेदितुं
४४ ॥ उपालभंते आक्षिपंति अघंतुनैवकुर्वंति अपरःशत्रुरिव ४५ श्रीराम, राम॥

अनुवशाननुकूलान् साधूनपगतरोषान् गुरुः पितेव देवता येषां तान् उद्दिश्य अद्यं न कुर्वतीति किमु वक्तव्यमित्यर्थः पुत्रा
यपुत्रमुद्दिश्य पितुर्द्वेषः पित्राकृतो द्वेषः पुत्रस्य मरणार्थं प्रयोजितः प्रवर्तित इति यत् एतत्कौतूहलं किंविधमपाकुरु यद्वा
यद्यस्मात् पुत्राय यो द्वेषः स पितुर्मरणाय प्रयोजितः अत एव तत्कौतूहलं किंविधमित्यर्थः ॥४६॥ इति भावार्थदीपिकायां सप्तमे
चतुर्थोऽध्यायः ॥ ॥ पंचमे गुरुतोऽधीतं त्यक्त्वा विष्णुस्तुतौ रतं घातयन् द्विपसर्पाद्यैः सुतं दैत्यो न चाशकत् ॥ भगव

किमुतानुवशान् साधूंस्तादृशान् गुरुदेवतान् एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो पितुः पुत्राय यद्द्वे
षो मरणाय प्रयोजितः ४६ इति श्रीभागवते सप्तमस्कंधे चतुर्थोऽध्यायः श्रीनारद उवाच ॐ पौरोहि॰
त्याय भगवान् वृतः काव्यः किलासुरैः षंडामर्कौ सुतौ तस्य दैत्यराजगृहांतिके १ तौ राज्ञा प्रापितं बा
लं प्रह्लादं नयकोविदम् पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् २ यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनुप
पाठ च न साधु मनसा मेने स्वपरासद्ग्रहाश्रयम् ३ एकदासुरराट् पुत्रमंकमारोप्य पांडव पप्रच्छ क॰
थ्यतां वत्स मन्यते साधु यद्भवान् ४ प्रह्लाद उवाच तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियाम
सद्ग्रहात् हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ५ राम राम॰

द्भक्तिरेव विद्वेषकारणमिति वक्तुमाह पौरोहित्यायेत्यादिना। काव्यः शुक्रः। अतस्तस्य सुतौ तत्र न्यवसतामिति शेषः १ पा
ठ्यान् दंडनीत्यादीन् पाठ्यानसुरबालकांश्चेत्यन्वयः २ अनुश्रवणानंतरं तथैव पपाठ च किंतु तत्साधु मेने न। तत्र हे
तुः स्वपर इत्यसद्ग्रहो मिथ्याभिनिवेश एवाश्रयो यस्य तत् ३ ४ हे असुरवर्य असद्ग्रहात् अहं ममेति मिथ्याभिनिवेशा
द्धेतोः सम्यगुद्विग्ना धीर्येषां वनं गतः सन् हरिमाश्रयेतेति यत् तदेवाहं साधु मन्ये। कथंभूतं गृहं हित्वा आत्मनः पात
मधः पातनिमित्तं कूपमिवांधकूपवन्महामोहावहं ॥५॥

परपक्षेविस्रोसमाहिताः परिनिष्ठिताः हासमेवाह बुद्धिरिति ६ विष्णुपक्षैर्भगवतैर्द्वैतभूतैः नतुत्वद्गृहेकुतस्तेषां
प्रवेशः॥सत्यं॥तथापिप्रतिच्छन्नैर्वैषांतरेणच्छन्नैः ७ दैत्यैर्गृहमानीतं ८ बालान्सर्वान्अतिअतिक्रम्यतत्भ्यतव॥९॥१०॥अ
होमायामोहिताभवंतोमामाहिर्पंतीत्याशयेनतावदाह॥परःस्वश्चेति,मिथ्याभिनिवेशोयदीययामायये वहतः

नारदउवाच श्रुत्वापुत्रगिरोदैत्यःपरपक्षसमाहिताः जहासबुद्धिर्बालानांभिद्यतेपरबुद्धिभिः
६ सम्यग्विचार्यतांबालोगुरुगेहेद्विजातिभिः विष्णुपक्षैःप्रतिच्छन्नैर्नभिद्येतास्यधीर्यथा ७ गृह
मानीतमाहूयप्रह्लादंदैत्ययाजकाः प्रशंस्यश्लक्ष्णयावाचासमपृच्छंतसामभिः ८ वत्सप्रह्लादभद्रं
तेसत्यंकथयमामृषा बालानतिकुतस्तुभ्यमेषबुद्धिविपर्ययः ९ बुद्धिभेदःपरकृतउताहोतेस्वतो
भवत् भण्यतांश्रोतुकामानांगुरूणांकुलनंदन १० प्रह्लादः॥परःस्वश्चेत्यसद्ग्राहः पुंसांयन्मा.
ययाकृतः विमोहितधियांदृष्टः तस्मैभगवतेनमः ११ सयदानुव्रतःपुंसांपशुबुद्धिर्विभिद्यते अ
न्यएषतथान्योहमितिभेदगतासती १२ श्रीराम राम राम.

नतुवास्तवः अतएवतयाविमोहितबुद्धीनांभवतामेवदृष्टः नतुममतस्मैअचिंत्यमायेश्वरायनमः ११ अहोकिमेत
त्प्रलपसिनवबुद्धिभेदोयतोजातस्तत्कथयेत्यादिप्रश्नः सनुतत्प्रसादादेवेत्युत्तरमाह सइतित्रिभिः सभग
वान्यदाअनुव्रतः अनुकूलोभवति तदापशूनामिवबुद्धिर्भेदगता असतीमिथ्याविषया,भिद्यते,भिन्ना
त्मनिष्ठाभवति १२ ॥

भेदस्यासत्त्वं दर्शयन्नाह स एष परमात्मैव स्वः पर इति च अविवेकिभिर्निरूप्यते युक्तं चैतत् यतो यस्य वर्त्मनि जिज्ञासा
यां ब्रह्मादयोपि मुह्यंतीति तत्र हेतुः दुरत्ययं दुर्घटमनुक्रमणं अनुचरितमनुवर्णनं च यस्य सः १३ ननु निर्विकारस्य
कथं मतिभेदकत्वं तत्राह यथा अयो लोहं आकर्षस्य अयस्कांतस्य समीपे स्वयमेव भ्रमति चेतसः चक्रपाणेः सन्निधिरे
व कुतो जातस्तत्राह॥ यदृच्छयेति कस्य तपोदानादेः फलमेतदिति न ज्ञायत इत्यर्थः १४ राजसेवक उवाचेति शेषः १५

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्माद
योह्येष भिनत्ति मे मतिम् १३ यथा भ्राम्यत्ययो ब्रह्मन् स्वयमाकर्षसन्निधौ तथा मे भिद्यते चेतश्चक्र उवाच
पाणेर्यदृच्छया १४ एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः तं निर्भर्त्स्याथ कुपितः सदीनो राजसेवकः १५
आनीयतामरे वेत्रमस्माकमयशस्करः कुलांगारस्य दुर्बुद्धेश्चतुर्थोस्योदितो दमः १६ दैतेय
चंदनवने जातोयं कंटकद्रुमः यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः १७ श्रीराम राम॰

वेत्रं कशा उपायानां मध्ये चतुर्थः दमो दंडः अस्य दुर्बुद्धेः उदित उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्यांगारवन्नाशहेतोः
१६ तत्कुतस्तत्राह दैतेया एव चंदनद्रुमाः तेषां वने अयं कंटकद्रुमतुल्यो जातः तदेवाह यस्य दैत्यवनस्य मू
लोन्मूलने परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितः नालमिवाचरत् यथा परशोः छेदकत्वे वृ १०
क्षादिनिर्मितो दंडः सहकारी तं विना छेदनासंभवात् तथायं विष्णोर्दैत्यमूलच्छेदे हेतुर्जात इत्यर्थः ॥१७ राम॰

इतितंप्रह्लादंभीषयन् धर्मार्थकामवर्गस्यप्रतिपादकंशास्त्रमध्यापयामास १८ ज्ञातंज्ञेयमुपायचतुष्टयंयेन तंज्ञात्वादैत्ये
द्रंप्रतिमात्रामृष्टंउद्वर्त्यस्थापितं २२ पादसेवनंपरिचर्या अर्चनंपूजा दास्यंकर्मणामर्पणं सख्यंतद्विश्वासादि आत्मनिवे
दनंदेहसमर्पणं यथाविक्रीतस्यगवाश्वादेर्भरणपालनादिचिंतानक्रियते तथादेहंतस्मैसमर्प्यतच्चिंतावर्जनमित्यर्थः
२३॥ इतिसर्वोक्तानिनवलक्षणानियस्याःसा अद्धातेनचेत्भगवति विष्णौ भगवतिविष्णौ भक्तिः

इतितंविविधोपायैर्भीषयंस्तर्जनादिभिः प्रह्लादंग्राहयामासत्रिवर्गस्योपपादनम् १८ ततएनंगुरु
ज्ञात्वाज्ञातज्ञेयचतुष्टयं दैत्येंद्रंदर्शयामासमातृमृष्टमलंकृतं १९ पादयोःपतितंबालंप्रतिनंद्याशिषासुरः प
रिष्वज्यचिरंदोर्भ्यांपरमामापनिर्वृतिम् २० आरोप्यांकमवघ्रायमूर्धन्यश्रुकलांबुभिः आसिंचन्विकसद्वक्त्र
मिदमाहयुधिष्ठिर २१ हिरण्यकशिपुरुवाच ॐ प्रह्लादानूच्यतांतातस्वधीतंकिंचिदुत्तमम् कालेनैताव
तायुष्मन्यदशिक्षद्गुरोर्भवान् २२ प्रह्लादउवाच श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनम् अर्चनंवंद
नंदास्यंसख्यमात्मनिवेदनम् २३ इतिपुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणा क्रियतेभगवत्यद्धातन्म
न्येधीतमुत्तमम् २४ निशम्यैतत्सुतवचोहिरण्यकशिपुस्तदा गुरुपुत्रमुवाचेदंरुषाप्रस्फुरिता
धरः २५ ब्रह्मबंधोकिमेतत्तेविपक्षंश्रयतासता असारंग्राहितोबालोमामनादृत्यदुर्मते २६ ॥

क्रियते साचअर्पितैवसतीयदिक्रियते नतुकृतासतीपश्चादर्प्यते तदुत्तममधीतंमन्ये नत्वस्मा
द्गुरोरधीतंशिक्षितंवा तथाविधंकिंचिदस्तीतिभावः २४ २५ २६ श्रीराम राम

मित्रत्वेनवर्तमानस्यापितवविरोधाचरणंनासंभावितमित्याह संतिहीति दुर्हृं मैत्रंमित्रत्वंयेषांते रोगइति ब्रह्महत्या
यरोगीस्यात्सुरापःश्यावदंतकः स्वर्णहारीतुकुनखीदुश्चर्मागुरुतल्पगइत्यादिस्मरणुक्तः पातकिनोरोगोयथोदेति
तथातेषांविद्वेषादिकमुदेतीत्यर्थः २७ मन्त्रणीतंमयापाठितंनोस्मभ्यं कुतऊत्थितंदोषंमास्मअदाः अडागमआर्षः ॥

संतिह्यसाधवोलोकेदुर्मैत्राश्छद्मवेषिणः तेषामुदेत्यघंकालेरोगःपातकिनामिव २७ गुरुपु
त्रउवाच नमत्प्रणीतंनपरप्रणीतंसुतोवदत्येषतवेंद्रशत्रो नैसर्गिकीयंमतिरस्यराजन्नियः
च्छमन्युंकदद्याःस्ममानः २८ नारदउवाच गुरुणैवंप्रतिप्रोक्तोभूयआहासुरःसुतं नचेद्गु
रुमुखीयंतेकुतोभद्रासतीमतिः २९ प्रह्लादउवाच मतिर्नकृष्णेपरतःस्वतोवामिथोभिपद्येत
गृहव्रतानाम् अदांतगोभिर्विशतांतमिस्रंपुनःपुनःचर्वितचर्वणानाम् ३० श्रीराम ॥

मयिदोषारोपंमाकुर्याइत्यर्थः इंद्रशत्रोइतिनहिब्राह्मणेषुतवकोपउचितइतिभावः २८ गुरुमुखीगुरुवाक्य
जनिता हेभद्र २९ आस्तामियंवार्ताभवादृशानांविषयासक्तानामनधिकारादित्याशयेनाह मतिरिति परतःगुरोःस्वतोवा
मिथोवाअन्योन्यतः नाभिपद्येतनसंपद्येत केषांगृहएवव्रतंसंकल्पइतिकृत्यचिंतायेषां अतएवअदांतैरनुपरतैर्गोभि १८
रिंद्रियैर्हेतुभूतैः तमिस्रंसंसारंविशतांतत्रचर्वितस्यैवचर्वणंयेषां ३० श्रीराम श्रीराम॥

ननु श्रीकृष्णस्यपरमानंदरूपत्वात्तेपितन्निष्ठाएवकिंनस्युः तदज्ञानादित्याह नेति येदुराशयाः विषयवासितांतःकरणाः
तेहिविष्णुंनविदुः स्वस्मिन्नेवार्थःपुरुषार्थःयेषांतेषांगतिंगम्यं ननुतेपिगुरूपदेशाद्विदुःस्युस्तत्राह बहिर्विषये
ष्वर्थोयेषांतेबहिरर्थास्तानेववस्तुत्वेनमंतुंशीलंयेषांते अतअंधैरुपनीयमानाअंधायथापंथानंनविदुः किंतुगर्तेपतंतितथा
तेपिईशस्यतंत्र्यांदीर्घरज्ज्वांवेदलक्षणायां उरूणिदामानि ब्राह्मणादिनामानियस्यांतस्यां काम्यैःकर्मभिः बद्धाएवभवं
तीत्यर्थः तदुक्तं विषयाविष्टचित्तानांविष्ण्वावेशःसुदूरतः वारुणीदिग्गतंवस्तुव्रजन्नैंद्रींकिमाप्नुयादिति ३१ ननुचएको

नतेविदुःस्वार्थगतिंहिविष्णुंदुराशयायेबहिरर्थमानिनः अंधायथांधैरुपनीयमानावाचीशतंत्र्यामुरु-
दाम्निबद्धाः ३१ नैषांमतिस्तावदुरुक्रमांघ्रिंस्पृशत्यनर्थापगमोयदर्थः महीयसांपादरजोभिषेकंनिःकिं
चनानांनवृणीतयावत् ३२ इत्युक्त्वोपरतंपुत्रंहिरण्यकशिपूरुषा अंधीकृतात्मास्वोत्संगान्निरस्यत
महीतले ३३

देवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्माइत्यादिश्रुतिप्रतिपादितंविष्णुंकथंनविदुःअतोवातेषांतमिस्रप्रवेशः
तत्राह नैषामिति निष्किंचनानांनिरस्तविषयाभिमानानांपादरजसामभिषेकंयावन्नवृणीततावत्श्रुतिवाक्यतोज्ञाता
पिएषांमतिरुरुक्रमस्यांघ्रिंनस्पृशतिनप्राप्नोति असंभावनादिभिर्विहन्यतइत्यर्थः अनर्थस्यसंसारस्यापगमोय
दर्थः यस्यांघ्रिस्पर्शिन्याःमतेरर्थःप्रयोजनं महदनुग्रहाभावान्नतत्त्वनिश्चयोनापीहमोक्षःतेषामित्यर्थः ॥
३२ ॥ निरस्यतनिरास्यत्चिक्षेप ३३ ॥

श्री॰ भा॰ स॰ टी॰ १९

अमर्षो सहनं तेन सहितया रुषा आविष्टो व्याप्तः कषायीभूते आताम्रे लोचने यस्य हे नैर्ऋताः राक्षसाः ३४ वध्यत्वे हेतुः यतोयं मे
भ्रातृहा कुतो यो विष्णोः पादावर्चति तत्पक्षपातीत्यर्थः अतः स एवायमित्यन्वयः ३५ अहो विष्णुरप्यविश्वसनीयं किमि(प्रह्लादं)
ति स्वीकृतवानित्याह ॥ विष्णोर्वेति अहो तज्ज्ञो ३६ ननु तवायमपत्यं च कथं वध्यः तत्राह परोप्यौषधमिव हितकृच्चे
त् तदपत्यमेव ज्ञेयं स्वतः स्वदेहजोपि अहितः चेत् आमय इव आस्तां मम तासद्दस्यकथा अंगमपि यत्करचरणादि तद्

आहामर्षरुषाविष्टः कषायीभूतलोचनः वध्यतामाश्वयं वध्यो निःसार्यतां नैर्ऋताः ३४ अयं मे भ्रातृहा
सोयं हित्वा स्वान् सुहृदोधमः पितृव्यहंतुर्यः पादौ विष्णोर्दासवदर्चति ३५ विष्णोर्वा साध्वसौ किं नु करिष्य
त्यसमंजसः सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ३६ परोप्यपत्यं हितकृद्यथौषधं स्वदेहजोप्या
मयवत्सुतोहितः छिंद्यात्तदंगं यदुतात्मनोहितं शेषं सुखं जीवति यद्विवर्जनात् ३७ सर्वैरुपा
यैर्हंतव्यः संभोजशयनासनैः सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियं ३८ नैर्ऋतास्ते समादिष्टा भर्त्रा वै
शूलपाणयः तिग्मदंष्ट्रकरालास्याः ताम्रश्मश्रुशिरोरुहाः ३९ नदंतो भैरवान्नादांश्छिंधि भिंधीति
वादिनः आसीनं चाहनन् शूलैः प्रह्लादं सर्वमर्मसु ४०

प्यात्मनोहितं चेत् छिंद्यादेवेत्यर्थः ३७ अतः सर्वैरुपायैर्हंतव्यः संभोजो भोजनं भोजनादिषु विषादिप्रयोगैरित्यर्थः ॥
यथा दुष्टमिंद्रियं मुनेः शत्रुः ३८ तिग्मा तीक्ष्णा दंष्ट्रा येषां करालानि आस्यानि येषां ते च ते च ताम्राणि श्मश्रू १९
णि शिरोरुहाश्च येषां ३९ ४० श्रीरामाय नमः श्रीराम ॥

परेईश्वरेयुक्तः समाहितआत्मामनोयस्यतस्मिन्तेषांप्रहारानिष्फलाजाताः तत्रहेतवः ब्रह्मणिनिर्विकारेअनिर्देश्ये
अविषयेभगवतिनिरतिशयैश्वर्ये अखिलात्मनिशस्त्रादीनामपिनियंतरि एवंभूतेपरे अपुण्यस्यनिर्दैवस्यसत्क्रियाम
ोघाइव ४१ ४२ ॥ अभिचाराःकृत्यादयः अवपातनानिगिरिशृंगादयः तेभ्यःपातनानितैः अवटादिषुसंनि
रोधैश्च ४३ पर्वताक्रमणैःपर्वतानांउपरिक्षेपैः बहुवचनैरभिचाराद्यावृत्तिंदर्शयति तत्हननंकर्तुंनाभ्य

परेब्रह्मण्यनिर्देश्येभगवत्यखिलात्मनि युक्तात्मन्यफलाआसन्नपुण्यस्येवसत्क्रियाः ४१ प्रयासेप-
हतेतस्मिन्दैत्येंद्रःपरिशंकितः चकारतद्वधोपायान्निर्बंधेनयुधिष्ठिर ४२ दिग्गजैर्दंदशूकेंद्रैर
भिचारावपातनैः मायाभिःसंनिरोधैश्चगरदानैरभोजनैः ४३ हिमवाय्वग्निसलिलैःपर्वताक्रमणैर
पि नशशाकयदाहंतुमपापमसुरःसुतं ४४ चिंतांदीर्घतमांप्राप्तःतत्कर्तुंनाभ्यपद्यत ४४ एष
मेबह्वसाधूक्तोवधोपायाश्चनिर्मिताः तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तःस्वेनैवतेजसा ४५ वर्तमानोऽविदूरेवै-
बालोप्यजडधीरयम् नविस्मरतिमेनार्यंशुनःशेपइवप्रभुः ४६ ॥ श्रीराम राम॥

पद्यतनप्रापनाशक्नोदित्यर्थः ४४ चिंतामेवाहएषइतिविभिर्मेमयाअसाधुपरुषंयथाभवतितथोक्तः असद्धर्मैरप
कारैरभिचारैर्वा ४५ अविदूरेवर्तमानोपिबालोप्ययंअजडधीः निर्भयचित्तः मेअनार्यमन्याय्यंशत्रुत्वंवानविस्मरति अ
जीगर्तस्यमध्यमपुत्रः शुनःशेफोनामपितृभ्यांहरिश्चंद्रायविक्रीतः सयथातयोरपकारमविस्मरंस्तद्विपदंवि
श्वामित्रमाश्रित्यगोत्रांतरमापन्नः तद्वत् यद्वा स्वभावापरित्यागेदृष्टांतः शुनःशेफः प्रभुमिवेति ४६ ॥

अप्रमेयः अपरिमेयोनुभावोयस्य नकुतश्चिद्भयंयस्य नवाभविता अन्यथामृत्युर्नैवभविष्यतीत्यर्थः ४७ औशनसौउशन
सःपुत्रौनीतिज्ञौविविक्तेएकांते ४८ भ्रुवोर्विजृंभणेनैवत्रस्ताःसमस्ताधिष्ण्यपायस्मिन् तस्यचिंत्यंनचक्ष्महेनपश्यामः
पदमालंबनंनास्ति यद्वा शिशूनांहृत्तंगुणदोषयोःपदंविषयोनभवतीत्यर्थः ४९ तथापितद्बंधनमस्योचितमित्याहतुः।

अप्रमेयानुभावोयमकुतश्चिद्भयोमरः नूनमेतद्विरोधेनमृत्युर्मेभवितानवा ४७ इतितंचिंतयाकिंचि
न्म्लानश्रियमधोमुखं षंडामर्कावौशनसौविविक्तइतिहोचतुः ४८ जितंत्वयैकेनजगत्त्रयंभ्रुवोर्विजृं
भणत्रस्तसमस्तधिष्ण्यपं नतस्यचिंत्यंतवनाथचक्ष्महेनवैशिशूनांगुणदोषयोःपदं ४९ इमंतुपाशै
र्वरुणस्यबद्ध्वानिधेहिभीतोनपलायतेयथा बुद्धिश्चपुंसोवयसार्यसेवयायावद्गुरुर्भार्गवआग
मिष्यति ५० तथेतिगुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् धर्मोह्यस्योपदेष्टव्योराज्ञांयोगृहमेधिनां धर्मम
र्थंचकामंचनितरांचानुपूर्वशः ५१ प्रह्लादायोचतुःराजन्प्रश्रयावनतायच यथात्रिवर्गंगुरुभि
रात्मनेउपशिक्षितम् नसाधुमेनेतच्छिक्षांद्वंद्वारामोपवर्णिताम् ५२ श्रीराम राम

इमंत्विति। यावद्गुरुरागमिष्यतितावद्बद्ध्वानिधेहि ततःकिंअतऊचतुः बुद्धिश्चसमीचीनावयसाभवतीति ५० अनुज्ञाय,तथे
त्यंगीकृत्य ५१ ततश्चतौप्रह्लादायधर्मादिकमूचतुः प्रश्रितश्चासौअवनतश्चतस्मैयथावत्त्रिवर्गमनुशिक्षि
तमपिसाधनमेनेतांशिक्षांच कुतः द्वंद्वेरागद्वेषादिभिर्विषयेष्वारमणंयेषांतैरुपवर्णितां ५२ श्रीराम ॥

परावृत्तः अन्यत्रगतः स उपहूतः संधिः पादहरणार्थः क्रीडार्थे कृतक्षणैः कृतोत्सवैर्लब्धावसरैरिति वा ५३ तेषां
निष्ठां जन्ममरणादिलक्षणां विद्वान् ५४ द्वंद्वारामाणामीरितैरीहितैश्चानदूषिताधीर्येषां यतो बालाः ५५ तस्मिन्नेवन्य
स्तहृदयमीक्षणंच तैः ५६ ॥ इति श्रीभावार्थदीपिकायां सप्तमे पंचमोध्यायः ५ ॥ षष्ठे गर्भगृहव्यग्रे प्रह्लादो दै
त्यबालकान् अनुकंप्यपरं तत्त्वं नारदोक्तमुपादिशत् ॥ निरर्थकक्रियालापैरायुर्व्ययमजानतां प्रह्लादः सदयं

यदाचार्यः परावृत्तो गृहमेधीयकर्मसु वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ५३ अथ तान्
श्लक्ष्णया वाचा प्रत्याहूय महाबुधः उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ५४ ते तु तद्गौरवात्सर्वे त्य
क्तक्रीडापरिच्छदाः बाला अदूषितधियो द्वंद्वारामेरितेहितैः ५५ पर्युपासत राजेंद्र तन्न्यस्तहृदये
क्षणाः तानाह करुणो मैत्रो महाभागवतोऽसुरः ५६ इति श्रीभागवते महापुराणे सप्तमस्कंधे
पंचमोध्यायः ॥ ५ ॥ प्रह्लाद उवाच ॐ कौमार आचरेत्प्राज्ञो धर्मान् भागवतानिह दुर्लभं मानुषं
जन्म तदप्यध्रुवमर्थदं ॥१॥ यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् यदेष सर्वभूतानां प्रिय आत्मेश्वरः सु
हृत् २

प्राह धर्मं भागवतं कृती ॥ कौमार इत्यादिना ॥ इहैव मानुषजन्मनि धर्मानाचरेत् यतोऽर्थदमेतत् तत्र कौमार एव यतः तदप्यध्रु
वं न चैवंभूते जन्मांतरे यतः दुर्लभं तत्र धर्मानेवाचरेत् न तु स्वार्थप्रयासान् भागवतानेव न काम्यान् तत्र भागवतानेव
धर्मानाचरेदित्येतदुपपादयति यथा हीति चतुर्भिः इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथा प्रत्ययं योग्य
मित्यर्थः यद्यस्मात् एष प्रिय इत्यादि २॥

भोगोद्यमः कथं त्याज्य इति चेत्तत्राह सुखमिति सर्वत्र पश्वादावपि दैवात् सर्वोद्यमाद्देव ३ अतस्तदर्थं प्रयासो न कर्तव्यः यतः
प्रयासात्परं केवलमायुषो व्यय एव यतः तथापि तेन प्रकारेण क्षेमं न प्राप्नोति ४ भयमाश्रितः संसारं प्राप्तः पुरुषरूपं शरी
रं यावत्पुष्कलमस्ति न विपद्येत अत्र क्षेमं न भवेत् न नश्येदिति वा तावच्छीघ्रं क्षेमाय यतेत उक्तं च यावत्स्वस्थमिदं शरी
रमजरं यावज्जरा दूरतो यावच्चेंद्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः आत्मश्रेयसि तावदेव विदुषः का

सुखमैंद्रियकं दैत्या देहयोगेन देहिनां सर्वत्र लभते दैवाद्यथा दुःखमयत्नतः ३ तत्प्रयासो न कर्तव्यो यत
आयुर्व्ययः परं न तथा विंदते क्षेमं मुकुंदचरणांबुजम् ४ ततो यतेत कुशलः क्षेमाय भयमाश्रितः शरी
रं पौरुषं यावन्न विपद्येत पुष्कलं ५ पुंसो वर्षशतं ह्यायुस्तदर्द्धं चाजितात्मनः निष्फलं यदसौ रात्र्यां शेतेंधं प्रा
पितस्तमः ६ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥७॥
दुरापूरेण कामेन मोहेन च बलीयसा शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ८ को गृहेषु पुमान्सक्त
मात्मानमजितेंद्रियः स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुं ९ को न्वर्थतृष्णां विसृजेत्प्राणेभ्योपि य ईप्सि
तः यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् १० ॥

र्यः प्रयत्नो महान् संदीप्ते भवने च कूपखननप्रत्युद्यमः कीदृशः ॥ आयुर्व्ययक्रममाह पुंस इति त्रिभिः यद्यस्मात् शेते ६ विंशतिर्व
र्षाणि आयुर्याति ७ दुरापूरेण दुःखैः समंतात्पूर्यमाणेन ८ ननु यौवने गृहासक्तोपि पश्चाद्विरक्तः सन् क्षेमं यास्यतीत्याशंक्याह तद
संभवं दर्शयन् कौमार एवाचरेदित्येतदुपपादयति को गृहेष्विति सप्तभिः ९ अर्थं असुभिः क्रीणाति प्राणहानिमंगीकृत्यापि त
स्करादिरर्थं साधयति तस्मिन्नर्थे तृष्णां को नु विसृजेत् १० ॥

किंच कथमित्यादि प्रियायाः संगादिकं स्मरन् कथं त्यजेदिति तृतीयेनान्वयः मंत्रान् हितशिक्षालापान् सुहृत्सु च संगे तेषां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां च संगे तेष्वनुरक्तं चित्तं यस्य ११ ताः स्वश्वशुरगृहे स्थिताः हृदय्याः हृदयंगमाः मनोज्ञा उरवः परिच्छदाः येषु तान् हत्तीर्जीविकाः कुल्याः कुलपरंपरागताः १२ कोशस्कृत् कोशस्कारी कीटः स यथा गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि नावशेषयति तथा कर्माणीहमानः नन्वित्तप्रकामोपि दोषदर्शनेन विरक्तः सन् त्यजेत् त

कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनु
रक्तचित्तः ११ पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ गृहान्मनोज्ञोरुपरिच्छदां
श्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् १२ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः औप
स्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरंतमोहः १३ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेर्थं विहतं प्र
मत्तः सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरामः १४ राम राम

त्राह औपस्थ्यं च शैश्न्यं जैह्व्यं च सुखं तदेवाधिकं मन्यमानः अतो दुरंतो मोहो यस्य सः कथं विरज्येत् विरक्तः स्यात् १३॥ दुरंतमोहत्वं दर्शयन्नाह कुटुंबपोषणाय वियत्क्षीयमाणं निजमायुः पुरुषार्थं च विहतं न बुध्यते अत एव तापत्रयेण दुःखितचित्तोपि न निर्विद्यते दुःखबुद्धिं न करोति यतः स्वकुटुंबे रामो रतिर्यस्य १४ राम राम

श्रीरामाय नमो नमः श्रीकृष्णचंद्रचरणे रमतां मनो मे ॥ श्रीराम राम राम ॥

श्री॰
भा॰
स्क॰
टी॰
२२

प्रस्तुतचौर्यंकरोतीत्याह वित्तेष्विति नित्यमभिनिविष्टंचेतोयस्यसः परवित्तहर्तुः प्रेत्यनरकलक्षणं इहच पीडादिरूपंदोषंय
द्यपिविद्वान् अप्राप्यप्रशांताभिलाषः सन्परवित्तंहरत्येव १५ तदेवंकोरक्षेषुमानित्यादिसप्तभिः श्लोकैरुपपादितंस्त्र
यादिषुप्रसक्तस्यवैराग्याद्यसंभवमुपसंहरति विद्वानपीति स्वलोकायात्मपरामर्शायनकल्पते किंतुविमू[illegible]यथातथाविद्वा
नपि तमः अभिनिवेशमेवप्रपद्यते तत्रहेतुः यइति स्वीयमिदंपारक्यमिदमितिभिन्नोभावोभावनायस्यसः १६ तस्मात्कौ

वित्तेषुनित्याभिनिविष्टचेताविद्वांश्चदोषंपरवित्तहर्तुः प्रेत्येहचाथाप्यजितेंद्रियस्तदशांतकामोहरतेकु॰
टुंबी १५ विद्वानपीत्थंदनुजाः कुटुंबंपुष्णन्स्वलोकायनकल्पतेवै यःस्वीयपारक्यविभिन्नभावस्तमःप्रपद्ये
तयथाविमूढः १६ यतोनकश्चित्क्वचकुत्रविद्वान्दीनःस्वमात्मानमलंसमर्थः विमोचितुंकामदृशांविहा
रक्रीडामृगोयन्निगडोविसर्गः १७ ततोविदूरात्परिहृत्यदैत्यादैत्येषुसंगंविषयात्मकेषु उपेतनाराय
णमादिदेवंसमुक्तसंगैरिषितोपवर्गः १८
राम राम राम

मास्म[illegible]वभागवतान्धर्मानाचरेदितिसहेतुकमुपसंहरति यतःकश्चिदपिस्वमात्मानंमोचितुंनसमर्थः ततःनारायण
मुपेतशरणंयातेत्युत्तरेणान्वयः असामर्थ्येहेतुः अलंदीनोलंपटः अतःकामोदृशियासांतासांविहारेक्रीडायांनिमित्ते
क्रीडामृगाः विहारमितिपृथक्पाठे तासांविहारसाधनमात्मानं यतस्तासांक्रीडामृगः सइत्यन्वयः किंचयत्यास्तु
निगडःशृंखलातुल्योविसर्गः पुत्रादिरूपोभवति १७ विदूराद्दूरतःसंगंपरिहृत्य यद्वा अविदूरात्शीघ्रंनारायण २२
मुपेतेत्यन्वयः यस्मात्सएवापवर्गइषितइष्टः १८ श्रीराम राम राम

बालानामस्माकं तद्भजनमशक्यमिति चेत्तत्राह नहीति बह्वायासः अतिप्रयासः १९ आत्मत्वात्सर्वत्र सिद्धत्वादिति च।
हेतुद्वयमुपपादयति परावरेष्विति चतुर्भिः ॥ ब्रह्मान्ता ये स्थावराद्या येषां तेषु जीवेषु भौतिकेषु अजीवेषु घटा
दिषु महत्सु च भूतेष्वाकाशादिषु २० गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्त्वादौ च परः ब्रह्मस्वरूपः २१ कथं
तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदः मायेत्याह प्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः १९
परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु भौतिकेषु विकारेषु भूतेष्वथ महत्सु च २० गुणेषु गुण
साम्ये च गुणव्यतिकरे तथा एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः २१ प्रत्यगात्मस्वरूपेण
दृश्यरूपेण च स्वयं व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः २२ केवलानुभवा
नंदस्वरूपः परमेश्वरः माययान्तर्हितैश्वर्य ईयते गुणसर्गया २३ तस्मात्सर्वेषु भूतेषु दयां।
कुरुत सौहृदम् आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः २४ राम राम।

भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ईयत इत्युत्तरेणान्वयः ॥ वस्तुतस्तु स्वयं अविकल्पितो निर्देश्योपि स्व
यद्वा अनिर्देश्योपि एवं निर्देश्यः सद्विकल्पित ईयत इत्यन्वयः २२ यतः केवलोऽनुभवात्मक आनंद एव स्वरूपं यस्य
ननु स एव चेत्सर्वत्र तर्हि सर्वत्र सर्वज्ञत्वाद्युपलभ्येत तत्राह गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया मायया
अंतर्हितमैश्वर्यं येन सः २३ यस्मादेवं तस्मात्सर्वेषु यथोचितं दयां कुरुत यया दयया उन्मुच्य संतुष्यति २४ राम

सौहृदं च

श्री॰ भा॰ स॰ टी॰ २३

ततःकिमतआह तुष्टेचतत्रतस्मिन्किमलभ्यं तथापिगुणपरिणामाद्दैवादेवस्वसिद्धाअयत्नतःसिद्धायेधर्मादयःतैःकिं
अगुणेनचमोक्षेणकांक्षितेनकिंतमुपगायतांनोस्माकमकांक्षितस्यापितस्यसिद्धेः यद्वा माभून्मोक्षः तस्यचचरणयोः
सारंजुषांसुखंसेवमानानांतेनापिकिमित्यर्थः २५ ननुचधर्मादेरपुरुषार्थत्वेकिमित्याचार्यैर्वेदोक्तत्वेन सत्यएवा॰
भिहितः तत्राह धर्मार्थःकामश्चेतियस्त्रिवर्गःतदर्थंचयाईक्षाद्याअभिहिता ईक्षाआत्मविद्यात्रयीकर्मविद्या नयदमौ

तुष्टेचतत्रकिमलभ्यमनंतआद्येकिंतैर्गुणव्यतिकरादिहयेस्वसिद्धाः धर्मादयःकिमगुणेनचकां
क्षितेनसारंजुषांचरणयोरुपगायतांनः २५ धर्मार्थकामइतियोभिहितस्त्रिवर्गईक्षात्रयीनयद
मौविविधाचवार्ता मन्येतदेतदखिलंनिगमस्यसत्यंस्वात्मार्पणंस्वसुहृदःपरमस्यपुंसः ॥
२६ ॥

तर्कोदंडनीतिश्चविविधाचवार्ताजीविकातदेतत्सर्वंनिगमस्यार्थजातं स्वसुहृदः स्वांतर्यामिणःपरस्यपुंसः स्वात्मार्प
णसाधनंचेत्तर्हिसत्यंमन्येसत्यपरत्वात् अन्यथातदसत्यमेव यद्वा तदेतदखिलंनिगमस्यत्रैगुण्यविषयस्यप्रति
पाद्यंमन्ये सत्यं पुनःनिस्त्रैगुण्यलक्षणंपरमस्यपुंसः स्वात्मार्पणमेवेत्यर्थः तदुक्तंभगवता ॥ त्रैगुण्यवि
षयावेदानिस्त्रैगुण्योभवार्जुनेति ॥ २६ ॥ ॥ श्रीरामायनमः श्रीराम राम॰ २३

तेषांविश्वासार्थंगुरुसंप्रदायमाह ज्ञानमिति यत्रनारदः श्रोतातत्रकुतोमादृशानामधिकारइतिमाशंकतेत्याह भग
वतएकांतभक्तानांयत्पादरजः तेनआप्लुतानांस्नातानांदेहिनांसर्वेषामपितज्ज्ञानंस्यात् नतुउत्तमानामेवेतिनियमः॥
२७ अतएवमयापिनारदात्श्रुतंविज्ञानसंयुतंमत्तुभवपर्येतंधर्मंचश्रुतं २८ तत्रातिविस्मिताः पृच्छंति प्रह्लादेति ॥

ज्ञानंतदेतदमलंदुरवापमाह नारायणोनरसखः किलनारदाय एकांतिनांभगवतस्तदकिंचना
नांपादारविंदरजसाप्लुतदेहिनांस्यात् २७ श्रुतमेतन्मयापूर्वंज्ञानंविज्ञानसंयुतं धर्मंभागवतंशु
द्धंनारदाद्देवदर्शनात् २८ दैत्यपुत्राऊचुः प्रह्लादत्वंवयंचापिनर्तेऽन्यंविद्महेगुरुं एताभ्यांगुरुपु
त्राभ्यांबालानामपिहीश्वरौ २९ बालस्यांतःपुरस्थस्यमहत्संगोदुरन्वयः छिंधिनःसंशयं
सौम्यस्याच्चेद्विस्रंभकारणम् ३० इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेषष्ठोऽध्यायः ६ ॥

श्रीरामचंद्रायनमः ॥

एताभ्यामृतेऽन्यंगुरुंनविद्मः एतदागमनात्पूर्वमेवाहंनारदपार्श्वेगतइतिचेत्तत्राहुः बालानामपिअतिशिष्ट
नामस्माकमेतावीश्वरौनियंतारौ अतस्तवान्यत्रगमनंनसंभवति २९ सएवात्रागतइत्यपिनसंभवतीइ
त्याहुः बालस्येति दुरन्वयःदुर्घटः विस्रंभकारणं विश्वासहेतुः ३० इतिश्रीभागवतेमहापु
राणेभावार्थदीपिकायांसप्तमस्कंधेषष्ठोऽध्यायः ६ श्रीरामचंद्रायनमः ॥ श्रीराम·

सप्तमेमातृगर्भस्थेस्वस्मिन्नारदभाषितं प्रह्लादोवर्णयामासशिष्यप्रत्ययसिद्धये १ अश्राविनारदादेतन्मयागर्भइतीरितुम्
तत्प्रस्तावकथामाह पद्यैःषोडशभिःसुधीः अस्माकंपितरिहिरण्यकशिपौ॥२॥ स्वकृतेनैवपापेनपापोसौ अभक्षिभक्षि
तइतिहर्षेणवदंतोयुद्धोद्यमंचक्रुः ३ ५ राज्ञःशिबिरंआवासंव्यलुंपन् सर्वस्वापहारेणनाशितवंतः ६ ७ अना

नारदउवाच ॥ एवंदैत्यसुतैःपृष्टोमहाभागवतोसुरः उवाचस्मयमानस्तान्स्मरन्मदनुभाषि
तम् १ प्रह्लादउवाच पितरिप्रस्थितेस्माकंतपसेमंदराचलं युद्धोद्यमंपरंचक्रुर्विबुधादानवा
न्प्रति २ पिपीलिकैरहिरिवदिष्ट्यालोकोपतापनः पापेनपापोभक्षीतिवादिनोवासवादयः ३ तेषाम
तिबलोद्योगंनिशाम्यासुरयूथपाः वध्यमानाःसुरैर्भीताद्रुद्रुवुःसर्वतोदिशं ४ कलत्रपुत्रमित्राप्ता
न्गृहान्पशुपरिच्छदान् नावेक्ष्यमाणास्त्वरिताःसर्वेप्राणपरीप्सवः ५ व्यलुंपन्राजशिबिरं
अमराजयकांक्षिणः इंद्रस्तुराजमहिषींमातरंममचाग्रहीत् ६ नीयमानांभयोद्विग्नांरुदतींकुर
रीमिव यदृच्छयागतस्तत्रदेवर्षिर्ददृशेपथि ७ प्राहनैनांसुरपतेनेतुमर्हस्यनागसम् मुंचमुंच
महाभागसतींपरपरिग्रहं ८ इंद्रउवाच आस्तेस्याजठरेवीर्यमविषह्यंसुरद्विषः आस्यतांयावत्प्र
सवंमोक्ष्येर्थपदवींगतः ९ श्रीनारद॰ अयंनिःकिल्बिषःसाक्षान्महाभागवतोमहान् त्वयानप्राप्स्यतेसंस्था

गसंनिरपराधामेनांनेतुंनार्हसीतिप्राह ८ अविषह्यंदुःसहं अतः अनयाप्रसवपर्यंतमत्रास्यतां ततश्चअर्थस्यपदवींमार्गं
गतःप्राप्तःसन्जातंपुत्रंहत्वामोक्ष्यामीत्यर्थः ९ साक्षात्स्वगुणैरेवमहान् नतुपित्रादिसंबंधात् त्वयाहेतुभूतेन
संस्थांमृत्युंनयास्यति तत्रहेतवोनिःकिल्बिषइत्यादयः १०

अनंतस्य प्रियो योऽहं स वा प्रियो यस्य तस्य मम भक्त्या एनां प्रदक्षिणीकृत्य ११ इहोष्यतामित्याहेति शेषः १२ अंति
समीपे १३ अंतर्वत्नी गर्भिणी इच्छया भर्तुरागमनानंतरं प्रसूतये एवमपि स्वगर्भस्य क्षेमाय १४ तस्याः शोक-
शांत्यै धर्मस्य तत्त्वं भक्तिलक्षणं ज्ञानमात्मनात्मविवेकः तदुभयं प्रादात् ईश्वरः समर्थः १५ १६ भूयान् भवेत् ।

इत्युक्तां तां विहायेंद्रो देवर्षेर्मानयन्वचः अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ११ ततो नो मातरमृषिः
समानीय निजाश्रमम् आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः १२ तथेत्यवात्सीद्देवर्षेरंतिसाप्यकु-
तोभया यावद्दैत्यपतिर्घोरात्तपसो नन्यवर्तत १३ ऋषिं पर्यचरत्तत्र भक्त्या परमया सती अंतर्वत्नी स्व-
गर्भस्य क्षेमायेच्छाप्रसूतये १४ ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः धर्मस्य तत्त्वं ज्ञानं च मा-
मप्युद्दिश्य निर्मलं १५ तत्तु कालस्य दीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ऋषिणानुगृहीतं मां नाधुना-
प्यजहात्स्मृतिः १६ भवतामपि भूयान्मे यदि श्रद्दधते वचः वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे य-
था १७ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना १८ राम ॥

वैशारदी स्वार्थतद्धितः देहाद्यहंकारच्छेदनिपुणेत्यर्थः १७ कासौ वैशारदी धीरित्यपेक्षायां नारदोक्तमेव देहात्मविवे-
कप्रकारमाह जन्मेति दशभिः ॥ जन्माद्याः जायतेऽस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीत्येवंभूता इमे षड्भा-
वा विकाराः वृक्षे सत्येव यथा फलानां दृश्यंते तद्वदात्मनि तथैव स्थिते देहस्य दृष्टा इत्यर्थः ॥ ईश्वरावि-
क्षारसमर्था मूर्तिर्यस्य तेन १८ श्रीकृष्णचंद्रचरणे रमतां मनो मे ॥ श्रीराम ॥ राम

श्री॰ तदेवं देहधर्मैस्तद्वैलक्षण्येन आत्मनो देहात् भेदो दर्शितः इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदहंकारादिकं त्याज
भा॰ यति आत्मा नित्यः अविनाशी वा अरेऽयमात्मेति श्रुतेः अव्ययः अपक्षयशून्यः ऋचो अक्षरे परमे व्योमन्निति श्रु
स॰ तेः शुद्धः निरवद्यं निरंजनमिति श्रुतेः एकः एकमेवाद्वितीयमिति श्रुतेः क्षेत्रज्ञः विज्ञातारमरे केन विजा
टी॰ नीयादिति श्रुतेः आश्रयः यस्मिन्द्यौः पृथिवी चान्तरिक्षमिति श्रुतेः अविक्रियः निष्कलं निष्क्रियं शान्तमिति
२५

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः अविक्रियः स्वदृक् हेतुर्व्यापकोऽसंग्यनावृतः १९ ॥
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् २० स्वर्णं य
था ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्र
ह्मगतिं लभेत २१

श्रुतेः ॥ स्वदृक् आत्मज्योतिः सम्राडिति होवाचेति श्रुतेः ॥ हेतुः स इमांल्लोकानसृजतेति श्रुतेः व्यापकः सत्यं ज्ञानमनं
तमिति श्रुतेः असंगी असंगो ह्ययं पुरुष इति श्रुतेः अनावृतः पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते इति श्रुतेः १९ ॥
परैः श्रेष्ठैः विवेकसमर्थैर्देहादेर्विद्वान् असद्भावं मिथ्याबुद्धिं त्यजेत् २० नन्वेवं विविक्तात्मज्ञानिनोऽपि अपरोक्षानुभवे
न ब्रह्मताप्राप्तिः कथं स्यात् यतोऽहंकारादिकं त्यजेत् इत्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टान्तमाह ॥ स्वर्णमिति क्षेत्रेषु स्फुर
त्स्वर्णकणेषु ग्रावसु योगैर्धमनाद्युपायैस्तदुपायाभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् आत्मयोगैरात्मप्राप्त्युपाये
र्ब्रह्मगतिं ब्रह्मतां अध्यात्मवित् आत्माधिष्ठानकार्यकारणसंघातज्ञाता २१॥ २५

अध्यात्मविवेकमात्मप्राप्त्युपायमाह अष्टाविति त्रिभिः मूलप्रकृतिः महदहंकारौ पंचतन्मात्राणि चेत्यष्टौ त्रयः सत्त्वा दयः ते च प्रकृतिगुणा एव न तु भिन्नाः एकादशेंद्रियाणि पंच महाभूतानि चेति षोडश पुमानात्मा एकः प्रोक्तः कपिलादि भिराचार्यैः एकत्वे हेतुः एषु सात्त्विकेनान्वयात् तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडश कस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति २२ जगत् जंगमं तस्थुः स्थावरं अत्रैव सर्वसंघातात्मके देह एव मृग्यः अन्वे

अष्टौ प्रकृतयः प्रोक्ताः त्रय एव हि तद्गुणाः विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् २२ देह
स्तु सर्वसंघातो जगत्तस्थुरिति द्विधा अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् २३ अन्वयव्यति
रेकेण विवेकेनोशतात्मना सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४ राम राम॥

ष्टव्यः स्वरूपं च चैतदित्याह नेति नेतीत्यन्यापोहे क्रियमाणे स्वयमेव अतत्त्यजन् अनात्मवर्गान् पृथगुपल भ्यमान इत्यर्थः २३ मणिषु सूत्रमिव सर्वेषु तस्य सत्त्वेनान्वयः अत एव मणिभ्यः सूत्रस्येवैकैकं व्यतिरेकस्त तयोर्द्वैक्यं तेन यो विवेकः सर्वोक्तो वा तेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः स्थितिसृष्टिसंहा रैः ॥ यतो वा इमानि भूतानि जायंते इत्यादि श्रुत्युक्तसर्गाद्यनुसंधानेनेत्यर्थः विमृशद्भिर्विचारय द्भिः असत्वरैः अव्यग्रैर्मृग्यत इति सर्वेणान्वयः ॥२४ ॥ राम राम॥

श्रीकृष्णचंद्रचरणे रमतां मनो मे ॥ श्रीरामाय नमः श्रीराम राम राम॥

श्री. विमर्शप्रकारमाह बुद्धेरिति द्वाभ्यां ॥ अध्यक्षः साक्षी २५ अत एभिर्बुद्धेर्भेदैः परिणामैः पर्यस्तैः परितः क्षिप्तैः ।
भा. आत्मधर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात्
सु. कर्मकर्तृत्वाच्च तस्या एवैता अवस्थाः आत्मा बुद्ध्यन्वयात् तदवस्थावानिवाभाति न तत्त्वत इत्यात्मनः स्वरू
टी.
२९ पं बुद्ध्येत् जानीयादित्यर्थः अत्र दृष्टांतः कुसुमधर्मैर्गंधैस्तदाश्रयं वायुमिव २६ ननु तर्हि यथा कुसुमोपाधि

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः तायेनैवानुभूयंते सोध्यक्षः पुरुषः परः २५ एभिस्त्रिव
र्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः स्वरूपमात्मनो बुद्ध्येद्गंधैर्वायुमिवान्वयात् २६ एतद्द्वारो हि
संसारो गुणकर्मनिबंधनः अज्ञानमूलोपार्थोपि पुंसः स्वप्न इवार्प्यते २७ तस्माद्भवद्भिः कर्तव्यं
कर्मणां त्रिगुणात्मनां बीजनिर्हरणं योगः प्रवाहोपरमो धियः २८ श्रीरामायनमः राम.

कोपि वायोर्गंधो विवेकज्ञानेन निवर्तते एवमात्मनः संसारो न निवर्तेत इत्याशंक्याह एतद्द्वारः बुद्धिद्वारकस्त
दवस्थाद्वारको वा न स्वतः हि यस्मात् बुद्धेर्ये गुणाः कर्माणि च तैर्निबध्यते इति तथा सचाज्ञानमूलः अतो
पार्थो मिथ्याभूतोपि स्वप्न इवार्प्यते वायोस्तु गंधवद्द्रव्यसंबंधस्य वास्तवत्वाद्विषमो दृष्टांतः २७ ॥
यस्मादेवं निवृत्तिर्घटते तस्माद्बीजमज्ञानं तस्य निर्हरणं दहनं किं तत् योगः कथंभूतः धियः २९
प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा ॥ २८ श्रीराम राम राम राम.

तदेवंज्ञानप्रकारमुक्त्वातत्साधनंधर्मस्यतत्वंनारदोक्तमेवाह ॥ तत्रेतिपंचभिः ॥ यैर्यैर्धर्मैर्यथानुष्ठितैर्वारतिरितियत् अ
यंतुप्रायोभगवतोक्तः तथाहिगीतासु यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्व
मदर्पणमिति भक्त्यामामभिजानातियावान्यश्चास्मितत्वतइत्यादि २९ तत्रैवांतरंगान्धर्मानाह गुरोःशुश्रू

तत्रोपायसहस्राणामयंभगवतोदितः यदीश्वरेभगवतियथायैरंजसारतिः २९ गुरुशुश्रूषया ।
भक्त्यासर्वलब्धार्पणेनच संगेनसाधुभक्तानामीश्वराराधनेनच ३० श्रद्धयातत्कथायांचकीर्तनै
र्गुणकर्मणां तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३१ हरिःसर्वेषुभूतेषुभगवानास्तईश्वरः ॥
इतिभूतानिमनसाकामैस्तैःसाधुमानयेत् ३२ एवंनिर्जितषड्वर्गैःक्रियतेभक्तिरीश्वरे वासुदेवेभ
गवतियथासंलभतेरतिं ३३ निशम्यकर्माणिगुणानतुल्यान्वीर्याणिलीलातनुभिःकृतानि ॥
यदातिहर्षोत्पुलकाश्रुगद्गदंप्रोत्कंठउद्गायतिरौतिनृत्यति ३४ यदाग्रहग्रस्तइवक्वचिद्धस
त्याक्रंदतेध्यायतिवंदतेजनं मुहुःश्वसन्वक्तिहरेजगत्पतेनारायणेत्यात्ममतिर्गतत्रपः ३५ ॥

षयाभक्त्याप्रेम्णासर्वेषांलब्धानामर्पणेनच ३० तस्यलिंगानांमूर्तीनामीक्षणमर्हणंचादिशब्दाद्वंदनादीनां
तैश्च ३१ ३२ ॥ निर्जितःषट्कंकामक्रोधलोभमोहमदमत्सराणामिंद्रियाणांवावर्गोयैः ३३ भगवद्भक्तेर्लिंगा
न्याह निशम्येतित्रिभिः गुणान्भक्तवात्सल्यादीन् अतिहर्षेणउद्गताःपुलकाश्रूणिचतैर्गद्ग
दंयथाभवति एवंप्रोत्कंठउद्गायति ३४ ३५

श्री॰ भा॰ स॰ टी॰ २७

तस्य भावश्चेष्टादिः तस्य भावो भावना तेनानुकृते आशयाकृती मनः शरीरे यस्य निर्दग्धबीजं अज्ञानं मत्तु शयो वास
नाचयस्य सः सम्यगेति प्राप्नोति ३६ ततः किमत आह। अधोक्षजस्यालंभं मनसा स्पर्शः पाठांतरे तस्याश्रयणं अशु
भः रागादियुक्त आत्मा मनो यस्य संसृतिचक्रशातनं तन्निवर्तकं बुधा विदुः तदेव ब्रह्म निर्वाणं लयो मोक्षः तदात्म
कं सुखं विदुः हृदीश्वरमंतर्यामिणं ३७ भक्तिरशक्येति च न मंतव्यमित्याह क इति। छिद्रवत् आकाशवत् विष॰

तदा पुमान् मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः निर्दग्धबीजानुशयो महीयसा भक्तिप्र
योगेण समेत्यधोक्षजम् ३६ अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम्॥
तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ३७ कोऽतिप्रयासोऽसुरबालका हरे
रुपासने स्वे हृदि छिद्रवत्सतः स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः
३८ रायः कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः सर्वेऽर्थकामाः क्षणभंगुरायुषः कु
र्वंति मर्त्यस्य कियत्प्रियं चलाः ३९॥

याणां सुपपादनैरर्जनैः किं तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्ठत्वे सूकरादिसाधारण्यापत्तेरित्यर्थः॥ न॰
चैवमादौ पौनरुक्त्यदोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य॥ ३८॥ अनर्थकं च विषयार्जनमित्याह॥ रायः
अर्थाः क्षणभंगुरमायुर्यस्य॥ तदुक्तमितिहासेषु॥ धनं हि पुरुषो लोके पुरुषं धनमेव वा अवश्यमेकं त्य॰ २७
जति तस्मात्किं धनतृष्णयेति ३९

यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं अभिलाषोपपन्नंचतत्सुखंस्वर्गपदास्पदमित्येवंश्रुताः स्वर्गादिभोगाअपिनसेव्या
इत्याह एवंहीति क्षयिष्णवो हेतुः क्रतुभिःकृताइति तद्यथेहकर्मजितोलोकः क्षीयते एवमेवामुत्रपरलो
के पुण्यजितोलोकःक्षीयतेइतिश्रुतेः अतएवपुण्यतारतम्येनसातिशयाः नचनिर्मलाःस्पर्धादिमत्त्वात् नवि
द्यतेदृष्टंश्रुतंचदूषणंयस्मिन् ४० किंचयदर्थंयत्संकल्प्य अतःसंकल्पितात् विपर्यासंविपरीतंफलं अमोघं

एवंहिलोकाःक्रतुभिःकृताअमीक्षयिष्णवःसातिशयानिर्मलाः तस्मादृष्टश्रुतदूषणंपरंभक्त्यैक
येशंभजतात्मलब्धये ४० यदर्थइहकर्माणिविद्वन्मान्यसकृन्नरः करोत्यतोविपर्यासममोघंविंदते
फलम् ४१ सुखायदुःखमोक्षायसंकल्पइहकर्मिणः सदाप्नोतीहयादुःखमनीहायाःसुखावृतः
४२॥ कामान्कामयतेकाम्यैर्यदर्थमिहपूरुषः सवैदेहस्तुपारक्योभंगुरोयात्युपैतिच ४३ किमु
व्यवहितापत्यदारागारधनादयः राज्यकोशगजामात्यभृत्याप्ताममतास्पदाः ४४ किमेतैरात्मन
स्तुच्छैःसहदेहेननश्वरैः अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ४५ श्रीरामचंद्रायनमः॥

अवश्यंप्राप्नोति ४१ तदेवदर्शयतिसुखायेति ईहयाइच्छयाक्रिययावायःपूर्वमनीहायाहेतोः सुखेनावृतो
व्याप्तआसीत् सईहयादुःखमाप्नोत्येव ४२ किंचकामान्भोगान्काम्यैर्विषयैः कर्मभिर्वापारक्यः श्वादिभोग्यः
नत्वात्मीयः भंगुरश्च ४३ किमुदेहात्व्यवहिता अपत्यादयोममताविषयाः पारक्याइतिवक्तव्यं ४४
किंचस्वयंपुरुषार्थरूपस्यकिमेतैरित्याह किमेतैरिति ४५ राम श्रीराम॥

भोगावसराभावाच्चैतैः क उपयोग इत्याह निरूप्यतामिति प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः कियानर्थ इति वा॰
न्वयः ४६ ननु कर्मसु समाप्तेषु भोगावसरः स्यात्तत्राह कर्माणीति नन्वेवं कर्म तत्फलं देहादिकं च परमार्थ इत्याह उ
भयं कर्म च देहं च अविवेकतः अज्ञानेनैव तनुते ४७ यदपाश्रयाय दधीनाः ४८ भूतानां प्राणिनां जीवसंज्ञितः अंतर्यामी ॥४९॥

निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुराः निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ४६ कर्मा
ण्यारभते देही देहेनात्मानुवर्तिना कर्मभिस्तनुते देहमुभयं त्वविवेकतः ४७ तस्मादर्थाश्च कामाश्च
धर्माश्च यदपाश्रयाः भजतानीहयात्मानमनीहं हरिमीश्वरं ४८ सर्वेषामपि भूतानां हरिरात्मेश्वरः
प्रियः भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ४९ देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव वा भजन्
मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयं ५० नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः प्रीणनाय
मुकुंदस्य न वृत्तं न बहुज्ञता ५१ न दानं न तपो नेज्या न शौचं न व्रतानि च प्रीयतेऽमलया भक्त्या ह
रिरन्यद्विडंबनम् ५२ ततो हरौ भगवति भक्तिं कुरुत दानवाः आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्व
रे ५३ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः खगा मृगाः पापजीवाः संति ह्यच्युततां गताः ५४
एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं ५५ इति श्रीभागवते सप्तमस्कं
धे सप्तमोऽध्यायः ७ ॥

असुराणामस्माकमत्र नाधिकार इत्यपि न वाच्यमित्याह देव इति पंचभिः ५० ५१ अमलया निष्कामया विडंबनं नटनमा
त्रं ५२ ५३ ॥ अच्युततां अमृतत्वं ५४ अध्यायद्वयोक्तमुपसंहरति॥ एतावानिति तदीक्षणं गोविंद इत्यासमा
ननम् ५५ इति श्रीभागवते सप्तमस्कंधे सप्तमोऽध्यायः ॥७॥ श्रीरामाय नमः श्रीराम राम॰
दैत्यानुशासनं नाम

अष्टमे तु कृपासत्त्वं निघ्नन् दैत्यो हतः स्वयं आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः ॥ अंतः कृपास्तथापि सर्गो बहिः क्रोधो नृकेसरी
दैत्येंद्रमरिभावेन भजंतं स्वमभावयत् १ एकांतसंस्थितां प्रत्यग्दृशं यथा यथावत् २ स च हंतुं मनो दधे कथंभूतः कोपस्यावे-
शेनोद्रेकेण चलद्गात्रं वपुर्यस्य सः ३ क्षिप्त्वा तिरस्कृत्य पापेन सरोषेण तिरश्चीनेन वक्रेण ४ ५ ॥ मंदात्मन् अल्पबुद्धे मदाज्ञा

नारद उवाच ॐ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं १ अथाचार्य-
सुतस्तेषां बुद्धिमेकांतसंस्थितां आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा २ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयान-
यम् कोपावेशचलद्गात्रः पुत्रं हंतुं मनो दधे ३ क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम् आहेक्षमाणः पापेन
तिरश्चीनेन चक्षुषा ४ प्रश्रयावनतं दांतं बद्धांजलिमवस्थितम् सर्पः पदाहत इव श्वसन् प्रकृतिदारुणः ५
हे दुर्विनीत मंदात्मन् कुलभेदकराधम स्तब्धं मच्छासनोद्वृत्तं नेष्ये त्वाद्य यमक्षयं ६ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः स-
हेश्वराः तस्य मेऽभीतवन्मूढ शासनं किंबलोऽत्यगाः ७ प्रह्लाद उवाच न केवलं मे भवतश्च राजन् स वै बलं बलिनां
चापरेषां परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ८ स ईश्वरः काल उरुक्रमोऽसावोजः सहः
सत्त्वबलेंद्रियात्मा स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ९ राम राम

तिलंघिनं त्वां यमालयमद्य नेष्यामि ७ अभीतवत् किंबलं यस्य सः किंबलः ७ वशं प्रणीता इत्यत्र हेतुः
स ईश्वर इति ॥ ८ ॥ उरवः क्रमाः पादविक्षेपा यस्य बहुपराक्रम इति वा ओज आदिरूपः सत्त्वं धैर्यं बुद्धिर्वा ॥ ९ ॥

‘भवं

मद्गुरसौ कथं ममापि स एव बलं स्यादत आह जहीति आत्मनः स्वस्य स्वभावं त्यज अजितादात्मनो मनसः ऋते विना अन्ये
विद्विषो न संति किंच तद्धि हितदेव हि साम्येन मनसो धारणमेव समर्हणमाराधनं १० मयाहि दिग्विजये सर्वे जिताः अतः शत्रवः
न संतीति सत्यमिति चेत् तत्राह दस्यूनिति षट् एके भवादृशा मंदाः पुरा आदौ लुंपतः सर्वस्वं हरतः षडिंद्रियलक्षणान् चोरान् अविजि
त्य अजित्वा दश दिशः स्वयं जिता मन्यंते साधोस्तु जितचित्तस्य देहिनां समस्य ज्ञस्य विदुषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः

दा

जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न संति विद्विषः ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनंतस्य महत्समर्हणम् १० दस्यून् पुरा षड् न विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ११ हिरण्यकशिपुरुवाच व्यक्तं त्वं मर्तुकामोसि योतिमात्रं विकत्थसे मुमूर्षूणां हि मंदात्मन्ननु स्युर्विक्लवा गिरः १२ यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते १३ सोहं विकत्थमानस्य शिरः कायाद्धरामि ते गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं ॥१४॥ एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः खड्गं प्रगृह्योत्पतितो वरासनात्स्तंभं तताडातिबलः स्वमुष्टिना १५ ॥ तदैव तस्मिन्निनदोतिभीषणो बभूव येनांडकटाहमस्फुटत् यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामात्ययमंग मेनिरे १६ स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतं अंतःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः १७ ॥

तः स्युः ११ व्यक्तं निश्चितं विक्लवा असंबद्धा इत्यर्थः १२ हे मंदभाग्य यद्यसावस्ति तर्हि क्वास्ति प्रह्लाद आह सर्वत्रास्ति हिरण्य
कशिपुराह तर्हि कस्मात् स्तंभे नास्ति प्रह्लादस्तु स्तंभं निरीक्षमाणो नमस्यन्नाह दृश्यत इति १३ हिरण्यकशिपुस्तु तमपश्यन्नाह ॥
सोहमिति प्रह्लादेन मूर्ध्नि बद्धांजलिना निरीक्ष्यमाणं स्तंभं ताडितवान् १६ तत्पदं तस्य ध्वनेराश्रयं १७ श्रीराम राम॰

भगवांस्तदा अदृश्यत दृश्यो बभूव किमर्थं निजभृत्येन प्रह्लादेन यद्भाषितं दृश्यत इति तत्सत्यं विधातुं कर्तुं तथा अखिलेषु
भूतेषु स्वात्मनो व्याप्तिं च सत्यां कर्तुं स्तंभे अदृश्यत तत्किमर्थं भौतिकेषु च भावेषु भूतेषु च महत्सु च भगवानास्त इति ते
नैव भृत्येन भाषितं तत्सत्यं कर्तुं तथा अत्यद्भुतं दैत्यघातकमतिघोरं रूपमुद्वहन् दधत् तत्किमर्थं निजभृत्यैः सनकादि
भिः शापानंतरमनुतप्तैस्त्रिभिर्जन्मभिः शापमोक्षो भवत्विति तत्सत्यं कर्तुं तथा अत्यद्भुतं ब्रह्मसृष्टावदृष्टमश्रुतं च रू
पमुद्वहन् तच्च न मृगाकारं न च मनुष्याकारं उद्वहन् सभायां मध्ये अदृश्यत तत्किमर्थं निजभृत्येन हिरण्यकशिपुना
ब्रह्माणं प्रति यद्भाषितं भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो इति तथा नांतर्न बहिरिति न नरैर्न मृगैरिति च ब्रह्म

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः अदृश्यतात्यद्भुतरूपमुद्वहन् स्तंभे
सभायां न मृगं न मानुषम् ॥ १८ ॥

णा च निजभृत्येन तथास्त्विति यद्भाषितं तत्सत्यं कर्तुं नहि तद्ब्रह्मसृष्टं भूतं न च नरो वा मृगो वा न च सभागृहस्यांतः।
न च प्रांगणवत् बहिः एवं ताभ्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपुना भाषितं नूनमेतद्विरोधेन मृत्युर्मे भवितेति
तथायमुत स्विद्भयो मर इति च तच्च नारदेन निजभृत्येनेंद्रं प्रति भाषितं अयं महान् संस्थां न प्राप्स्यति अनंता
नुचर इत्यनेन स्वभक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुं अदृश्यत चकारान्निज भाषितं यत् ॥ कौंते
य प्रतिजानीहि न मे भक्तः प्रणश्यतीति तथा तेषामहं समुद्धर्ता मृत्युसंसारसागरादित्यादि तच्च
सत्यं कर्तुमदृश्यतेति द्रष्टव्यं अलमतिविस्तरेण ॥ १८ ॥ श्रीरामचंद्राय नमः श्रीराम राम ॥

श्री॰ भा॰ स॰ टी॰ ७० सदैत्यः एवंध्वनिंश्रुत्वा तदाश्चर्यंसत्त्वंप्राणिविशेषंसर्वतोविलोकयन् स्तंभस्यमध्यान्निर्गच्छत्नृमृगेंद्रयोर्मिश्रंरूपमहो
किमेतदितिमीमांसितवान् इतिशेषः तस्यैवमलंभयानकंतन्नृसिंहरूपंमीमांसमानस्याग्रतोनृसिंहरूपोहरिःसमु
त्थितः १९ भयानकत्वमेवदर्शयंस्तद्रूपमनुवर्णयतित्रिभिः प्रतप्तचामीकरंस्वर्णमिवपिंगानिचंडानिलोचनानिय
स्मिन् सटाःजटाःकेसराःकंठरोमाणि स्फुरद्भिःसटाकेसरैः जृंभितंसाटोपमाननंयस्मिन् करालाः तुंगादंष्ट्राय
स्मिन् करवालःखड्गःतद्वत्चंचलाक्षुरांतवत्तीक्ष्णाजिह्वायस्मिन्भ्रुकुटीयुक्तेनमुखेनोल्बणं २० स्तब्धौउन्नतौ

स सत्त्वमेवंपरितोविपश्यन् स्तंभस्यमध्यादनुनिर्जिहानं नायंमृगोनापिनरोविचित्रमहोकिमेतन्नृमृगें
द्ररूपं मीमांसमानस्यसमुत्थितोऽग्रतोनृसिंहरूपस्तदलंभयानकम् १९ प्रतप्तचामीकरचंडलोचनं
स्फुरत्सटाकेसरजृंभिताननं करालदंष्ट्रंकरवालचंचलक्षुरांतजिह्वंभ्रुकुटीमुखोल्बणं २० स्तब्धोर्ध्वक
र्णंगिरिकंदराद्भुतव्यात्तास्यनासंहनुभेदभीषणं दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलम
ल्पमध्यमं २१ चंद्रांशुगौरैश्छुरितंतनूरुहैर्विष्वग्भुजानीकशतंनखायुधम् २२ श्रीराम ॥

प्रांशूवृद्धौकर्णौयस्मिन् गिरिकंदरवदद्भुतंव्यात्तंप्रसृतमास्यंनासेचयस्मिन् हनूकपोलप्रांतौतयोर्भेदेनविदारणेनभीषणंदि
विस्पृशत्कायोयस्मिन् अल्पकसमासः अदीर्घाह्रस्वापीवराचस्थूलाग्रीवायस्मिन् उरुविशालंवक्षःस्थलंयस्मिन् तच्चतच्च
अल्पमध्यमंउदरंयस्मिन् २१ चंद्रांशुवद्गौरैस्तनूरुहैर्लोमभिःछुरितंव्याप्तं विष्वंचःसर्वतःप्रसृताभुजास्तेषामनीका ७०
निस्तोमाःतेषांशतानियस्मिन् नखान्येवायुधानियस्मिन् २२ ॥ श्रीरामायनमः श्रीराम राम॥

दुरासदं प्राप्तुमशक्यं सर्वाणि च निर्जितानि चक्रादीनि इतराणि वज्रादीनि तएवायुधप्रवेकाः प्राप्तोत्तमाः तैर्विद्राविता दैत्यदानवा येन तद्रूपं मीमांसमानस्याग्रतः समुत्थित इति पूर्वेणैवान्वयः ॥२३॥ तदाविर्भावप्रयोजनविमर्शपूर्वकं तेन सह दैत्यस्य युद्धमाह स प्राहेति ॥ प्रायेण महामायाविना हरिणा मे, यमेवं भूतो वधः स्मृतो हेतुः स्मृतः चिंतितः तथाप्यनेन समुद्यतेन न किंचित्स्यादित्येवं ब्रुवन्नभ्यपतदित्यन्वयः २४ तदासोसुरोन्द्रसिंहस्यौजसि दीप्ते पतितः सन् अलक्षितः अदृष्टोभूत् सत्वधामनि सत्व

दुरासदं सर्वनिर्जेतरायुधप्रवेकविद्रावितदैत्यदानवं २३ प्रायेण मेयं हरिणोरुमायिना वधः स्मृतोनेन समुद्यतेन किं एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः २४ अलक्षितोग्नौ पतितः पतंगमो यथा नृसिंहौजसि सोसुरस्तथा न तद्धि चित्रं खलु सत्वधामनि स्वतेजसा यो नु पुरापिबत्तमः २५ ततोभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया तं विक्रमं तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहीत् २६ स तस्य हस्तोत्कलितः तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः असाध्वमन्यंत हृतौकसोमरा घनच्छदा भारत सर्वधिष्ण्यपाः २७

प्रकाशे हरौ पतितस्य तमोमयस्यादर्शनं तद्धि चित्रं न भवति तत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्रलयकालीनं तमः नु अहो अपिबत् तस्मिन् विक्रमं तं समंतात्प्रहरंतं २६ हस्तादुत्कलितः निःसृतः तदा अमराः देवाः सर्वधिष्ण्यपाः असाधु अमन्यंत हृतान्योकांसि स्थानानि येषां ते तद्भियाघनच्छदाः मेघांतरिताः संतः ॥२७॥ राम॥

श्री॰ भा॰ स॰ टी॰ ३१

यस्य हस्तात् स्वयं मुक्तः तेन हरिं स्ववीर्योच्छंकितं मन्यमानः खड्गं चर्मणी प्रगृह्य पुनस्तमासज्जत अभ्यपद्यतेत्यन्वयः २८ ॥ श्येनस्येव वेगो यस्य तं शतचंद्रवर्त्मभिः खड्गमार्गैः अच्छिद्रं यथा भवत्येवमुपर्यधः चरंतं अट्टहासमेवाह खरं तीव्रं उत्स्वनेन महाशब्देनोल्बणं भयंकरं तद्भयेन हरेस्तेजसा च निमीलिते अक्षिणी यस्य ॥ २९ ॥ ग्रहणे दृष्टांतः व्यालो यथा आखुं मूषकं विदारणे दृष्टांतः अहिं गरुड इवेति विषक् सर्वतः स्फुरंतं निःसरंतं ग्रहणेनातुरं विवशं इंद्रेण सह युद्धे तस्य

तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे २८ तं श्येनवेगं शतचंद्रवर्त्मभिः चरंतमच्छिद्रमुपर्यधो हरिः कृत्वाट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः २९ विषक्स्फुरंतं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिशाक्षतत्वचं द्वार्यूरुमापात्य ददार लीलया नखैर्यथाहिं गरुडो महाविषं ३० संरंभदुष्प्रेक्ष्यकराललोचनो व्यात्ताननांतं विलिहन्स्वजिह्वया असृग्लवाक्तारुणकेसराननो यथांत्रमाली द्विपहत्यया हरिः ३१ नखांकुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् अहन्समंतान्नखशस्त्रपार्ष्णिभिर्दोर्दंडयूथोनुपथान्सहस्रशः ॥ ३२ ॥

क्तेन कुलिशेन नक्षता त्वक् अपि यस्य द्वारि सभायां नीतं न बहिः ऊरू ऊरौ निपात्य न भूमौ न चांबरे नखैर्न व्यस्तैरस्त्रैर्मध्ये न दिवा एवं दिवा नक्तपरिहाराय संध्यायामिति द्रष्टव्यं ३० दैत्यवधस्तत्कालं त्यवधमाह द्वाभ्यां संरंभेण दुःप्रेक्ष्याणि करालानि लोचनानि यस्य असृग्जो रक्तस्य लवैर्बिंदुभिः आक्ताः सिक्ताः अतएव अरुणाः केसरा आननं च यस्य सः करिवद्विपहत्यया गजवधेन हरिः सिंहो यथा एवंभूत स्तस्यानुचरान् अहन्नित्युत्तरेणान्वयः ३१ नखांकुरैरुत्पाटितं हृत्सरोरुहं यस्य तं दोर्दंडानां यूथानि यस्य सः तमनुपंथाये येतान् अन्यानपि तत्पक्षपातिन इत्यर्थः ३२ ३१

दैत्यवधव्यग्रस्यन्हरेराटोपमादहाभ्यां सटाभिरवधूताः प्रकंपिताः परापतन् व्यशीर्यंत तस्यदृष्ट्याविमुष्टंरोचिर्येषांते
तिरस्कृतप्रभाः अभवन्नितिशेषः दिगिभाः दिग्गजाः ३३ तस्यसटाभिरुत्क्षिप्तानिविमानानितैः संकुलाव्याप्तासतीप्रोत्स
र्पेतस्वस्थानात् प्रकर्षेणोदसर्पत् ३४ स्वभृत्यैश्वर्यमाश्चर्यमिवमत्वाकौतूहलेनतस्यासनेउपविष्टं भयात्कोपिन

सटावधूताजलदाःपरापतन् ग्रहाश्चतद्दृष्टिविमुष्टरोचिषः अंभोधयःश्वासहताविचुक्षुभुर्निर्ह्रा
दभीतादिगिभाविचुक्रुशुः ३३ द्यौस्तत्सटोत्क्षिप्तविमानसंकुलाप्रोत्सर्पतत्क्ष्माचपदातिपीडिता
शैलाःसमुत्पेतुरमुष्यरंहसाततेजसाखंककुभोनरेजिरे ३४ ततःसभायामुपविष्टमुत्तमेनृपा
सनेसंभृततेजसंविभुं अलक्षितद्वैरथमत्यमर्षणंप्रचंडवक्त्रंनबभाजकश्चन ३५ निशाम्यलोक
त्रयमस्तकज्वरंतमादिदैत्यंहरिणाहतंमृधे प्रहर्षवेगोत्कलिताननामुहुःप्रसूनवर्षैर्ववृषुःसुरस्त्रियः ३६
तदाविमानावलिभिर्नभस्तलंदिदृक्षतांसंकुलमासनाकिनां सुरानकादुंदुभयोथजघ्निरेगंधर्वमुख्याननृ
तुर्जगुःस्त्रियः ३७ तत्रोपव्रज्यविबुधाब्रह्मेंद्रगिरिशादयः ऋषयःपितरःसिद्धाविद्याधरमहोरगाः ३८ श्रीराम॰

बभाजनासेवत, नलक्षितोद्वैरथः प्रतियोद्धायेन ॥ ३५॥ लोकत्रयस्यमस्तकज्वरं शिरोव्यथेवदुःसहं प्रह॰
र्षस्यवेगेन उत्कलितानिविकसितानि आननानियासांताः वृहर्विवृषुः ३६ नाकिनांविमानावलि
भिः स्वराणमानकाःपटहाः तैर्जघ्निरे वादिताः स्त्रियोऽप्सरसोननृतुः ३७ ३८ श्रीरामचंद्रायनमः ॥

श्रीभा॰ स॰ टी॰ ३२

गंधर्वा अप्सरसश्च चारणाश्चेत्यर्थः ॥३९॥ नरशार्दूलं पुरुषोत्तमं ॥ ब्रह्मादयो नृसिंहस्य शंकया आकुलचेतसः आरा
देवास्तुवन् सन्नद्धाः श्लोकैः पृथक्पृथक् ॥४०॥ अनंताय अनंतं प्रसादयितुं नतोस्मि अनंतत्वे हेतुः दुरंताः शक्तयो य
स्य तत्कुतः विचित्राणि वीर्याणि प्रभावा यस्य तत्किमर्थं पवित्राणि शोधकानि कर्माणि यस्य विचित्रवीर्यत्वमेवाह ॥
विश्वस्येति संदधते सम्यक्कुर्वते एवमपि अव्ययात्मने अप्रच्युतस्वरूपाय ४० ॥ ॥ श्रीराम ॥

मनवः प्रजानां पतयो गंधर्वाप्सरचारणाः यक्षाः किंपुरुषा भूता वेतालाः सिद्धकिन्नराः ते
विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः ॥३९॥ मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसं ईडिरे नर
शार्दूलं नातिदूरचराः पृथक् ॥४०॥ श्रीब्रह्मोवाच नतोस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवि
त्रकर्मणे विश्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया संदधते अव्ययात्मने ४१ श्रीरुद्र उवा
च कोपकालो युगांतस्ते हतोयमसुरोल्पकः तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ४२ श्रीराम ॥

रुद्रस्तु तत्कोपकालाभिज्ञो नायं कोपावसर इति तं प्रार्थयते ॥ सहस्रयुगांतस्तव कोपस्य कालः कोपायोग्यश्चायमि
त्याह अल्पकः अत्यल्पः अतः कोपान्निवृत्य प्रह्लादं मा हिंसीरित्याह तत्सुतमिति यद्वा अकालेप्ययं कोपो ३२
भक्तस्य रक्षणार्थं इति चेत् तर्हि इदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः ॥ ४२ श्रीरामकृष्णाभ्यां नमः श्रीराम॰

इंद्रस्तु नास्माकं हविर्भागादिलाभः पुरुषार्थः किंतु त्वत्परिचर्यैव भवता पुनरनेन संरंभेण स्वकार्यमेव साधितं तस्य च सिद्धत्वादुपसंहरैनं क्रोधमित्याशयेनाह हे परम नोऽस्मान् त्रायता रक्षता भवता स्वीया एव भागा दैत्यात्प्रत्याहृताः अंतर्यामिणस्तवैव यज्ञेषु भोक्तृत्वात् अस्मदीयं हृदयकमलं च तव गृहमेवैतावत्पर्यंतं भयहेतुत्वेन अस्मत्स्मृतिपथे नित्यं स्थिते न दैत्येनाक्रांतं व्याप्तं सत् प्रत्यबोधि भयापाकरणेन विकासं नीतं तव त्रैलोक्यैश्वर्यसाधनार्थमयमुद्यम इति चेत् तत्राह कालग्रस्त

इंद्र उवाच प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्रत्यबोधि कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किं ४३ ऋषय ऊचुः त्वं नः तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज तद्विप्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ४४

मिति ते त्वां हे नारसिंह नरस्य सिंहस्य चाकाराभ्यामाविर्भूत ॥ ४३ ॥ ऋषयस्तु तपः प्रवर्तनेन अस्माकं महाननुग्रहः कृत इत्याहुः ॥ त्वं नो यदात्थ परमं ध्यानलक्षणं तपः परमत्वे हेतुः आत्मनः तव तेजः प्रभावरूपं तदेवाहुः येन तपसा आत्मनि लीनमिदं विश्वं ससर्ज सृष्टवानसि तत् अमुना दैत्येन विप्रलुप्तं प्रणष्टमभूदिति सत् हे शरण्यपाल अद्य रक्षार्थं गृहीतेनानेन वपुषा पुनरपि तपः कुरुतेत्यनुज्ञातवानसि तस्मै ते नम इत्युत्तरश्लोकचतुर्थपादस्यानुषंगः ॥ ४४

श्री॰ भा॰ सं॰ टी॰ ३३

पितरस्तु श्राद्धोद्धरणेन परमोपकारिणं प्रणमंति श्राद्धानि श्रद्धायुक्तानि पिंडादीनि नोऽस्मभ्यं पुत्रैर्दत्तानि प्रसभं बलात् स्वयम
धिकृत्य बुभुजे किंच तीर्थस्नानसमये दत्तं तिलोदकमप्यपिवत् तानि तस्योदरात् य आर्छेत् आहृतवान् कथंभूतात् न
खैर्विदीर्णवपा यस्य तस्मात् वपाविदारणस्य तत्कृतपिंडोद्धरणमेव फलमिति भावः ४५ योगसिद्धां गतिं अणिमादिसिद्धिं
नाना अनेकाः दर्पा यस्य तं तस्मै तुभ्यं तं त्वामुद्दिश्य ४६ . विद्यां मंत्रहीनादिलक्षणं अनुराद्धां संप्राप्तां संख्ये युद्धे ४७ ॥

पितर ऊचुः श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलांबु तस्योदरान्नखविदीर्णवपा
द्य आर्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ४५ सिद्धा ऊचुः यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोब
लेन नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ४६ विद्याधरा ऊचुः विद्यां पृथग्धारणयानु
राद्धां न्यषेधदज्ञो बलवीर्यदृप्तः स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यं ४७ नागा ऊचुः
येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः तद्वक्षःपाटनेनासां दत्तानंद नमोऽस्तु ते ४८ मनव ऊचुः मनवो वयं
तव निदेशकारिणो दितिजेन देव परिभूतसेतवः भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंक
रान् ४९ ॥

रत्नानि फणास्थितानि स्त्रीरत्नानि च उत्तमाः स्त्रियः आसां स्त्रीणां दत्त आनंदो येन तत्संबोधनं पाठांतरे अस्माकं दत्त आनं
दो येनेति ४८ नृसिंहेनावलोकिताः संतो मूर्ध्नि बद्धांजलयो मनवः प्रोचुः मनवो वयं धर्मपालकाः परिभूताः सेतवो
वर्णाश्रमधर्ममर्यादा येषां ते अनुशाधि अनुशिक्षय ४९ श्रीरामचंद्रं शरणं प्रपद्ये ॥ श्रीराम राम॥

प्रजापतयोपि तदवलोकिताः प्रोचुः हे परेश ते त्वयाभिसृष्टाः प्रजेशा वयं येन निषिद्धाः संतः प्रजा न सृजामः स एष भि
न्नवक्षो यस्य सः त्वनिश्चितं मृतः शेते अतः परं प्रजाः सृज्यामह इति हृष्यंत आहुः हे सत्वमूर्ते नवायमवतारो जगतो
मंगले ५० गंधर्वा अपि तदवलोकिताः प्रोचुः हे विभो वयं ते त्वदीयाः नटा नर्तका नाट्ये नृत्ते गायकाश्च येन स्वाधी

प्रजापतय ऊचुः प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः स एष त्वया भिन्नव
क्षानुशेते जगन्मंगल सत्वमूर्तेवतारः ५० गंधर्वा ऊचुः वयं विभो ते नटनाट्यगायका येनात्मसाद्वी
र्यबलौजसा कृताः स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ५१ चारणा
ऊचुः हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः यदेष साधुहृच्छयस्त्वयासुरः समापितः ५२ यक्षा
ऊचुः वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वं स तु जनपरितापं
तत्कृतं जानता ते नरहर उपनीतः पंचतां पंचविंश ५३ राम राम राम राम।

नाः कृताः कथंभूतेन वीर्यं शौर्यं बलं शक्तिः ताभ्यामोजः प्रभावो यस्य तेन इमां दशां मृतिं उचितमेतदित्याहुः
किमिति ५१ भवापवर्गं संसारनिवर्तकं आश्रयणे हेतुः यद्यस्मात् साधूनां हृदि भयजनकत्वेन शेते तिष्ठति
इति तथा स एषोसुरः त्वया समापितः अंतं नीतः ५२ मनोज्ञैः कर्मभिः अनुचरेषु मुख्याः पंचतां मृत्युं हे
पंचविंश चतुर्विंशतितत्वनियामक ५३

श्री॰ भा॰ स॰ टी॰ ३४

किंपुरुषाः त्वांस्तोतुंकेवयंवराकाइत्याहुः॥वयंकिंपुरुषाः तुच्छप्राणिनः त्वंतुमहानद्भुतप्रभावःपुरुषः नन्वयंमहा
नुदैत्योहतइतिकिंनवर्ण्यतइत्याशंक्यकियदेतदित्याहुः अयमिति ५४ सत्रेषुयज्ञेषुतेत्वयाहतः एतद्दिष्ट्याभ
द्रंकृतं ५५ अमुनादितिजेनविष्टिंनिर्मूल्यंकर्मअनुनिरंतरंकारिताः अतःपरंनःविभवायसमृद्धयेभव ५६ ॥

किंपुरुषाऊचुः वयंकिंपुरुषाः त्वंतुमहापुरुषईश्वरः अयंकुपुरुषोनष्टोधिक्कृतःसाधुभिर्यदा॰
५४ वैतालिकाऊचुः सभासुसत्रेषुतवामलंयशोगीत्वासपर्यांमहतींलभामहे यस्ताव्यनैषी
द्भृशमेषदुर्जनोदिष्ट्याहतस्तेभगवन्यथामयः ५५ किंनराऊचुः वयमीशकिन्नरगणास्त॰
वानुगाःदितिजेनविष्टिममुनानुकारिताः भवताहरेसवृजिनोवसादितोनरसिंहनाथविभ
वायनोभव ५६ विष्णुपार्षदाऊचुः अद्यैतद्धरिनररूपमद्भुतंतेदृष्टंनःशरणदसर्वलोकशर्म सो
यंतेविधिकरईशविप्रशप्तस्तस्येदंनिधनमनुग्रहायविद्मः ५७ इतिश्रीभागवतेसप्तमस्कंधेप्रह्ला
दानुचरितेदैत्यराजवधोनामाष्टमोध्यायः ८॥ श्रीरामचंद्रगुरवेनमः श्रीराम ॥

नोऽस्माकंभक्तानांशरणदआश्रयप्रदसर्वेषांलोकानांसर्वमंगलमेतदद्भुतंरूपंअद्यैवदृष्टंनतुपूर्वंविधिकरःकिं ३४
करः ५७ इतिश्रीभावार्थदीपिकायांसप्तमस्कंधेष्टमोध्यायः ८ श्रीरामायनमः श्रीराम॰

नवमे ब्रह्मणा भीत्या चोदितोऽस्तौद्बालकः कोपं प्रशमयन्नस्तौन्नृसिंहमतिभीषणं १ उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृके
सरी केसरीव स्वपोतानामन्येषामुग्रविग्रहः २ इत्याद्यागमोक्तां भक्तानुकंपितामाह एवमिति सप्तभिः एवं दूरत एव
स्थित्वा स्तुवंतः मन्युना संरंभ आवेशो यस्य तं उपगंतुं नाशक्नुवन्॥ महदद्भुतरूपं दृष्ट्वा शंकिता सती तं नोपेयाय नोपजगाम॥

नारद उवाच एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः नोपैतुमशकन्मन्युसंरंभं सुदुरासदं १ साक्षाच्छ्रीः प्रेषि
ता देवैर्दृष्ट्वा तन्महदद्भुतम् अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता २ प्रह्लादं प्रेषयामास ब्रह्मावस्थित
मंतिके तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ३ तथेति शनकै राजन्महाभागवतोऽर्भकः उपेत्य भुवि का
येन ननाम विधृतांजलिः ४ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः उत्थाप्य तच्छीर्ष्ण्य
दधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयं ५ स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्म
दर्शनः तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ६ अस्तौषीद्धरिमेकाग्रमनसा सुस
माहितः प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ७ श्रीरामचंद्राय नमः श्रीराम राम॥

अद्भुतत्वे हेतुः अदृष्टेति २ उपेहि उपगच्छ ३ ४ कालएवाहिः तस्माद्वित्रस्ता धीर्येषां तेषां कृतं अभयं येन ५ तस्य
करस्पर्शेन धुतं निरस्तं अखिलमशुभं यस्य सपदि तत्क्षणमेव अभिव्यक्तमपरोक्षीभूतं परात्मदर्शनं ब्रह्मज्ञानं यस्य॥
निर्वृतः सन् हृदि दधौ हृष्यंती रोमांचिता तनुर्यस्य क्लिन्नमार्द्रं हृद्यस्य अश्रूणि लोचनयोर्यस्य परमगुरुवार्य॥
तया दधौ न साधनत्वेनेत्यर्थः ६ सुसमाहितत्वमेवाह तस्मिन्नेव न्यस्ते हृदयं ईक्षणे च येनेति ७ श्रीराम॥

श्री॰ भा॰ स॰ टी॰ ३५

स्वस्मिन्निवसमस्तेषुतत्कृपामर्तनुहृदये प्रह्लादःस्तौतिसत्यश्लोकैर्हिचत्वारिंशताहरिम् तत्रतावदात्मनोभगवत्स्तुतावनधिका
रमिवाशंक्याधिकारंसंभावयन्नाह ब्रह्मादयइतिपंचभिः मुनयोमननशीलाःसिद्धाज्ञानिनोपि कथंभूताः सत्वएवैक
स्मिंस्तानोविस्तारोयस्याःसामतिर्येषांतथाविधाअपिवचसांप्रवाहैरपितथाबहुभिर्वर्द्धमानैर्गुणैरपियमाराधयितुं
नपिप्रुःनतुष्टुःनशक्ताइत्यर्थःसहरिः

प्रह्लादउवाच ॥ ब्रह्मादयःसुरगणामुनयोथसिद्धाःसत्वैकतानमतयोवचसांप्रवाहैः नाराधितुंपुरुगु
णैरधुनापिपिप्रुःकिंतोष्टुमर्हतिसमेहरिरुग्रजातेः ८ मन्येधनाभिजनरूपतपःश्रुतौजःतेजःप्रभा
वबलपौरुषबुद्धियोगाः नाराधनायहिभवंतिपरस्यपुंसोभक्त्यातुतोषभगवान्गजयूथपाय ९॥

मेकथंतोष्टुंप्राप्नुमर्हति तत्रहेतुः उग्राघोराआसुरीजातिर्यस्य ८ ॥ एवंहरितोषणेस्वस्यायोग्यतामा
शंक्ययोग्यतांसंभावयतिमन्यइतिद्वाभ्यां ॥ अभिजनःसत्कुलेजन्म रूपंसौन्दर्यं श्रुतंपांडित्यं ओजःइंद्रियनैपु
ण्यं तेजःकांतिःप्रभावःप्रतापःपौरुषमुद्यमः बुद्धिःप्रज्ञा योगोष्टांगः एतेधनादयोद्वादशापिगुणाः पर
मस्यपुंसः आराधनायनभवंति हियतः केवलयाभक्त्यैवसतुगजेंद्रायतुष्टोभवत् ९ श्रीराम राम॰ ३५

एवंभक्त्यैवकेवलयाहरेःतोषःसंभवतीत्युक्तं इदानींभक्तिंविनानान्यत्किंचित्तत्तोषहेतुरित्याहविप्रादिति पूर्वोक्ताधनादयोद्विषट्द्वादशगुणास्तैर्युक्तात्विप्रादपिश्वपचंवरिष्ठंमन्ये यद्वा सनत्सुजातोक्ताद्वादशधर्मादयोगुणाद्रष्टव्याः तदुक्तं धर्मश्चसत्यंचदमःश्रुतंचअमात्सर्यंह्रीस्तितिक्षानसूया यज्ञश्चदानंचधृतिःशमश्चमहाव्रताद्वादशब्राह्मणस्येतिकथंभूतादरविंदनाभस्यपादारविंदाद्विमुखात् कथंभूतंश्वपचंतस्मिन्नरविंदनाभे अर्पितामनआदयोयेनतंईहितंकर्म वरिष्ठत्वेहेतुः सएवंभूतःश्वपचः सर्वंकुलंपुनाति भूरिमानोगर्वोयस्य सतुविप्रआत्मानमपिनपुनाति कुतःकुलं यतोभक्ति

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखात्श्वपचंवरिष्ठं मन्येतदर्पितमनोवचनेहितार्थप्राणंपुनातिसकुलंनतुभूरिमानः १० नैवात्मनःप्रभुरयंनिजलाभपूर्णोमानंजनादविदुषःकरुणोवृणीते यद्यज्जनोभगवतेविदधीतमानंतच्चात्मनेप्रतिमुखस्ययथामुखश्रीः ११ श्रीराम राम॥

हीनस्यैतेगुणागर्वायैवभवंतिनतुशुद्धये॥अतोहीनइतिभावः॥ १० तर्हिकिंधनाद्यर्पणेनसन्मानंप्राकृतइवभगवानपेक्षते नेत्याह॥ नैवेति॥ अयंप्रभुरीश्वरः अविदुषोऽल्पकाज्जनात् मानंपूजामात्मनोऽर्थे नवृणीतेनेच्छति यतोनिजलाभेनैवपूर्णः तर्हिपूजांनेच्छत्येवतत्राह करुणःकृपालुः अतोवृणीतएव तत्रहेतुः यद्यदिति यंयंमानं यद्वायद्यस्मात् यद्येनधनादिनाभगवतेमानंविदधीत तदेवात्मनेभवति नान्यत् यथामुखेकृतैवतिलकादिश्रीःशोभाप्रतिबिंबस्यभवति नतुसाक्षात्तस्यैवकर्तुंशक्यतेतद्वत् ११ श्रीराम राम श्रीराम॥

यस्मादेवं भगवान्भक्त्यैव तुष्यति तस्मादहं नीचोपि विगतविक्लवः गतशंकः सन् ईश्वरस्य महिमहिमानं सर्वप्रयत्नेन स्वम
नीषानुसारेण अनुवर्णयामि अज्ञानतोपि स्तुतिकरणे हेतुमाह येनैव महिम्ना अनुवर्णितेन अविद्यया संसारमनुप्रविष्टः
पुमान्प्रयेतः शुद्धोत तन्महिग्रणामि अन्यस्य तथा शोधकस्याभावादित्यर्थः १२ तदेवमात्मनः स्तुतावधिकारं परिहृ

तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषं नीचोजया गुणविसर्गमनुप्रविष्टः पूये
त येन हि पुमाननुवर्णितेन १२ सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः
क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः १३ श्रीरामायनमः श्रीराम॰

त्विदानीं तं स्तुवन् कोपोपसंहारं प्रार्थयते सर्वे हीति द्वाभ्यां भो ईश अमी उद्विजंतो बिभ्यतः सर्वे ब्रह्मादयः सत्त्वमूर्तेः
तव विधिकराः त्वन्नियोगकर्तारो भक्ता एवं नान्ये न च वयमसुरा इव वैरभावेन नैते भक्ताः किंतु श्रद्धयैव॥ तव
रुचिरैरवतारैः विविधं क्रीडनं अस्य विश्वस्य क्षेमादिप्रयोजनाय न तु भयोत्पादनाय १३ ॥

तत्तस्मादेषांभयपरिहारायमन्युंयच्छ उपसंहर यदर्थे अयंमन्युः सचासुरः साधूनांसंतोषार्थे अद्यहतः अतः परं क्रोधेनका र्याभावात्तन्नियच्छ ननन्वेषांवधेनसाधवः किंमोदेत तत्राह वृश्चिकादेः परोपद्रवकारिणोन्यतएवजातयाहत्यावधेन तस्यै वतद्वदं ज्ञातेऽपि साधवः अपिमोदेतैव तर्हिबहूनांसुखावहत्वादमुंक्रोधंनत्यजामीतिचेत् तत्राह लोकाश्चनिर्वृतिंइ ताः प्राप्ताः संतः प्रतियंति क्रोधोपसंहारं प्रतीक्षंते तर्हिजनानांपुनर्भयाभावायमन्युंधारयामीतिचेत् तत्राह ॥

तद्यच्छमन्युमसुरश्चहतः त्वयाद्य मोदेतसाधुरपिवृश्चिकसर्पहत्या लोकाश्चनिर्वृतिमिताः प्रति
यंतिसर्वेरूपंनृसिंहविभवायजनाःस्मरंति २४ नाहंबिभेम्यजिततेतिभयानकास्यजिह्वार्क
नेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् अंत्रस्रजः क्षतजकेसरशंकुकर्णात् निर्ह्रादभीतदिगिभादरिभि
न्नखाग्रात् २५॥

रूपमिति विभवाय भयनिवृत्त्यै एतद्रूपस्मरणादेव भयनिवृत्तेर्नेमन्युधारणेन कृत्यमस्तीत्यर्थः २४ त्वंचे द्बिभेषि तर्हित्यजामीतिचेत् तत्राह नाहमिति भोअजित ते अस्मात् रूपात् अहंनबिभेमि कथंभूतात् आस्यंचजिह्वाच अर्कसदृशनेत्राणिच भ्रुकुटीनां रभसआटोपश्च उग्रादंष्ट्राश्च एतान्यतिभयानकानियस्मिन् तस्मात् अंत्रमय्यः स्रजो यस्मिन् तत् अंत्रस्रक् तस्मात् क्षतजाक्ताः केसराः यस्मिन् शंकुवदुन्नतौ लम्बौ कर्णौ यस्मिन् तच्च तच्च तस्मात् निर्ह्रा देन भीता दिगिभा यस्मात् अरीन्भिंदंतीत्यरिभिंदि तानि नखाग्राणि यस्मिन् एवंभूतादपि ते रूपात् अहं न बिभेमि २५॥

श्री· महद्भयंत्वन्यदस्तीत्याह त्रस्तोस्मीति दुःसहंयदुग्रंसंसारचक्रेकदनंदुःखंतस्मादहंत्रस्तोस्मि तत्र च ग्रसतांहिंस्राणांम
भा· ध्येस्वकर्मभिर्बद्धःसन्प्रणीतः निक्षिप्तोस्मिहेकृपणवत्सल हेउरुशक्रम कदानुत्वंप्रीतःसन् अपवर्गभूतंशरणंतवां
स्क· घ्रिकमलंप्रतिक्रयसे मामाह्वास्यसि १६ दास्येसतिमत्प्रीतिरितिचेत् तर्हि नानायोनिषुक्लिश्यमानस्यममदासस्यज्ञा
टी· २७ नाभावात् त्वमेवतदुपदिशेतिप्रार्थयते यस्मात्प्रियैश्चाप्रियैश्चयथासंख्यंवियोगसंयोगाभ्यांजन्मयस्य तेनशोका

त्रस्तोस्म्यहंकृपणवत्सलदुःसहोग्रसंसारचक्रकदनाद्ग्रसतांप्रणीतः बद्धःस्वकर्मभिरुश
त्तमतेंघ्रिमूलंप्रीतोपवर्गमरणंह्वयसेकदानु १६ यस्मात्प्रियाप्रियवियोगसंयोगजन्म
शोकाग्निनासकलयोनिषुदह्यमानः दुःखौषधंतदपिदुःखमतद्धियाहंभूमन्
भ्रमामिवदमेतवदास्ययोगं १७॥

ग्निना सकलयोनिषु दह्यमानोस्मि दुःखस्यप्रतीकारैः कार्यइतिचेत्तत्राह दुःखस्यौषधंप्रतीका
रः तदपिदुःखमेव एवमपि अतद्धिया देहाद्यभिमानेन भ्रमामि अतः हेभूमन् विभो मेतवदा २२
स्ययोगंत्वयंनिस्तारोपायंवद १७॥

ननु दास्ययोगेन प्रवृत्तस्यापि तदन्तरायभूतानां पूर्वोक्तानां दुःखानां कुतः परिहारः तत्राह ॥ सोऽहं त्वद्दासः सन् भो नृसिंह तव ली
लाकथा अनुगृणन् दुर्गाणि महादुःखानि अंजसा तितर्मि अतितरामि न गणयिष्यामीत्यर्थः तत्र हेतुः गुणैः रागादिभिर्विशेषेण प्र
मुक्तः सन् तत्कुतः ते पदयुगमेवालयो येषां भक्तानां त एव हंसास्तज्ज्ञानिनः तैः संगो यस्य मम सोऽहं कथंभूतस्य कथास्तत्राह प्रिय
स्येत्यादि कुतो ज्ञाताः विरिंच्येन गीताः तत्संप्रदायप्रवृत्ताः तथा चाथर्वणी श्रुतिः देवा ह वै प्रजापतिमब्रुवन्नित्यादि श्रुतिः
दास्ये प्रवृत्तस्य भगवदनुग्रहेण सत्संगः ततो वीतरागतया भगवद्गुणानुवर्णनं ततश्च दुःखानभिभवः स्यादिति वाक्यार्थः १८॥

सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिंच्यगीताः अंजस्तितर्म्यनुगृणन्गुणविप्रमुक्तो
दुर्गाणि ते पदयुगालयहंससंगः १८ बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति मज्जतो नौः ॥
तप्तस्य तत्प्रतिविधिर्य इहांजसेष्टः तावद्विभो तनुभृतां त्वदुपेक्षितानाम् १९ श्रीराम ॥

ननु दुःखैस्तप्तस्य तत्प्रतीकारो लोके प्रसिद्ध एव किं मद्दास्यादिना तत्राह बालस्येति भो नृसिंह तप्तस्य तत्प्रतिविधिः दुःखप्र
तीकारः इह लोके योंऽजसा इष्टः स त्वयोपेक्षितानां तावदेव क्षणमात्रमेव न त्वात्यंतिकः तदेवाह बालस्य पितरौ शरणं रक्ष
काविह न भवतः ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् क्वचिदजीगर्तादिषु ताभ्यामेव तद्वधदर्शनाच्च न चार्तस्य रो
गिणः अगदमौषधं शरणं कृतेऽप्यौषधे मृत्युदर्शनात् न च उदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तया सह मज्जनदर्शनात्
अतः त्वमेव शरणमित्यर्थः अथवैवं काकाक्ष्या व्याख्येयं तप्तस्य तत्प्रतिविधिरिह तावत्प्रतिविधिर्य इह तावत्प्रसिद्धः स
त्वदुपेक्षितानां किमंजसेष्टः अपि तु नेष्ट एव यस्तावदिह प्रतिविधिरिष्टः स किमंजसा नैवांजसेत्यादि योज्यम्
बालस्येत्यादि पूर्ववदेव योज्यं १९

श्रीभा॰ सप्त॰ ३८

नन्वक्वचित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षकोपिदृश्यतएवेत्याशंक्यतत्रापितद्रूपेणत्वमेवरक्षकइत्युपरीक्षितस्यतस्यैव सर्वा
त्मतामाह यस्मिन्निति अपरोर्वाचीनःपित्रादिः परोब्रह्मादिर्वाभावः कर्तातत्तत्कारकैर्यद्यत्करोति तत्सर्वंभवतएवस्वरूपं नतु
पृथक् यस्मिन्नधिकरणेयतोनिमित्तात् यर्हियस्मिन्कालेयेनकरणेनयेनहेतुकर्त्रासंचोदितश्च यस्यसंबंधियस्मात् अ
पादानात् यस्मैसंप्रदानाय यदीप्सिततमंयःकर्तेत्येवंसप्तविभक्त्यर्थाः यथायेनप्रकारेणेतिक्रियाविशेषणभूतानामव्य
यानामर्थः पृथक्स्वभावः सत्वादिप्रकृतिःकरोतिउत्पादयति विकरोतिरूपांतरंनयतीति २० ॥ अतोन्यस्य

यस्मिन्यतोयर्हियेनचयस्ययस्माद्यस्मैयथायदुतयस्त्वपरःपरोवा भावःकरोतिविकरोतिपृथक्स्वभावः
संचोदितस्तदखिलंभवतःस्वरूपं २० मायामनःसृजतिकर्ममयंबलीयःकालेनचोदितगुणानुमतेनपुं
सः छंदोमयंयदजयार्पितषोडशारंसंसारचक्रमजकोऽतितरेत्त्वदन्यः २१ श्रीराम राम॥

रक्षकस्याभावात्संसारित्वाच्चानित्यमुक्तस्त्वमेवमांशरणागतंरक्षेतिप्रार्थयन्मायेतिद्वाभ्यां त्वदंशस्यपुंसोऽनुमतेनेक्षणरू
पेणअनुग्रहेणमनः प्रधानंलिंगंमायासृजतिकथंभूताकालेनचोदिताः (क्षोभिता) गुणाः यस्याः कथंभूतंमनः कर्ममयंकर्मरूपंबली
यः दुर्जयंछंदोमयं वेदोक्तकर्मप्रधानंच अजयाजीवस्याविद्ययातद्भोगार्थेअर्पिताःषोडशआराविकारायस्मिन् य
देवंभूतंसंसारचक्रात्मकंमनः तत्कोतितरेत् भोअज त्वदन्यः त्वत्तःपृथक्स्थितः त्वामभजन्नित्यर्थः २१ श्रीराम॥ ३८
श्रीराम राम राम राम॥

ननु ममापि मायासंबंधात् कर्तृत्वाद्यविशेषाच्च त्वत्तः को विशेष इत्यत आह स इति, स्वधाम्ना चिच्छक्त्या नित्यं विजिता आत्मनो बुद्धे
ज्ञानादयो येन गुणाः येन स हि त्वं यतः कालः मायाप्रेरकः अत एव वशीकृता विसृज्यानां कार्याणां विसर्गाणां साधनानां शक्तयो येन अतः
इदं दंडवत् त्रिविधीड्यमानं मां उपकर्षस्व समीपं नय २२ ननु लोकपालानां भोगान् भुंक्ष्व पित्र्यं च राज्यमिदं दास्यामि किं

सत्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः चक्रे विसृष्टमजयेश्वर षोडशारे निः
पीड्यमानमुपकर्ष विभो प्रपन्नम् २२ दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान्
जनोऽयं येऽस्मत्पितुः कुपितहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः २३ तस्मादमूस्तनुभृ
तामहमाशिषोऽज्ञ आयुः श्रियं विभवमैन्द्रियमाविरिंच्यात् नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनो
पनय मां निजभृत्यपार्श्वम् ॥२४॥

मिति संसारादुद्विजसे तत्राह दृष्टा इति त्रिभिः॥ श्रियः संपदः विभव उद्भवः आयुरादयो दृष्टा इति काकाक्षिन्यायेनोक्तं तदेवाह॥
येऽस्मत्पितुः कोपहासविजृम्भितभ्रूभंगमात्रेण विध्वस्ताः॥ स च त्वया निरस्तः २३ यस्मादेवं तस्मादाशिषः भोगान्
ज्ञः तत्परिपाकं च विद्वान् अहं मैन्द्रियमिन्द्रियैर्भोग्यं ब्रह्मलोकभोगमभिव्याप्य किमपि नेच्छामि ते कालात्मना
उरुविक्रमेण विलुलितान् विध्वस्तान् अणिमादीनपि २४॥

श्री॰ किंचवर्तमानकालेनभोगाद्देइत्याहकुत्रेति श्रुतिःश्रवणंतदेवसुखंयासुता मृगतृष्णिकावन्मिथ्याभूताः चाशिषः क्व अशेषा·
भा॰ णांरुजांरोगाणांविरोहउद्भवस्थानं क्वचेदंकलेवरं एवंचेत्सर्वोपिजनःकिंनविरज्यतेतत्राह यदपियद्यपिइतिएवंविद्वान
स॰ यंजनस्तथापिननिर्विद्यतेविरक्तोनभवति कुतः कामएवानलः तं मधुलवैः सुखलवैः दुःसाध्यैरपिशमयन् कामाग्निपूर्
टी॰ मनव्यग्रस्यनिर्वेदेप्यवकाशोनास्तीत्यर्थः यद्वा अचिंत्यमिदंत्वन्मायाचेष्टितमितिभावः २५ तर्हित्वंकथंनिर्विण्णोसि अत
३९

कुत्राशिषः श्रुतिसुखामृगतृष्णिरूपाः क्वेदंकलेवरमशेषरुजांविरोहः निर्विद्यतेनतुजनोयदपीति
विद्वान्कामानलंमधुलवैःशमयन्दुरापैः २५ क्वाहंरजःप्रभवईशतमोधिकेस्मिन् जातःसुरेतर
कुलेक्वतवानुकंपा नब्रह्मणोनतुभवस्यनवैरमायायन्मेर्पितःशिरसिपद्मकरःप्रसादः २६ ॥

द्वेपिमयिप्रवृत्तयात्वत्कृपयैवेत्याशयेनाह क्वेति रजसैवप्रभवोजन्मयस्यसः सप्तम्यंतंवाकुलविशेषणं ॥
तमोधिकंयस्मिन्तस्मिन्नसुराणांकुलेजातोहंक्व क्वचतवानुकंपा तामेवाह ब्रह्मादीनांशिरसियोनैवा
र्पितः सपद्मवत्सकलसंतापहरःकरःप्रसादः पुरुषार्थरूपोमेशिरस्यर्पितइतियत् ययानुकंप ३९
येतिवा २६

नचत्वदीयमतिचित्रं इत्याह नैषेति॥ एते ब्रह्मादय उत्तमा अयमसुरो नीच इत्येषा परावरमतिः जंतोः प्राकृतस्य यथा तथा भवतो नैव स्यात् अत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वत्र मत्प्रसाद एकरूपश्च किं न स्यात्तत्राह संसेवया तव प्रसादो भवति तत्र च सेवानुरूपं तत्तदिच्छानुसारेण धर्मादीनामुदयो भवति एवं सत्यपि वैषम्याभावे दृष्टांतः सुरतरुर्यथा सेवकस्यैव संकल्पानुसारेण फलं ददाति न च विषमस्तद्वत् न च परावरत्वमत्र कार

नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथात्मसुहृदो जगतस्तथापि संसेवया सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न परावरत्वम् २७ एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन् प्रसंगात् कृत्वात्मसात्सुरर्षिणा भगवन् गृहीतः सोहं कथं नु विसृजे तव भृत्यसेवाम् ॥

॥ २८ ॥

णमिति शेषः २७ एतच्च त्वद्भृत्यकृपया मया प्राप्तमिति त्वद्भृत्यपार्श्वमेव मां नयेत्याशयेनाह॥ एवमिति यथा त्वयानुकंपितोस्मि एवं नारदेनात्मसात्कृत्वा पूर्वमनुगृहीतः सोहं कथं नु त्वद्भृत्यसेवां विसृजामि कथंभूतो नुगृहीतोस्मि प्रभव एवाहियुक्तः कूपः तस्मिन् कामानभितः कामयमानं जनं निपतितमनु तत्प्रसंगात्प्रपतन्तोहं तदेवं त्वद्भृत्यश्रीनारदस्यानुग्रहेण त्वयात्यंतमनुकंपितोस्मि अयमेव च मम परमोनुग्रहः न तु नरिदमतितुच्छमत्राणरत्नाणादि २८ श्रीराम राम

श्री॰ नचेदंत्वयामदनुग्रहार्थेकृतंकिंत्वन्यार्थमित्याह॥ भोअनंतयदेतत्प्राणरक्षणंमांहंतुमुद्यतस्यमत्पितुर्वधश्च
भा॰ तदुभयंस्वभृत्यऋषिवाक्यमृतंविधातुमित्यहंमन्ये ऋतः यद्यस्मात् असत् अयुक्तंविधित्सुःखड्गंप्र
स॰ गृह्यावोचत् किंमदपरोमद्व्यतिरिक्तश्चेदीश्वरोस्तितर्हित्वामिदानींअवतुनवकंशिरोहंहरामीतिपाठांतरे
टी॰ प्ययमेवार्थः यद्यदावोचत् तदामत्प्राणरक्षणमितिवान्वयः एतच्चसत्यंविधातुंनिजभृत्यभावितमित्य
४० त्रैवबहुधाव्याख्यातं २९ नचेदंपक्षपातेनरक्षणंदैत्यहननंचत्वयिस्वाभाविकं किंतुमायागुणोपाधिकं॥

मत्प्राणरक्षणमनंतपितुर्वधश्चमन्येस्वभृत्यऋषिवाक्यमृतंविधातुं खड्गंप्रगृह्ययदवोचदसद्वि
धित्सुःत्वामीश्वरोमदपरोऽवतुकंहरामि २९ एकस्त्वमेवजगदेतदमुष्ययत्त्वमाद्यंतयोःपृथ
गवस्यसिमध्यतश्च सृष्ट्वागुणव्यतिकरंनिजमाययेदंनानेवतैरवसितस्तदनुप्रविष्टः ३०॥

सर्वात्मकेत्वयिस्वतस्तदयोगादित्याह एकइति एतज्जगत्त्वमेवैकः यद्यतः अमुष्यादावंतेचपृथगवस्यसि वि
रामंकरोषि सन्मात्रतयाकारणत्वेनावधित्वेनचवर्तसेइत्यर्थः अतोमध्यतश्चत्वमेव ऋतस्तर्हिभेदप्रतीतिः तत्राह॰
निजमाययागुणपरिणामात्मकमिदंजगत्सृष्ट्वा तदनुप्रविष्टः त्वंतैर्गुणैर्द्वैतरूपैर्नानेवरक्तकइवहंतेवच अव
सितःप्रतीतः तदुक्तं स्कंधोपक्रमे निर्गुणोपिह्यजोव्यक्तोभगवान्प्रकृतेःपरः स्वमायागुणमाविश्यबाध्यबा
धकतांगतइत्यादि ३०॥ ४०

नन्वयद्युत्पन्नं जगदिदमेव तर्हि जगतो वैषम्येण ममवैषम्यमपि किं न स्यादित्यत आह त्वं वै त्वमेवेदं सदसत्का
र्यकारणात्मकं जगत् न तत्त्वतः पृथक् भवांस्तु ततो ऽन्यः आद्यन्तयोः पृथगवस्थानात् यद्यस्मादेवं अतो ऽयमात्मीयो ऽयंपर
इति या बुद्धिः सा अपार्था मायैव कार्यकारणाभेदं दृष्टान्तेन साधयति यद्यस्मात् यस्य जन्मादि लक्षणं प्रकाशश्च यस्मिन्निधनं च स्थि
तिश्च तद्वैतदेव वसुधिबीजं कारणं ततः कार्यं तयोर्यथा वस्तुकालमात्रत्वं ग्रथमर्थः कालप्राहेन नीलत्वा साधारणगुणयो
गात् पृथ्वी वस्तुप्राहेन वस्तुमात्रं भूतस्त्वं न तत्त्वं तरोर्यथा पृथ्वीमय बीजमात्रत्वं तस्य च यथा भूतस्त्वमात्रत्वं एवं स

त्वं वा इदं सदसदीश भवांस्ततो ऽन्यो मायायदात्मपरबुद्धिरियं ह्यपार्था यद्यस्य जन्म निधनं स्थितिरी
क्षणं च तद्वैतदेव वसुकालवदष्टितर्वोः ३१ न्यस्येदमात्मनि जगद्विलयाम्बुमध्ये शेषेत्वात्मना निज
सुखानुभवो निरीहः योगेन मीलितदृगात्मनिपीतनिद्रः तुर्ये स्थितो न तु तमो न गुणांश्च युंक्षे ३२

एवमपि कार्यकारणात्मकं जगत् परमकारणात्मकमेवेति तथा च पारमर्षं सूत्रं तदनन्यत्वमारंभणशब्दादिभ्य इ
ति श्रुतिश्च वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति ॥ ३१ ॥ न च तावदंते पृथगवस्थानं दर्शयति न्यस्येति इदं ×न्य
जगत् आत्मनात्मनैवात्मनि निक्षिप्य स्वसुखमेवानुभवन्निष्क्रियः सन् प्रलयोदकमध्ये शयनं करोषि न हि किं
जीवस्येव ममापि तमोवृत्तिरूपा निद्रास्ति नहि नहि योगादेव तद्वहिर्हेत्वभावसाम्यात् विशेषयन्नित्याह ॥ यो
गेन मीलिते दृशौ येन आत्मनास्वरूपप्रकाशेन निपीतानिद्रा येन, यस्तु तुर्ये अवस्थात्रयातिरिक्तो स्वरूपे स्थि
तस्त्वं न तु तमस्तमइवात्मानात्मो पुंन्ले योजयसि न प्रपश्यसि न जाग्रत्स्वप्नयोरिव गुणान् विषयान् चेत्यर्थः ॥
३२

श्री० इदानीं कारणत्वेनादावपि पृथगवस्थानं दर्शयन्न ध्यानशुद्धत्वमेवेत्येतत्प्रपंचयति चतुर्भिः यस्त्वमशेषः शेषे तस्यैव तेइ
भा० दं जगत्त्वपुः स्वरूपं तान्यस्य यत्तत्त्वं मध्यतोऽपि स्याः कथंभूतस्य निजया कालशक्त्या संचोदितः प्रवृत्तधर्मः सत्त्वादु
स० णोयेनस्वरूपत्वेदेतः अनंतशायनात् शेषपर्यंकात् विरमत्समाधियस्य तस्य तवनाभेः सकाशादेकालीवोदके महाब्ज
टी० लोकपद्मं अभूत् कथंभूतं आत्मनि तत्त्वे एवगुहं सत् स्वकर्णिकातः स्वत्वादृष्टबीजान्महावटइव २३ तदेवकारणत्वेना
४१

तस्यैवतेवपुरिदंनिजकालशक्त्यासंचोदितप्रकृतिधर्मेणआत्मगूढं अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेर
भूत्स्वकर्णिकावटवन्महाब्जं २२ तत्संभवः कविरतोन्यदपश्यमानः त्वां बीजमात्मनि ततं स्वब
हिर्विचिंत्य नाविंददब्दशतमप्सुनिमज्जमानो जातेंकुरे कथमु होपलभेत बीजं २३ सत्वात्मयोनिरतिवि
स्मितआस्थितोब्जं कालेनतीव्रतपसा परिशुद्धभावः त्वामात्मनीश भुवि गंधमिवातिसूक्ष्मंभूतेंद्रियाशयमयेवि
ततं ददर्श २४

नुगतः सन्नध्यानशुद्धत्वमेव वर्णे(स)इत्युक्तं एतदेव स्तुवन् सत्वस्य ब्रह्मणोऽनुभवेन स्फुटयितुं तस्य प्राक्तनीमवस्थामाह तस्मिन्नब्जे सं
भवोयस्य सः कविर्ब्रह्मा अतः पश्चादन्यदपश्यन्बीजभूपादानकारणभूतं त्वां स्वस्मिन्व्याप्तं संतमपि नाविंदत् प्रवृत्ते चेतन उदअहो
संकुरेजातेसति बीजं तदनुगतं कारणं पृथक्‌कथं नाम पश्यमान्यपश्येत २४ भवदुपासनया तत्स्वस्मिन्नेव दृष्टवानित्याह स
विति परावृत्यान्नमास्थितः सन् तीव्रेण तपसाध्यानेन सत्त्वात्मरूपेणोपादानतया दर्शनमुक्तं २५ राम राम राम

राम० ४१

ईश्वरत्वेन च दृष्टा हतार्थो भवतीत्याह एवमनेन प्रकारेण सहस्रपरिमितानि यानि वदनादीनि तैराढ्यं सद्रूपं मायामयं मा
यया प्रधानं सत्ताप्रपंचेनोपलक्षितः सन्निवेशः पादादिरचना यस्य ३६ ततो भवांस्तस्मान्नु ग्रहं कृतवानित्याह तस्मा इति ॥
हयग्रीवमूर्तिं बिभ्रत्सन् रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान् समर्पितवान् तद्देहः सत्त्वमिति ३७
एकत्वमेवेत्याहेत्थमिति रत्नाभिः श्लोकैर्यदुक्तं पक्षपातेन रक्षणं तद्विपक्षवधश्च सत्वोपाधिको न तत्त्वत इति तदुपसंहर

एवं सहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यं मायामयं सदुपलक्षितसन्निवेशं दृ
ष्ट्वा महापुरुषमापमुदं विरिंचः ३६ तस्मै भवान्हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभा
ख्यौ हत्वानयच्छ्रुतिगणांश्च रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनंति ३७ इत्थं नृतिर्यगृषिदेवझ
षावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभव
स्त्रियुगोऽथ स त्वं ३८ नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रं कामातुरं हर्ष
शोकभयैषणार्त्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ३९ राम

ति इत्थमिति विभावयसि पालयसि हंसि घातयसि कलौ तु न तथा करोषि यतः तदा त्वं छन्नोऽभवः यतः त्रिष्वपि च युगेष्वाविर्भावात् स ए
वंभूतः त्वं त्रियुग इति प्रसिद्धः ३८ तदेवं भगवतः तत्त्वं निरूप्य स्वस्य च तद्विचारायोग्यतां निवेदयन्प्रार्थयते नैतदिति त्रिभिः अ
साधु बहिर्मुखं तीव्रं दुर्द्धरं हर्षशोकभयैरेषणात्रयेण चार्त्तं दुःखितमपि त्वत्कथासु न संप्रीयते तस्मिन्नेवंभूते मनसि सति कथं
तव तत्त्वं विचारयामि ३९ राम राम

श्री॰ किंच जिह्वा अवितृप्ता सती भो अच्युत मां मांयतो मधुरादिरसः ततआकर्षति उदरं तद्वत् धासं तत्रं सय एव यत्किंचिदाहारमात्रं प्रति चपला
भा॰ दृक् चक्षुः कर्मशक्तिः कर्मेंद्रियाणि लुनंति त्रोटयंति ४० न केवलमहमेक एव एवं कर्णादपूर्णमापन्नः किंतु मद्वज्जनोप्येवमेव क्लि
स॰ श्यति अतः सर्वं जनं पालयेति प्रार्थयते एवमिति भवः संसार एव वैतरणी यमनदी तस्यां अन्योन्यतो यानि जन्मादीनि तेभ्यो
७२ ति भीतं स्वेषां परेषां च विग्रहे यथा यथे वैरं मैत्रं च यस्य एवं मूढं जनं पश्यन् त्वं हे पारचर तस्याः पारे स्थित नित्यमुक्त हंते

जिह्वैकतोच्युत विकर्षति मावितृप्ता शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित् घ्राणोन्यतश्चपलदृक् क्व च कर्मशक्ति
र्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ४० एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतं
पश्यन् जनं स्वपरविग्रहवैरमैत्रं हंतेति पारचर पीपृहि मूढमद्य ४१ कोन्वत्र तेखिलगुरो भगवन्प्रयास उत्ता
रणेस्य भवसंभवलोपहेतोः मूढेषु वै महदनुग्रह आर्तबंधो किं तेन ते प्रियजनाननुसेवतां नः ४२ राम

ति अहो कष्टमित्येवमनुकंप्य अद्यापि पीपृहि वैतरणीमुत्तार्य पालय ४१ एकेन मया कथं सर्वो जनस्तारणीय इति चेत्तत्रा
ह कोन्विति को नु ते अत्र सर्वजनोत्तारणे प्रयासः न कोपि कुतः अस्य विश्वस्य भवसंभवलोपानां उत्पत्तिस्थितिसंहाराणां हेतोः
ततोपि किमेतत्तदुष्करमिति भावः उचितं चैतदित्याह मूढेष्विति त्वां चात्वदीयोस्म तारयिष्यामि इमं तु राग्रहं माकृथा इति चेत्तत्राह तत
वये प्रियजनाः भक्ताः ताननुसेवमानानां नोस्माकं तेन उत्तारणेन किं कोति प्रयासो स्वखालवाह्वे : कोन्वत्र तेखिलगुरो
भगवन्प्रयासः प्रह्लाद इत्थमुपमंत्र्य मिथ्योन राणामीप्सो न सख्यमकरोदपनीयमायां ॥ ४२ ॥ श्रीराम ॥ राम ॥

राम॰
७२

वत्सप्रह्लादत्वांतावत्तारयिष्यामितावतैवकृतार्थस्त्वयाः किमनेननिर्बंधेनेत्यतआह नैवेति हे परसर्वोत्तमत्वद्वीर्यगायनमेव।
महामृतंतस्मिन्मग्नंचित्तंयस्यसोहंभववैतरण्याः नैवोद्विजेकिंतुविमूढान्प्रतिशोचामितानेवाहततोमहामृताद्विमुखंचे
तोयेषामन्युतइंद्रियार्थनिमित्तंयन्मायासुखंतेनदर्पभरंकुटुंबादिभारमुद्वहतः॥४३॥ त्वंतावन्मुक्तिंगृहाणलोकास्तुनत्वत्ता॥
मुनयउपदेक्ष्यंतीतिचेत् तत्राह प्रायेणेति॥ नविमुमुक्षे विमुक्तिंनेच्छामि नह्येकमपिप्रार्थय मामेवकिमितिनिर्बंधआसी

नैवोद्विजेपरदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः शोचेततोविमुखचेतसइंद्रियार्थमा
यासुखायभरमुद्वहतोविमूढान्॥४३॥ प्रायेणदेवमुनयःस्वविमुक्तिकामामौनंचरंतिविजनेनपरार्थनि
ष्ठाः नैतान्विहायकृपणान्विमुमुक्षएकोनान्यंत्वदस्यशरणंभ्रमतोनुपश्ये ४४ यन्मैथुनादिगृहमेधिसु
खंहितुच्छंकंडूयनेनकरयोरिवदुःखदुःखं तृप्यंतिनेहकृपणाबहुदुःखभाजःकंडूतिवन्मनसिजंविषहेत
धीरः ४५

तिचेदतआहत्वत्तोऽन्यमस्यजनस्यशरणंनपश्यामि ४४ नन्वेतेस्त्रीसंभोगादिनासुखिनएवनकृपणाः तत्राहयदिति॥ कर
योःकंडूयनेनसंघर्षणेनेवदुःखमनुदुःखंयस्मिन्तद्दुःखत्वादेवततोनिर्विण्णमुच्येरन् तत्राह कृपणाः कामुकाः बहुदुःखभा
जोपिगृहमेधिसुखेनतृप्यंतिअलमितिनमन्यंतेकंडूतिवत्कामस्यदुःसहत्वात् ननुकेचित्कंडूतिमपिस
हंतेकामंचेत्तत्राहत्वत्प्रसादात्तुकश्चिद्धीरएवमनसिजंकामंविषहेत नतुसर्वेअत्रापिकंडूतिवदितिदृष्टांतः
श्रीराम राम ॥ ४५ श्रीरामायनमः राम राम राम

श्री॰ ननुमौनादिभिर्मौनसाधनैः फलमेवतेषामपिमुक्तिः तत्राह मौनेनेति हेउद्धव अयंनर्योमिच ये मौनादयो दण्डास्ताएवापवर्गाः अपवर्ग
भा॰ हेतवः प्रसिद्धाः रहः विविक्तवासः तेनप्राणायामः अजितेंद्रियाणांइंद्रियभोगायअर्थोपार्जने विक्रीणतां वाज्ञोः जीवनोपाया भवंतीतिदां
स॰ भिकानांवार्तो अपिभवंतिवानवारंभस्यानियतफलत्वात् ४६ त्वज्ज्ञानेनतुभक्तिंविनासकामैर्मौनादिभिर्नभवत्येवेत्याह ॥
७३ रूपेइति त्रिभिः बीजांकुराविव प्रवाहापन्नेइमेसदसतीकार्यकारणेएवतेरूपेउपलक्षणभूतेवेदेनस्पृष्टेप्रकाशिते नचान्य

मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः प्रायः परं पुरुष ते त्वजितेंद्रिया
णां वार्ता भवंत्युत न वात्र तु दांभिकानां ४६ रूपे इमे सदसती तव वेदसृष्टे बीजांकुराविव न चान्यदरू
पकस्य युक्ताः स मक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ४७ राम

त्वत्स्वरूपमवेतं गोरत्वादिकमिव देवदत्तादेः अतः अरूपकस्य प्राकृतरूपादिरहितस्य अतः युक्ताः संयता एव भक्तियोगेन
मथ्यत्वं त्वामुभयत्र कार्यकारणे चानुगतं पश्यंति मथनेन दारुषु वह्निमिव नान्यतः स्यात् ज्ञानमिति शेषः यद्वा
ज्ञानप्रकारमेवाह उभयमप्यतः प्रधानपरमाण्वादेर्न स्यात् सर्वेषु तेष्वादिभूतेः अतस्त्वमेव कारणत्वात्सर्वज्ञात्
स्रनइति ४६ राम

तदेवाह त्वं वायुरिति हृदयं मनः चित् चिद्वृत्तिः अनुग्रहः अहंकारः देवतावर्गो वा सगुणः स्थूलः विगुणः सूक्ष्मः मनश्च वचश्च मनोव
चः तेन निरुक्तं यत्कार्यं तत्किमपि त्वत्तोन्यन्नास्ति ४८ अभक्तास्तु त्वन्निर्गुणमपि त्वां न जानन्तीत्याह नेति नैते गुणा अभि
मानिनो देवाः आद्यन्तवन्तः जडोपाधित्वात् अनाद्यन्तं निरुपाधिं त्वां न विदन्ति हि यस्मात् सुधियो विद्वांसः एवं विचार्य शाब्दात्
अध्यापनादिव्यापारादुपरमन्ति त्वामेव समाधिनोपासत इत्यर्थः॥ तथा च श्रुतिः किमर्था वयमध्येष्यामहे किमर्था वयं य

त्वं वायुरग्निरवनिर्वियदम्बु मात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्य
त्वदस्त्यपि मनोवचसा निरुक्तं ४८ नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः आ
द्यन्तवन्त उरुगाय विदन्ति हि त्वामेवं विमृश्य सुधियो विरमन्ति शाब्दात् ४९ तत्तेऽर्हत्तम नमः स्तुतिकर्मपूजाः
कर्म स्मृतिश्चरणयोः श्रवणं कथायां संसेवया त्वयि विनेति षडङ्गया किं भक्तिं जनः परमहंसगतौ लभेत ५०

स्यामहे इति नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति च स्मृतिश्च यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति त
दा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेत्यादि ४९ उपसंहरति तत्ते इति हे अर्हत्तम नमः स्तुतिकर्मपूजाः प्रणिपात
स्तुति सर्वकर्मार्पणानि कर्म परिचर्या चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडङ्गया सम्यक् संसेवया विना प
रमहंसानां गतौ प्राप्ये त्वयि जनः कथं भक्तिं लभेत यस्मादेवं भक्तिं विना न मोक्षो न च भक्तिः संसेवया विना अतः प्रा
क्प्रार्थितं दास्ययोगमेव देहीति प्रकरणार्थः ५०

एतावंतोवर्णितागुणायस्य यतमन्युः उपसंहृतकोपः ५१ कामान्छंदयतीतितथा यद्वा
पुरुषार्थप्रवादोस्मीत्यर्थः ५२ अप्रीणतः अप्रीणयतः तन्नुअपूर्णकामत्वेनप्रोचितं॥
॥५३॥

नारदउवाच एतावद्वर्णितगुणोभक्त्याभक्तेननिर्गुणः प्रह्लादंप्रणतंप्रीतोयतमन्युरभाषत
५१ श्रीभगवानुवाच प्रह्लादभद्रंतेप्रीतोहंतेसुरोत्तम वरंवृणीष्वाभिमतंकामपूरोस्म्यहंनृणा
म्॥५२॥मामप्रीणतआयुष्मन्दर्शनंदुर्लभंहिमे दृष्ट्वामांनपुनर्जंतुरात्मानंतप्तुमर्हति
५३॥ प्रीणंतिह्यथमांधीराः सर्वभावेनसाधवः॥ श्रेयस्कामामहाभागाः सर्वासामाशि
षांपतिम् ५४ एवंप्रलोभ्यमानोपिवरैर्लोकप्रलोभनैः ऐकांतित्वाद्भगवतिनैच्छत्तान
सुरोत्तमः॥५५ ॥ इतिश्रीभागवतेसप्तमस्कंधेनवमोध्यायः॥ ९॥ ॥ श्रीराम॰
^प्रह्लादानुचरितेभगवत्स्तवो

प्रीणंतितोषयंति ५४ ऐकांतित्वात्[क] निरुपाधिभक्तत्वात् ५५ ॥ ॥ इतिश्रीभागव
तेभावार्थदीपिकायांनवमोध्यायः॥ ९॥ ४४

दशमेत्वनुगृह्यापि भक्तमंतर्हितेहरौ प्रसंगाद्धरिणारुद्रेकृतोनुग्रहईर्यते॥ तत्सर्वं वरजातं १ उत्पत्त्या
स्वभावेनैवासक्तं मां तेषां कामानां संगाद्भीतः २ ननु किमहं भक्तं प्रलोभयामि नहि किंतु वरं वृणीष्वेति वदत
स्तवाभिप्रायोन्य एवेत्याह॥ भृत्यलक्षणेति॥ हृदयग्रंथिषु बंधकेषु अन्यथा अनर्थसाधने प्रवर्तनं न घटेते त्यर्थः॥
त्यर्थः ३ ॥

नारदउवाच भक्तियोगस्य तत्सर्वं मंतरायतयार्भकः मन्यमानो हृषीकेशं स्मयमानमुवाच ह॥
१ प्रह्लादउवाच मा मां प्रलोभयोत्पत्त्यासक्तं कामेषु तैर्वरैः तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वा
मुपाश्रितः २ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् भवान्संसारबीजेषु हृदयग्रंथि
षुप्रभो नान्यथा तेखिलगुरो घटेत करुणात्मनः ३ यस्त आशिष आशास्ते न स भृत्यः स वै
वणिक् आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति
चाशिषः ४ ॥

कथमेवं भृत्यलक्षणज्ञानं स्यात् तत्राहायइति॥ तत्त्वतः न तु कामनयापि सेव्यसेवकयोः स्वामिभृत्यभावः प्र
सिद्धः सत्यं सोपाधिकोसौ न तु तात्त्विक इत्याह॥ स्वामिन्यात्मनः आशिष अपेक्षमाणो नैव भृत्यः भृत्यहे
तुकमात्मनः स्वाम्यमिच्छन् यो भृत्याय ददाति स च नैव स्वामी ४ ॥

आवयोस्तुनान्विकोसावित्याह अहंत्विति॥ अनपाश्रयोनिरभिसंधिः अन्यथाकामाद्यभिसंधिना अर्थःप्रयोजनंनास्ति ५ ननु॰
तथापिपरमोदारस्यममकिमपितोषार्थंहणीयेतिचेदतआह यदीति कामांकुराणां असंरोहं अनुत्पत्तिंभवतःसकाशा
त् ६ ननुकामोत्पत्तौसत्यांकोदोषस्तत्राह इंद्रियादीनि यस्यजन्मनानश्यंतीति आत्मादेहः॥कामाभावेगुणमाह
विमुंचतीति भगवत्त्वायत्वत्समानैश्वर्याय तथाचश्रुतिः यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः अथमर्त्योमृतो
भवत्यत्रब्रह्मसमश्नुतेइति ८ निर्दोषान्कामान्दातुमिच्छंतंप्रत्याहव्यास्यन्नमस्यति ॐनमइति ९ सत्यमेकांतभक्तस्त्वं

अहंत्वकामस्त्वद्भक्तः त्वंचस्वाम्यनपाश्रयः नान्यथेहावयोरर्थोराजसेवकयोरिव ५ यदिरासीशमेकामा
न्वरांस्त्वंवरदर्षभ कामानांहृद्यसंरोहंभवतस्तुवृणेवरं ६ इंद्रियाणिमनःप्राणआत्माधर्मोधृतिर्मतिः ह्रीःश्रीः
तेजःस्मृतिःसत्यंयस्यनश्यंतिजन्मना ७ विमुंचतियदाकामान्मानवोमनसिस्थितान् तर्ह्येवपुंडरीकाक्षभग
वत्त्वायकल्पते ८ ॐनमोभगवतेतुभ्यंपुरुषायमहात्मने हरयेद्भुतसिंहायब्रह्मणेपरमात्मने ९ नृसिंहउ
वाच नैकांतिनोमेमयिजात्विहाशिषआशासतेमुत्रचयेभवद्विधाः अथापिमन्वंतरमेतदत्रदैत्येश्वराणा
मनुभुंक्ष्वभोगान् १० कथामदीयाजुषमाणःप्रियास्त्वमावेश्यमामात्मनिसंतमेकं सर्वेषुभूतेष्वधियज्ञमीशंयजस्व
योगेनचकर्महिन्वन् ११

तथापिमदाज्ञाकरणीयाइत्याह नेति॥ मेएकांतिनःकदाचिदपिइहामुत्रचमत्त्याशिषोनवांछंत्येव तथाप्येतन्मन्वंत
रमात्रंभोगान्भुंक्ष्व १० ननुतर्हिबंधःस्यादित्यतआह कथाइतिद्वाभ्यां॥ सर्वेषुभूतेषुसंतमेकमीशं यज्ञाधिष्ठातारं मामा
त्मन्यावेश्ययजस्वतर्हिअनेनैवकर्मणाबंधःस्यात्नेत्याह योगेनमय्यर्पणेनकर्महिन्वन्त्यजन्यजस्व॥ ११ श्रीराम॰ ४५

किंचभोगेनस्वस्यानुभवेनप्रारब्धंपुण्यंहित्वामुक्तबंधःसन्लोकानुग्रहार्थंकीर्तिंचवितत्यमामप्यसिकुशलेनपुण्यावरणेनपापंहित्वे
तिविभीषामात्रंअन्यथातस्यराज्ये,प्रवृत्तेः नतुतस्यप्राचीनंपापमस्तितदधिगमेउत्तरपूर्वा‚घयोरश्लेषविनाशौभवतः तद्व्यपदेशादिति
न्यायात् तत्सुकृतदुष्कृतेविधुनुतइतिश्रुतेश्चनचेदंप्रारब्धपापाभिप्रायंतस्यभोगेनैवक्षयात् कुशलेनहित्वेतिवचनानुपपत्तेः
नचासावविद्वानितिवाच्यंभगवतैवकृतार्थत्वस्यानंतरंवक्ष्यमाणत्वात् अतएवयोगेनकर्मेहित्वत्रि [illegible] नीदृशमपिलोकसंग्रहार्थं
कर्मणिप्रवर्तितस्यानुद्वेगमात्रायेतिसर्वमनवद्यं १२ किंचयद्गीतंत्वांचमांचइदंमच्चरितंचस्मरन्तेनत्वत्तोवंधःकीर्तयेत्सोपि

भोगेनपुण्यंकुशलेनपापंकलेवरंकालजवेनहित्वा कीर्तिंविशुद्धांसुरलोकगीतांवितायमामेष्यसिमुक्तबंधः १२ यएतत्की
र्तयेन्मह्यंत्वयागीतमिदंनरः त्वांचमांचस्मरन्कालेकर्मबंधाद्विमुच्यते १३ प्रह्लादः वरंवरयएतत्तेवरदेशान्महे
श्वर यदनिंदत्पितामेत्वामविद्वांस्तेजऐश्वरं १४ विद्धामर्षाशयःसाक्षात्सर्वलोकगुरुंप्रभुं भ्रातृहेतिमृषादृष्टिः
त्वद्भक्तेमयिचाघवान् १५ तस्मात्पितामेपूयेतदुरंताद्दुस्तरादघात् पूतस्तेपांगसंदृष्टः तदाकृपणवत्सल।
१६ श्रीभगवानुवाच त्रिसप्तभिःपितापूतःपितृभिःसहतेनघ यत्साधोस्यगृहेजातोभवान्वैकुलपावनः १७
यत्रयत्रचमद्भक्ताःप्रशांताःसमदर्शिनः साधवःसमुदाचाराःतेपूयंत्यपिकीकटाः १८ सर्वात्मनानहिंसंतिभूतग्रामे
षुकिंचन उच्चावचेषुदैत्येंद्रमद्भावेनगतस्पृहाः १९

कर्मबंधाद्विमुच्यतेकुतःतवबंधशंकेत्यर्थः १३ ईश्वरात्मा स्वकर्मोधिकारःममपितुर्निष्कृतिंप्रार्थयतेत्रिभिः वरंवरणीयमेतद्य
रेशूरणेतत्त्वतः १४ विद्धोमर्षेणक्रोधेनआशयोयस्य । तेऽपांगेनसंदृष्टःअतःएतदेवतथापिभोःकृपणवत्सलकार्पण्येनप्रार्थये
इत्यर्थः १६ यद्यपिकश्यपोमरीचिर्ब्रह्मा [illegible] चेतित्वत्पितुःत्रयएवपूर्वजाः तथापित्रिसप्तभिःसहेतिमातृकुलस्यगतपितृभिःसा
येनोक्तं १७ यैर्यस्मात्सम्यगुन्मद्भावाचारोयेषांतेकीकटाअपिदेशाःतत्तुल्यावंशाश्चपूयंतेशुद्धाभवंति १८ ननुत्वद्भक्तौना
मयंमद्धिमेतिनचितं अहंतुनादृशोनभवामीतिचेत्नत्वंसर्वात्मनेतिद्वाभ्यांमद्भावेनमद्भक्त्याविगतास्पृहायेषां १९ राम

त्वामनुव्रतास्ते लोके विष्णुरूपाः तेप्येवंलक्षणाःसंतोमद्भक्ताभवंति अतोभवान्मेभक्तानांसर्वेषांप्रतिरूपधृक् उपमानास्पदं श्रेष्ठःखल्वित्यर्थः २०
मदंगस्पर्शनेनसर्वेषाःपूतस्यतेपितुः पापशंकैवनास्तिकेवलंपुत्रकृत्यानिप्रेतकार्याणिकुरु २१ वेदवादिभिरुक्तमनतिक्रम्यमत्परः

भवंतिपुरुषालोकेमद्भक्तास्त्वामनुव्रताः भवान्मेखलुभक्तानांसर्वेषांप्रतिरूपधृक् २० कुरुत्वंप्रेतकृत्यानिपितुःपूतस्य
सर्वेषाः मदंगस्पर्शनेनांगलोकान्यास्यतिसुप्रजाः २१ पित्र्यंचस्थानमातिष्ठयथोक्तंब्रह्मवादिभिः मय्यावेश्यमनस्ता
तकुरुकर्माणिमत्परः २२ नारदउवाच प्रह्लादोपितथाचक्रेपितुर्यत्सांपरायिकं यथाहभगवान्राजन्नभिषिक्तोद्वि
जोत्तमैः २३ प्रसादसुमुखंदृष्ट्वाब्रह्मानरहरिंहरिं स्तुत्वावाग्भिःपवित्राभिःप्राहदेवादिभिर्वृतः २४ ब्रह्मोवाच दे
वदेवाखिलाध्यक्षभूतभावनपूर्वज दिष्ट्यातेनिहतःपापोलोकसंतापनोसुरः २५ योसौलब्धवरोमत्तोनवध्योममसृ
ष्टिभिः तपोयोगबलोन्नद्धःसमस्तनिगमानहन् २६ दिष्ट्यास्यतनयःसाधुर्महाभागवतोर्भकः त्वयाविमोचितोमृत्योर्दि
ष्ट्यात्वांसमितोधुना २७ एतद्वपुस्तेभगवन्ध्यायतःप्रयतात्मनः सर्वतोगोप्तृसंत्रासान्मृत्योरपिजिघांसतः २८ श्रीनृ
सिंहउवाच मैवंवरोसुराणांतेप्रदेयःपद्मसंभव वरःक्रूरनिसर्गाणामहीनाममृतंयथा २९ नारदः इत्युक्त्वाभ
गवान्राजंस्ततश्चांतर्दधेहरिः अदृश्यःसर्वभूतानांपूजितःपरमेष्ठिना ३० ततःसंपूज्यशिरसाववंदेपरमे
ष्ठिनं भवंप्रजापतीन्देवान्प्रह्लादोभगवत्कलाः ३१ ततःकाव्यादिभिःसार्द्धंमुनिभिःकमलासनः दैत्यानांदानवा
नांचप्रह्लादमकरोत्पतिं ३२ प्रतिनंद्यततोदेवाःप्रयुज्यपरमाशिषः स्वधामानिययूराजन्ब्रह्माद्याःप्रतिपूजिताः ३३

मत्कर्माणिकुरु २२ स्पष्टान्येतानि मत्सृष्टिभिर्मयासृष्टैस्तैः समस्तान्निगमान्धर्मानित्यर्थः अहन्नहतवान् सत्वयाहतः २६ ए
तद्दिष्ट्यासमितःसम्यक्प्राप्तः २७ सर्वतःसंत्रासात्गोप्तृरक्षकं एवंवरस्त्वयानप्रदेयः क्रूरोनिसर्गःस्वभावोयेषांअमृतंक्षीरं २९
शिशुपालदंतवक्त्रयोःद्विषतोःश्रीकृष्णसायुज्यंकथमितियत्पृष्टंतदेवतयोःपूर्वजन्मकथनादिभिरुपपादितमुपसंहरतिएवमितिसम
भिः ३३ राम

दितेः पुत्रत्वं प्रापितौ विप्रशापेन पुनरत्रानुषंगः ३४ ३५ तस्मिन्नेतौ श्रीरामं चिंतयंतौ ३६ करूषजो दंतवक्त्रः द्वौ सायुज्यं समीयतुः ३७ कृ
ष्णनिंदादिना सर्वेकृतं च पापं तत् ध्यानेन तदात्मानः संतो जहुः तदात्मत्वे दृष्टांतः कीटः पेशस्कृतो ध्यानेन यदीतदात्मा भवती
त्ति ३८ अभिदा भेददर्शनम् स्फूर्त्यया ३९ हरेः सात्म्यं सारूप्यं ४० प्रह्लादचरितार्थमुपसंहरति एषेति चतुर्भिः अवतारः श्रीनृसिंह

एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ३४ पुनश्च विप्रशापेन राक्षसौ तौ बभू
वतुः कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ३५ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः तच्चित्तौ जहतुर्देहं यथा प्राक्त
नजन्मनि ३६ ताविहाथ पुनर्जातौ शिशुपालकरूषजौ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः ३७ एनः पूर्वकृतं यत्त
द्राजानः कृष्णवैरिणः जहुस्त्वंते तदात्मानः कीटः पेशस्कृतो यथा ३८ यथा यथा भगवतो भक्त्या परमयाभिदा नृपाश्चैद्या
दयः सात्म्यं हरेस्तच्चिंतया ययुः ३९ आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान् दमघोषसुतादीनां हरेः सात्म्यमपि द्विषां ४०
एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ४१ प्रह्लादस्यानुचरितं महाभागवत
स्य च भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनं ४२ परावरेषां स्थानानां का
लेन व्यत्ययो महान् धर्मा भागवतानां च भगवान्येन गम्यते ४३ आख्यानेस्मिन्समाम्नातमाध्यात्मिकमशेषतः ४४
य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ४५ श्रीराम राम

रूपः तस्य कथा आख्यातेति शेषः ४१ प्रह्लादस्य चरितमित्यादेः समाम्नातमिति तृतीयेनान्वयः अस्येत्यनेनोक्तं सर्गस्थित्यप्यया
नामीशस्य हरेर्याथात्म्यं तत्त्वं अनेन कृतं हरेर्गुणकर्मानुवर्णनं चेत्यर्थः ४२ परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां च
न्ययो विपर्यासः ४३ आध्यात्मिकं आत्मानात्मविवेकादि ४४ एतत्श्रवणादिफलमाह य इति द्वाभ्यां एतत् श्रुत्वा यः कीर्तयेत्त
४५ राम

श्री॰ भा॰ स॰ टी॰ ४७

एतत् एतां मृगेंद्रस्य लीलां तामेवाह दैत्येंद्रस्य यूथपानां च वधं यः शुचिः सन् पठेत् पुण्यमनुभावं प्रभावमपि निश्चयं वा लोकं वैकुंठं ४६ अहो
प्रह्लादस्य भाग्यं येन देवो दृष्टः वयं तु मंदभाग्या इति विषीदंतं नृपं प्रत्याह यूयमिति त्रिभिः॥ येषां युष्माकं गृहान् मुनयोऽभियंति
सर्वतः समायांति तत्कस्य हेतोः एषु गृहेषु नराकारं गूढं सत् श्रीकृष्णाख्यं परं ब्रह्म साक्षाद्वसतीति॥ ४७॥ ननु कृष्णोऽस्माकं मातु
लेयः कथं ब्रह्मेत्युच्यते तत्राह स वा इति॥ सोयं ब्रह्मैव कथंभूतः महद्भिर्विमृग्यं यत्कैवल्यनिर्वाणसुखं निरुपाधिः परमानंदः
तदनुभूतिरूपः वः युष्माकं खलु प्रियः सुहृदित्यादिरूपो भवति विधिकृत् आज्ञानुवर्ती॥ ४८॥ ननु परं ब्रह्म चेत् कथमुपस

एतद्य आदिपुरुषस्य मृगेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः पठेत दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभा
वमकुतोभयमेति लोकं ४६ यूयं नृलोके बत भूरिभागाः लोकं पुनाना मुनयोऽभियंति येषां गृहानावसतीति सा
क्षात् गूढं परं ब्रह्म मनुष्यलिंगं ४७ स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः प्रियः सुहृद्वः खलु
मातुलेयः आत्मार्हणीयो विधिकृद्गुरुश्च ४८ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं मौ
नेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ४९ श्रीराम श्रीराम श्रीराम रामराम

दस्व श्रीपुरतिः कथं वा धर्माचरणं तस्येत्यत आह न यस्य रूपं तत्त्वं भवादिभिरपि धिया स्वबुद्ध्या वस्तुतया इदमित्थमिति
साक्षान्नोपवर्णितं स युष्माकं स्वयमेव प्रसन्नोऽस्माकं तु मौनादिसाधनैः तत्प्रसादः प्रार्थनीय एवेत्याह मौनेनेति॥ स एष सा
त्वतां पतिः नः प्रसीदतु॥ नहि प्रह्लादस्य गृहे परं ब्रह्म वसति न च तद्दर्शनाय मुनयः तद्गृहानभियंति न च तस्य
मातुलेयादिरूपेण वर्तते न च स्वयमेव प्रसन्नः अतो यूयमेव ततोऽप्यतिभूरिभागा इति भावः ४९ राम राम

राम
४७

नत्वन्यैर्दुष्करं विपुरभेदादिकं श्रीरुद्रः कृतवान् स एवं श्रुत ईश्वरोऽप्यस्य तत्त्वं न जानातीति कथमित्यपेक्षायां तस्याप्येतस्माद्वाक्या
देवासौ प्रभावो न केवलस्येति वक्तुमाख्यानमुपक्षिपति स एष इति राजा युधिष्ठिर उवाच जगदीशितुर्देवस्य कीर्तिः कस्मि
न्कर्मणि मयोद्धृतवान् ५१ अनेन श्रीकृष्णेनोपबृंहितैः संवर्द्धितैः ५२ हैमीं च रौप्याः घसीचेतितिस्रः पुरो निर्माय तेभ्यो

सएषभगवान्राजन्व्यतनोद्विहतंयशः रुद्रस्यदेवस्यमयेनानंतमायिना ५० राजोवाच कस्मि
न्कर्मणिदेवस्यमयोऽहन्जगदीशितुः यथाचोपचिताकीर्तिःकृष्णेनानेनकथ्यतां ५१ श्रीनारदउवाच
निर्जिताअसुरादेवैर्युध्यनेनोपबृंहितैः मायिनांपरमाचार्यंमयंशरणमाययुः ५२ सनिर्मायपुरस्तिस्रो
हैमीरौप्यायसीर्विभुः दुर्लक्ष्यापायसंयोगादुर्वितर्क्यपरिच्छदाः ५३ ताभिस्तेअसुरसेनान्योलोकांस्त्रीन्सेश्वरान्नृ
प स्मरंतोनाशयांचक्रुःपूर्ववैरमलक्षिताः ५४ ततस्तेसेश्वरालोकाउपासाद्येश्वरंविभो त्राहिनस्तावका
न्देवविनष्टांस्त्रिपुरालयैः ५५ अथानुगृह्यभगवान्माभैष्टेतिसुरान्विभुः शरंधनुषिसंधायपुरेष्वस्त्रंव्यमुं
चत ५६ ततोऽग्निवर्णाइषवउत्पेतुःसूर्यमंडलात् यथामयूखसंदोहानादृश्यंतपुरोयतः ५७ राम

दुर्लक्ष्याविति पोषः दुर्लक्ष्यावपायसंयोगौ गमनागमने यासां दुर्वितर्क्याः परिच्छदा यासु ५३ असुराणां सेनान्यः सेनापतयः पूर्ववै
रं स्मरंतः ५४ अस्त्रं अभिमंत्रितं पाशुपतं पुरेषु व्यमुंचत ५६ ततः शरात् सूर्यमंडलात् मयूखसंदोहाः रश्मिसमूहा इव यतः येभ्यः॥
५७ राम

कूपरसे स्वयं निर्मितकूपामृते ५८ वज्रसाराः वज्रवत्दृढांगाः महौजसो महाबलाः मेघदलनाः मेघभेदिनो विद्युद्रूपा वह्नय इव ॥
५९ ६०

तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः तानानीय महायोगी मयः कूपरसेऽक्षिपत् ५८ सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ५९ विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजं तदायं भगवान्विष्णुस्तत्रोपायमकल्पयत् ६० वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ तेऽसुरा ह्यपि पश्यन्तो न न्यषेधन्विमोहिताः ६१ तद्विज्ञाय महायोगी रसपालानिदं जगौ स्वयं विशोकः शोकार्तान्स्मरन्दैवगतिं च ताम् ६२ देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ६३ अथासौ शक्तिभिः स्वाभिः शंभोः प्राधानिकं व्यधात् धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ६४ रथं सूतं ध्वजं वाहान्धनुर्वर्मशरादि यत् सन्नद्धो रथमास्थाय शरं धनुरुपाददे ६५ शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप ६६ राम

कालेमध्याह्ने ६१ ६२ आत्मनोऽन्यस्य वा द्वयोरपि वा दैवेन दिष्टं स्वपकल्पितं अपोहितुं परिहर्तुं इह कश्चिदपीश्वरः समर्थो नास्ति ६३ असौ श्रीहरिः प्रधनं संग्रामः तत्साधनं ६४ ६५ अभिजिति मध्याह्ने ६६

विमानशतानि संकुलानि संकीर्णानि येषां ते देवादयः ६७ ६८ आदित आरभ्य स्कंधार्थं निगमयति एवंविधानीति नृलोकं नराकारमात्मनो
विडंबमानस्य अनुकुर्वतः ६९ इति भावार्थदीपिकायां सप्तमस्कंधे दशमोध्यायः १० एकादशे तु नृणां धर्माः साधारणेन वर्णिताः विशेषेण
सवर्णानां नृणां स्त्रीणां आश्रयोचिताः १ नरदेवं दशभिर्ज्ञानभक्तियोगावुदीरितौ अथ पंचभिरध्यायैः कर्मयोगोनुवर्ण्यते २ दैत्य

दिवि दुंदुभयो नेदुर्विमानशतसंकुलाः देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः अवाकिरन् जगुर्हृष्टा ननृतुश्चा
प्सरोगणाः ६७ एवं दग्ध्वा पुरस्तिस्रो भगवान् पुरहा नृप ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ६८ एवंविधा
न्यस्य हरेः स्वमायया विडंबमानस्य नृलोकमात्मनः वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकं पुनानान्यपरं वदामि किं।
युधिष्ठिरनारदसंवादे ६९ इति भागवते सप्तमस्कंधे दशमोध्यायः १० श्रीशुकः श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्र
मात्मनः युधिष्ठिरो दैत्यपतेर्मुदा युतः पप्रच्छ भूयस्तनयं स्वयंभुवः १ युधिष्ठिरः भगवन् श्रोतुमिच्छामि नृणां
धर्मं सनातनं वर्णाश्रमाचारयुतं यत्पुमान् विंदते परं २ भवान् प्रजापतेः साक्षादात्मजः परमे
ष्ठिनः सुतानां संमतो ब्रह्मन् तपोयोगसमाधिभिः ३ राम ॥

पतेः प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतं ईहितं चरितं श्रुत्वा पुनर्नारदं पप्रच्छ कथंभूतस्य ईहितं महत्तमानामग्रण्यः मु
ख्यस्य तत्र हेतुः उरुक्रमे आत्मा मनो यस्य १ श्रवणेच्छायां हेतुः यतो यतो धर्मात् अनुष्ठितात् परं ज्ञानं भक्तिं च विंदति २ ३

श्री. भा. स. टी. ५५

नन्वस्मृतिकारैर्धर्म उक्त एव तत्राह नारायणपरा इति ४ अजाय श्रीनारायणाय तस्यैव मुखाच्छ्रुतं ५ तन्मुखादात्मनः श्रवणं संभावयन्
विशिनष्टि य इति ६ अथ मे तावद्धर्मप्रमाणमाह धर्मेति धर्मस्य मूलं प्रमाणं स्मृतं च स्मृतिः तद्विदां वेदविदां येन चात्मा मनः प्रसीद
ति तुष्यति तथा च याज्ञवल्क्यः श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतमिति म
नुश्च वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति ७ तत्र तावत्सर्वसाधा

नारायणपरा विप्रा धर्मं गुह्यं परं विदुः करुणाः साधवः शान्तास्त्वद्विधा न तथापरे ४ नारद उवाच नत्वा भ
गवतेऽजाय लोकानां धर्मसेतवे वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं ५ योऽवतीर्यात्मनोंऽशेन दाक्षा
यण्यां तु धर्मतः लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ६ धर्ममूलं हि भगवान्सर्ववेदमयो हरिः ॥
स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ७ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः अहिंसा ब्रह्मच
र्यं च त्यागः स्वाध्याय आर्जवं ८ संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः नृणां विपर्ययेहेक्षा मौनमात्म
विमर्शनं ९

रणं धर्ममाह सत्यमिति पंचभिः तपः एकादश्युपवासादि ईक्षा युक्तायुक्तविवेकः शमो मनसः संयमः दमो बाह्येंद्रि
याणां त्यागो दानं स्वाध्यायो यथोचितवांच: ८ संतोषो दैवलब्धेनालंबुद्धिः समदृक् समदृशां सेवा ग्राम्येहोपरमः प्रवृ
त्तकर्मभ्यो निवृत्तिः विपर्ययेहा निःफलक्रियाणामीक्षणं मौनं वृथाप्रलापनिवृत्तिः आत्मविमर्शनं देहादिव्यतिरि
क्तात्मानुसंधानं ९

राम ५५

आत्मेति देवतेति च बुद्धिः १० अस्य श्रीकृष्णस्य श्रवणादयो नव इत्याश्रर्वनं ११ एवंत्रिंशल्लक्षणवान् १२ इदानीं वर्णधर्मान् वक्तुं द्विजानां लक्षणमाह संस्कारा मंत्रवंतो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः तद्धि शूद्रस्यापि संस्काराविच्छेदे सति द्विजत्वं स्यात्तत्राह अतो ब्रह्मा यमेवंभूतसंस्कारयुक्तं जगाद स द्विजः शूद्रं तु न मंत्रवत्संस्कारयुक्तं जगाद न चोपनयनवंतं अतो नासौ द्विजः तथा च स्मृतिः विवाहमात्रसंस्कारं शूद्रोपि लभतां सदा न केन चित्समसृजच्छूद्रं साक्षात्प्रजापतिरिति॥

अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव १० श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं ११ नृणामयं परो धर्मः सर्वेषां समुदाहृतः त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति १२ संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यं॥ इज्याध्ययनदानानि विहितानि द्विजन्मनां जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः १३ श्रीराम

अतिष्ठुगायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केन चिच्छूद्रमिति अतो विवाहव्यतिरिक्तसंस्कारस्याभावप्रयुक्तत्वादुपनयनस्यातः सर्वथा निषेधात्तस्य द्विजत्वं इत्यर्थः पाकांतरे वैदिका इत्यादय इति गर्भाधानादय इत्यर्थः त्रैवर्णिकानामावश्यकान् धर्मानाह इज्येति जन्मना विशुद्धेन कुलेन कर्मणा च आचारेण च अवदातानां शुद्धानां उक्तानां इज्यादानां च नैतानि विहितानीत्यर्थः ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च शूद्रस्य वर्णधर्माणां च आश्रमभेदकृतविशेषाभावान् १३ राम

ब्राह्मणादीनां चतुर्वर्णानामपि वृत्तिरूपान् धर्मानाह विप्रस्येति सार्द्धैः सप्तभिः। विप्रस्य षट् कर्माणि विहितानीत्यनुषं
गः तत्र तु अध्यापनं याजनं प्रतिग्रहश्च जीविका यथाह मनुः षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्याप
ने चैव विशुद्धाच्च प्रतिग्रह इति। अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चापद्यनुज्ञानाति॥
वक्ष्यति चानंतरमेव ऋते राजन्यमिति। श्रूयते च अश्वपति कैकेय प्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि। प्रजापालने,
धिकृतस्य क्षत्रियस्य वृत्त्यंतरमाह राज्ञ इति आदिशब्देन दंडशुल्कादि १४ वार्त्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्वैश्यस्य ॥ शू

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः १४ वैश्यस्तु वार्त्तावृ
त्तिश्च नित्यं ब्रह्मकुलानुगः शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् १५ वार्त्ता विचित्रा शालीनयाया
वरशिलोञ्छनं विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा १६ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ऋते
राजन्यमापत्सु सर्वेषामपि सर्वशः १७ श्रीरामाय नमः श्रीराम राम॰ =

2

द्रस्य द्विजशुश्रूषा विहिता स्वामिनो द्विजस्य तु शुश्रूषा वृत्तिश्च भवेत् १५ विप्रस्य मुख्यानुकल्पभेदेन वृत्त्यंतराण्या
ह विचित्रा कृष्यादिरूपा शालीनं धार्ष्ट्यं विनैव प्राप्तमयाचितं यायावरं प्रत्यहं धान्ययाच्ञा शिलं शालिक्षेत्रादौ स्वामित्य
क्तकणिशोपादानं उंछनं आपणादिपतितकणोपादानं शिलोञ्छनं द्वयमेकीकृत्य चतुर्द्धेत्युक्तं श्रेयसी उत्तमा १६ ॥
वृत्तिविशेषव्यवस्थां दर्शयन् आपद्वृत्तीराह जघन्यो नीचः उत्तमां अध्यापनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहा

चतुर्विधांप्रवृत्तिंविप्रस्यवृत्तिमितरेषामपिदर्शयन्नाह ऋतामृताभ्यामिति १८ श्लोकंव्याचष्टेऋतमिति १९ तयोर्लक्षणेने
हेतुमाह सर्ववेदमयइति २० वर्णानामभिव्यंजकरूपानधर्मानाह शमइतिचतुर्भिः अच्युतात्मत्वंश्रीविष्णुपरत्वं २१ शौ
र्यंयुद्धोत्साहः वीर्यंप्रभावः तेजःप्रागल्भ्यं २२ २३ अमंत्रयज्ञः नमस्कारेणैवपंचयज्ञानुष्ठानं॥तथाचयाज्ञवल्क्यः॥नम

ऋतामृताभ्यांजीवेतमृतेनप्रमृतेनवा सत्यानृताभ्यांजीवेतनश्ववृत्त्याकथंचन १८ ऋतमुंछशिलंप्रोक्त
ममृतंयदयाचितम् मृतंतुनित्ययाञ्चास्यात्प्रमृतंकर्षणंस्मृतम् १९ सत्यानृतंतुवाणिज्यंश्ववृत्तिर्नीच
सेवनम् १९ वर्जयेत्तांसदाविप्रोराजन्यश्चजुगुप्सिताम् सर्ववेदमयोविप्रःसर्वदेवमयोनृपः २० शमोद
मस्तपःशौचंसंतोषःक्षांतिरार्जवम् ज्ञानंदयाच्युतात्मत्वंसत्यंचब्रह्मलक्षणम् २१ शौर्यंवीर्यंधृतिस्ते
जस्त्यागआत्मजयःक्षमा ब्रह्मण्यताप्रसादश्चरक्षाचक्षत्रलक्षणम् २२ देवगुर्वच्युतेभक्तिस्त्रिवर्गपरिपो
षणं आस्तिक्यमुद्यमोनित्यंनैपुण्यंवैश्यलक्षणं २३ शूद्रस्यसंनतिःशौचंसेवास्वामिन्यमायया अमंत्रयज्ञो
ह्यस्तेयंसत्यंगोविप्ररक्षणम् २४ स्त्रीणांचपतिदेवानांतच्छुश्रूषानुकूलता तद्बंधुष्वनुवृत्तिश्चनित्यंतद्व्र
तधारणम् २५ संमार्जनोपलेपाभ्यांगृहमंडलवर्तनैः स्वयंच मंडितानित्यंपरिमृष्टपरिच्छदा २६ कामैरुच्चा
वचैःसाध्वीप्रश्रयेणदमेनच वाक्यैःसत्यैःप्रियैःप्रेम्णाकालेकालेभजेत्पतिं २७

स्कारेणमंत्रेणपंचयज्ञान्नहापयेदिति २४ स्त्रीधर्मानाहस्त्रीणामितिपंचभिः॥पतिरेवदेवोयासांतास्यपत्युःशुश्रूषानदनुकूलता
च तस्ययद्व्रतेनियमः तस्यधारणं एतच्चतुष्टयंपतिव्रतानांलक्षणंधर्मश्च २५ किंचसंमार्जनोपलेपाभ्यामित्यादेः पतिंभजे
दित्युत्तरेणान्वयः परिमृष्टाउद्वर्तनादिनानिर्मलीकृताः परिच्छदागृहोपकरणानियया २६ २७ श्रीराम ॥

श्री भा० स० टी० ५२

किंचसंतुष्टायथालाभेनतावन्मात्रभोगेप्यलोलुपा दक्षाअनलसा प्रियासत्याचवाग्यस्याः सर्वत्रापिअप्रमत्ताऽ
वहिता अपतितंमहापातकशून्यं यथाहयाज्ञवल्क्यः आशुद्धेःसंप्रतीक्ष्योहिमहापातकदूषितइति २८ तत्प
रासतीभजेत् श्रीर्हरिमिव हर्यात्मनापत्यासह २९ प्रतिलोमानुलोमजातानांवृत्तिमाह वृत्तिरिति तत्तत्कुलकृतातत्कु
लपरंपराप्राप्तमपिचौर्यहिंसादिकंचनिषेधयति अपापानामचौराणांचेति तत्रप्रदर्शनार्थंकांश्चित्प्रतिलोमजवि

संतुष्टालोलुपादक्षाधर्मज्ञाप्रियसत्यवाक् ॥ अप्रमत्ताशुचिःस्निग्धापतिंत्वपतितंभजेत् २८ यापति
तिंहरिभावेनभजेत्श्रीरिवतत्परा हर्यात्मनाहरेर्लोकेपत्याश्रीरिवमोदते २९ वृत्तिःसंकरजाती
नांतत्तत्कुलकृताभवेत् अचौराणामपापानामंत्यजांतेवसायिनाम् ३० प्रायःस्वभावविहितोनृणांधर्मोयु
गेयुगे वेददृग्भिःस्मृतोराजन्प्रेत्यचेहचशर्मकृत् ३१ वृत्त्यास्वभावकृतयावर्तमानःस्वकर्मकृत् ॥
हित्वास्वभावजंकर्मशनैर्निर्गुणतामियात् ३२

शेषानाह अंत्यजेति रजकःचर्मकारश्च नटोबुरुडएवच कैवर्तमेदभिल्लाश्चसप्तैते अंत्यजाःस्मृताः अंतेवसायिनस्तुचां
डालपुक्कसमातंगादयः तेषांपरंपराप्राप्तैव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ३० श्रेष्ठादपिपरधर्मान्नीचोपिस्वधर्मएवश्रे
यानित्याह प्रायइति स्वभावेनसत्वादिप्रकृत्याविहितोधर्मः शर्मकृत्सुखहेतुः स्मृतःकैर्वेदएवदृक्चक्षुर्येषांतैः ॥ भगव ५१
तोचोक्तं श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् इति ३१ ननुस्वाभाविकस्यकर्मणोबंधहेतुत्वात्कथंसुखहेतु

ननु काम्यानि कर्माणि कुर्वतस्तत्फलोपभोगपरस्य कथं नैर्गुण्यं स्यात् तदुक्तं प्रह्लादेन श्रौपस्थ्यजैह्व्यं बहु मन्यमानः क
थं विरज्येत दुरंतमोह इत्यादि तत्राधिकारभेदेन व्यवस्थां सदृष्टांतमाह उप्यमानमिति द्वाभ्यां॥ पुनः सूत्यै सस्य प्रस
वाय ३३ कामाश्राशेरेतवासनारूपेण यस्मिन् तत् उत्कटवासनाविष्टस्य सहसैव कामत्यागासंभवाद्देवोक्तनियमेन
बहुशः कामान् भुंजानस्यैव नित्यनैमित्तिकैर्विशुद्धचेतसः तद्दोषदर्शनेन ययातिसौभरिप्रमुखानामिव शनैर्विरागो

उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात् न कल्पते पुनः सूत्या उप्तं बीजं च नश्यति ३३ एवं कामाशयं
चित्तं कामानामतिसेवया विरज्येत यथा राजन्नाग्निवत्कामबिंदुभिः ३४ यस्य यल्लक्षणं प्रोक्तं पुंसो
वर्णाभिव्यंजकम् यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ३५ इति श्रीभागवते सप्तमस्कंधे एकादशोऽध्या
यः॥ ११॥

भवति यथा सवीर्यं क्षेत्रं शनैर्निर्वीर्यं भवति यथा च प्रज्वलितोऽग्निर्नैघृतबिंदुभिः शाम्यति महता तु घृतपूरेण शाम्यत्येव॥
तद्वत् प्रह्लादस्तु कौमार एव निवृत्त उपदेशो मंदवासनानामधिकारिणां॥ तदुक्तं तत्रैव बालानह वितधियो हंद्वारामे
रितैर्हितैरिति अतः सर्वमनवद्यं ३४ शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यः न जातिमात्रादित्याह यस्येति॥ यद्य
दि अन्यत्र वर्णांतरेपि दृश्येत तद्वर्णांतरं तेनैव लक्षणनिमित्तेनैव वर्णेन विनिर्दिशेत् न तु जातिनिमित्तेनेत्यर्थः ३५ ॥
इति श्रीभावार्थदीपिकायां सप्तमस्कंधे एकादशोऽध्यायः ११॥

द्वादशे वर्ण्यन्ते धर्मा ब्रह्मचारिवनस्थयोः चतुर्णामाश्रमाणां च साधारण्येन कश्चन वर्णादीनां धर्मा उक्ता इदानीमाश्रमधर्मा उच्यन्ते ॥ तत्रास्मिन् द्वादशेऽध्याये ब्रह्मचारिवनस्थयोरसाधारणाः चतुर्णां साधारणाश्चोच्यन्ते त्रयोदशे यतेर्धर्माः चतुर्दशे गृहस्थस्य पंचदशे सर्वधर्मसारसंग्रहः ब्रह्मचारी गुरुकुले वसन् गुर्वादीनुपासीतेत्युत्तरेणान्वयः १ ब्रह्म गायत्रीं जपन् संध्यात्रयमप्युपासीत उभे संध्ये तु यतवाग्भवेत् सायंप्रातः संध्याकालनिमित्तं मौनं कुर्यादित्यर्थः २ गुरोश्चरणौ नमेत् ३ ॥

नारदः ब्रह्मचारी गुरुकुले वसन्दान्तो गुरोर्हितं आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः १ सायंप्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् संध्ये उभे च यतवाग्जपन्ब्रह्म समाहितः २ छंदांस्यधीयीत गुरोराहूतश्चेत्सुयंत्रितः उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ३ मेखलाजिनवासांसि जटादंडकमंडलून् बिभृयादुपवीतं च दर्भपाणिर्यथोदितं ४ सायंप्रातश्चरेद्भैक्षं गुरवे तन्निवेदयेत् भुंजीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ५ सुशीलो मितभुग्दक्षः श्रद्दधानो जितेंद्रियः यावदर्थं व्यवहरेत् स्त्रीषु स्त्रीनिर्जितेषु च ॥ वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः इंद्रियाणि प्रमाथीनि हरंत्यपि यतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकम् गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ८ नन्वग्निः प्रमदा नाम घृतकुंभसमः पुमान् सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ९ ॥

यथोदितं पालाशो दंडो ब्राह्मणस्येत्यादि नियमम् अनतिक्रम्य जटाधारणं तु केशप्रसाधनाभावमात्रं ४ ५ यावदर्थं यथोपयोगमेव ६ बृहद्व्रतः ब्रह्मचर्यवान् गृहस्थव्यतिरिक्तः सर्वोऽपि गाथामपि वर्जयेत् तत्र हेतुः इंद्रियाणि बलवंति संयतस्यापि मनो हरंतीति ७ ८ नकारयेदित्यत्र हेतुः नन्विति रहः एकांते अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेको

नतु मिथ्यात्वादतिकश्मलत्वाच्च स्वयं त्यक्तप्रायं स्यादिजस्यादितिकोयमतिनिर्बंधः तत्राह कल्पयित्वेति आत्मनास्वरूपसाक्षात्कारे
ण इदं देहेंद्रियादि आभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीवईश्वरः स्वतंत्रो न भवेत् तावत् द्वैतं अहंममाहं इयं स्त्रीत्यादि
भेदो न विरमेत् ततः किमत आह ततो हि द्वैतात् विपर्ययः गुणाध्यासेन भोग्यताबुद्धिः अतो जह्यादेवेत्यर्थः १० एतत्सर्वंसुशीलह्रस्व
गृहस्थस्य विशेषमाह गुरुवृत्तिरिति ११ अंजनादीनामाभिषांतानां द्वैक्यम् अंजनं शरीरस्य अभ्यंजनेषि

कल्पयित्वात्मनायावदाभासमिदमीश्वरः द्वैतंतावन्नविरमेत्ततोह्यस्यविपर्ययः १० एतत्सर्वंगृहस्थस्यसमाम्नातं
यतेरपि गुरुवृत्तिर्विकल्पेनगृहस्थस्यर्तुगामिनः ११ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषंमधु स्रग्गंधलेपालं
कारांस्त्यजेयुर्येधृतव्रताः १२ उषित्वैवंगुरुकुलेद्विजोधीत्यावबुध्यच त्रयींसांगोपनिषदंयावदर्थंयथाब
लम् १३ दत्वावरमनुज्ञातोगुरोःकामंयदीश्वरः गृहंवनंवाप्रविशेत्प्रव्रजेत्तत्रवावसेत् १४ अग्नौगुरावात्म
निचसर्वभूतेष्वधोक्षजम् भूतैःस्वधामभिःपश्येदप्रविष्टंप्रविष्टवत् १५ श्रीरामचंद्रायनमः श्रीराम

रसः स्त्रियं च अवलेखं च चित्रकर्म स्त्रीणां कुर्यादौ लेखनं वा तन्निरीक्षणं वा अत्राभ्यंगादिस्वरूपतो निषिध्यते सर्वं तु कथंचि
दापदि प्राप्तमपि स्त्रीकर्तृकं निषिद्धमिति भेदः १२ अंगैः शिक्षादिभिः उपनिषद्भिश्च सहितां वेदत्रयीमधीत्य अवबुध्य च
तदर्थं च विचार्य यावदर्थं स्वाधिकारानुसारेण १३ यदीश्वरः शक्तः तर्हि गुरोः कामममपेक्षितं वरं दत्वा यथाधिकारं गृ
हस्थाद्याश्रमं स्वीकुर्यात् तत्रैव वा वसेत् नैष्ठिकः स्यादित्यर्थः १४ स्वधामभिः स्वाश्रयैर्भूतैर्जीवैः सह तत्र तत्र
तया १५ ॥

चरन्एवमाचरन् विदितेविज्ञानेविज्ञेयंयेनसः १६ ऋषिलोकंमहर्लोकं १७ अकृष्टंअकृष्टपच्यं अकालतः पाकका
लात्सर्वमेवनिष्पन्नमित्यर्थः अर्कपक्वंफलादिआहरेत् अश्नीयात् १८ वन्यैर्नीवारादिभिः कालेचोदितान्नित्यान् ॥
पुराणंपूर्वसंचितं १९ हिमादीन्सहेतइतितथा २० केशादीन्मलंचाप्रक्षालनेनधारयन् कमंडल्वादीश्चदधत् ॥२१॥

एवंविधोब्रह्मचारीवानप्रस्थोयतिर्गृही चरन्विदितविज्ञानः परंब्रह्माधिगच्छति १६ वानप्रस्थस्यव
क्ष्यामिनियमान्मुनिसंमतान् यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा १७ नकृष्टपच्यमश्नीयादकृष्टंवाप्य
कालतः अग्निपक्वमथामंवाअर्कपक्वमुताहरेत् १८ वन्यैश्चरुपु[illegible]रोडाशान्निर्वपेत्कालचोदितान् लब्धेन
वेनवेन्नाद्येपुराणंतुपरित्यजेत् १९ अग्न्यर्थमेवशरणमुटजंवाद्रिकंदरां श्रयेतहिमवाय्वग्निवर्षार्कातप॰
षाट्स्वयं २० ॥ केशरोमनखश्मश्रुमलानिजटिलोदधत् कमंडल्वजिनेदंडवल्कलाग्निपरिच्छदान् २१ चरेद्वने
द्वादशाब्दानष्टौवाचतुरोमुनिः द्वावेकंवायथाबुद्धिर्नविपद्येतकृच्छ्रतः २२ यदाकल्पः स्वक्रियायांव्याधिभिर्जरयाथवा
आन्वीक्षिक्यांवाविद्यायांकुर्यादनशनादिकं २३ आत्मन्यग्नीन्समारोप्यसंन्यस्याहंममात्मतां कारणेषुन्यसे
त्सम्यक्संघातंतुयथार्हतः २४ ॥

कृच्छ्रतः तपःक्लेशाद्यथाबुद्धिर्नविपद्येतथाचरेत् २२ द्वादशाब्दाद्यनंतरमपियदिस्वधर्मानुष्ठानेशक्तस्तर्हिवनएववसेत् यदितुज्ञानाभ्या
सेयोग्यःतर्हिसंन्यसेदित्युत्तराध्यायेवक्ष्यति तदुभयरहितस्यतुयत्कर्तव्यंतदाह यदाअकल्पः असमर्थः आन्वीक्षिक्यांज्ञानाभ्यासे
२३ अनशनादिकरिष्यतः पूर्वकृत्यमाह आत्मनीत्यादियावत्समाप्तिः यथार्हतः यथायोग्यं स्वकारणेषुआकाशादिषु सं
घातंदेहंन्यसेत्प्र[illegible]लापयेत् २४

तदेव विभज्य दर्शयति खे आकाशे खानि देहगतछिद्राणि आत्मवान् धीमान् शेषं अस्थिमांसादिकठिनांशं २५ एवं स्थूलशरीर
स्य लयमुक्त्वा लिंगशरीररूपस्याध्यात्मादित्रयस्य लयमाह वाचमित्यादिना तत्र यद्यपि यथोद्भवं लयस्योक्तत्वादध्यात्मा
दीनां स्वस्वकारणेषु राजसाहंकारादिषु लयो वाच्यः तथापीह तेषां लयभावनेयमद्वितीयात्मप्रतिपत्तिपरेति यथाक
थंचित्तत्त्वे भाव्ये देवतानां प्रवर्तकत्वेन प्राधान्यादिंद्रियतद्विषययोर्देवतासु लयः कथ्यते वक्तव्यसहितां वाचं अ
ग्नौ न्यसेत् एवं सर्वत्र पदानि पादौ वयसि विष्णौ २६ सनादेन शब्देन सह अध्यात्मनि वायौ अध्यात्मविदिति पाठे वायौ.

खे खानि वायौ निःश्वासांस्तेजस्सूष्माणमात्मवान् अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवं २५ वाचमग्नौ
सवक्तव्यामिंद्रे शिल्पं करावपि पदानि गत्या वयसि रत्योपस्थं प्रजापतौ २६ मृत्यौ पायुं विसर्गं च यथास्था
नं विनिर्दिशेत् दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचं २७ रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवेशयेत्
अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् २८ मनो मनोरथैश्चंद्रे बुद्धिं बोध्यैः कवौ परे कर्माण्यध्यात्मना रु
द्रे यदहं ममता क्रिया सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे २९ राम राम राम

वितिज्ञातव्यं २७ ज्योतिषि आदित्ये रसगंधयोः त्विंद्रियाकर्षकत्वेन प्राधान्यविवक्षया देवतासहितस्येंद्रियस्य विषये लयमाह ॥
प्रचेतसा सह जिह्वां रसनां अप्सु रसरूपासु घ्राणशब्देनाश्विनोरप्युपलक्षणं अश्विभ्यां सह घ्राणं घ्रेयैर्गंधैरुपलक्षितायां क्षिता.
वित्यर्थः २८ परे कवौ ब्रह्मणि अध्यात्मना अहंकारेण अध्यात्मनामिति पाठे कर्माण्यहंकारं चेत्यर्थः कथंभूते रुद्रे यद्यस्माद
हंममतारूपविक्रिया भवति तस्मिन् सत्त्वेन चेतनया गुणैः गुणकार्यैः प्रागवशिष्टैः देवैः सह यद्वा सत्त्वादिभिर्गु
णैर्हेतुभूतैः वैकारिकं भोक्तृत्वादिविकारवंतं क्षेत्रज्ञे परे निर्विकारे ब्रह्मणि २९ राम ॥ - राम.

नत्रुविकारवतः कथंपरेलयः स्यात् विकारहेतूनांसर्वोपाधीनांलयद्वारेणेत्याह अप्स्विति अदोज्योतिः तच्चनभः कूटस्थे अहंत
त्वे तच्चकूटस्थंमहतिमहत्तत्वे तदव्यक्ते प्रधाने तच्चाव्यक्तं अक्षरेपरमात्मनि ३० इतिसर्वोपाधिलयाद्धेतोः अवशेषितं
चिन्मात्रमात्मानंदेवेनज्ञमक्षरतयाज्ञात्वा अद्वयः सन्विरमेत् दग्धकाष्ठोयथानलः ३१ इतिभावार्थदीपिकायांसप्तम
स्कंधेद्वादशः ॥ त्रयोदशेयतेर्धर्मः साधकस्योच्यतेमहान् अवधूतेतिहासेनसिद्धावस्थाचवर्ण्यते. एवंध्यात्वाअकल्यो, नश

अप्स्वितिमपोज्योतिह्यदोवायौनभस्यमुं कूटस्थेतच्चमहतितदव्यक्तेऽक्षरेचतत् ३० इत्यक्षरतयात्मानंचि
न्मात्रमवशेषितम् ज्ञात्वाद्वयोऽथविरमेद्दग्धयोनिरिवानलः ३१ इतिश्रीभागवतेसप्तमस्कंधेद्वादशोध्यायः
१२ ॥ नारदउवाच कल्पस्त्वेवंपरिव्रज्यदेहमात्रावशेषितः ग्रामैकरात्रविधिनानिरपेक्षश्चरेन्महीम् ॥
१॥ बिभृयाद्यद्यसौवासः कौपीनाच्छादनंपरं त्यक्तंनलिंगदंडादेरन्यत्किंचिदनापदि २ एकएवचरेद्भि
क्षुरात्मारामोनपाश्रयः सर्वभूतसुहृच्छांतोनारायणपरायणः ३ पश्येदात्मन्यदोविश्वंपरेसदसतोऽव्य
ये आत्मानंचपरंब्रह्मसर्वत्रसदसन्मये ४ ॥ श्रीराम राम राम

नारिकंकुर्यात् आन्वीक्षिक्यांकल्पस्त्वेवंध्यात्वापरिव्रज्येतिसंबंधः कियदत्रत्याज्यंदेहव्यतिरिक्तंसर्वमित्याह देहमात्रेति॥
तस्यधर्मानाहग्रामैकरात्रेतिनवभिः १ कौपीनमाच्छाद्यतेयावतातावन्मात्रंपरंकेवलमितिवा अन्यद्धात्यक्तं
प्रेष्योच्चारणात्सर्वमेव २३ सदसतः परेकार्यकारणव्यतिरिक्ते॥ ४ ॥

नन्वात्मानंपरंब्रह्मेतिकथंसामानाधिकरण्यनिर्देशः नहिवह्न्योरैक्यंसंभवतीतितत्राह स्वप्नेति॥ सुषुप्तेहितमसावृतमात्मतत्त्वं जाग्र-
त्स्वप्नयोस्तु विक्षिप्तंप्रकाशते संधौतुनतमोनापिविक्षेपः अतः तदा आत्मदृक् आत्मानंलक्षीकृत्यस्थितःसन् आत्मनोगतिंत-
त्त्वं अतएवबंधंमोक्षंचमायामात्रंपश्यन् आत्मानंपरंब्रह्मसर्वत्रपश्येदित्यन्वयः तदुक्तंयोगग्रंथे निद्रादौजागरस्यांतेयोभावउप-
जायते तंभावंभावयन्नित्यंमुच्यतेनेतरोयतिरिति ५ अस्यदेहस्यप्रभवोऽप्ययश्चयस्मात् तंकालं ६ असच्छास्त्रेषुअनात्मपरेषु

स्वप्नप्रबोधयोः संधावात्मनोगतिमात्मदृक्। पश्यन्बंधंचमोक्षंचमायामात्रंनवस्तुतः ५ नाभिनंदेद्ध्रुवंमृत्युमध्रुवं
वास्यजीवितम्। कालंपरंप्रतीक्षेतभूतानांप्रभवाप्ययम् ६ नासच्छास्त्रेषुसज्जेतनोपजीवेतजीविकाम्। वादवादां-
स्त्यजेत्तर्कान्पक्षंकंचननसंश्रयेत् ७ नशिष्याननुबध्नीतग्रंथान्नैवाभ्यसेद्बहून्। नव्याख्यामुपयुंजीतनारंभानार-
भेत्क्वचित् ८ नयतेराश्रमःप्रायोधर्महेतुर्महात्मनः। शांतस्यसमचित्तस्यबिभृयादुतवात्यजेत् ९ रामः

जीविकांनक्षत्रविद्यादिरूपांवृत्तिं वादवादान् जल्पवितंडादिनिष्ठान् तर्कान् तर्कमाश्रित्यकंचकमपिपक्षंनिर्बंधे-
ननसंश्रयेत् ॥ ७ ॥ नानुबध्नीतप्रलोभनादिनाबलान्नापादयेत् आरंभान्मठादिव्यापारान् ॥ ८ ॥
परमहंसस्यविशेषमाह नयतेराश्रमोधर्मार्थः कथंभूतस्यमहात्मनः तस्यलक्षणंशांतस्येत्यादि प्रायइत्य-
स्यायंभावः ज्ञानोत्पत्तिपर्यंतंबहूदकादिलिंगमाश्रित्यसत्त्वशुद्ध्यर्थंयमान्नियमांश्चाचरन्नेवज्ञानोत्पत्त्यैयतेतउत्प-
न्नेतुज्ञानेननियमैःकृत्यमस्तियमाश्चस्वतएवस्युः अतस्तदालिंगादिभिःप्रयोजनाभावाल्लोकसंग्रहार्थंधारये-
द्वात्यजेदितिवा ९॥

तस्यैवज्ञानदार्ढ्याभावेयोगभ्रंशपरिहारार्थमाह नवहिर्व्यक्तलिंगयस्य व्यक्तोर्थःप्रयोजनमात्मानुसंधानंयस्यसः मनीष्य
पिउन्मत्तवद्बालवच्चकविरपिमूकवदात्मानंनॄणांदृष्ट्यादर्शयेत् तेयथोन्मत्तादिरूपंमन्येरन्तथावर्तेत स्वदृष्ट्येतिपाठे वा
ह्यानुसंधानाभावेनेत्यर्थः १० परमहंसधर्ममेवेतिहासेनस्फुटयति अत्रापीतियावदध्यायसमाप्ति॰ अजगरवृत्तस्यमुने
श्च ११ धरोपस्थेभूपृष्ठेसह्याद्रेस्तटे रजोभिर्धूसरैः तत्तद्देशैर्देहावयवैर्निगूढममलंतेजोयस्यतम् १२ कर्मादिभिर्जनाः

अव्यक्तलिंगोव्यक्तार्थोमनीष्युन्मत्तबालवत् कविर्मूकवदात्मानंसदृष्ट्यादर्शयेन्नृणाम् १० अत्राप्युदाहरं
तीममितिहासंपुरातनं प्रह्लादस्यचसंवादंमुनेराजगरस्यच ११ तंशयानंधरोपस्थेकावेर्यांसह्यसानुनि रज
स्वलैस्तनूदेशैर्निगूढामलतेजसम् १२ ददर्शलोकान्विचरंल्लोकतत्त्वविवित्सया वृतोमात्यैःकतिपयैःप्रह्लादोभग
वत्प्रियः १३ कर्मणाकृतिभिर्वाचालिंगैर्वर्णाश्रमादिभिः नविंदंतिजनायंवैसोसावितिनवेतिच १४ तंनत्वाभ्यर्च्य
विधिवत्पादयोःशिरसास्पृशन् विवित्सुरिदमप्राक्षीन्महाभागवतोसुरः १५ बिभर्षिकायंपीवानंसोद्यमोभोग
वान्यथा वित्तंचैवोद्यमवतांभोगोवित्तवतामिह १६ भोगिनांखलुदेहोयंपीवाभवतिनान्यथा १६ नतेशयानस्य
निरुद्यमस्यब्रह्मन्नुहार्थोयतएवभोगः अभोगिनोयंतवविप्रदेहःपीवायतस्तद्वदनःक्षमंचेत् १७ राम॥

यंनविदुः तंपादयोःशिरसास्पृशन् नत्वाभ्यर्च्य अप्राक्षीदित्युत्तरेणान्वयः १४ १५ उद्यमसहितइवभोगवानिव पीवानं
स्थूलंदेहंधारयसितत्र हेतुंवदेतितृतीयेनान्वयः १६ उद्यमंविनैवममभोगोस्तीतिचेत्तत्राह ॥ वित्तंचे
ति॥ उइतिनिश्चये हइतिप्रसिद्धौ तवार्थोनास्तीतिप्रसिद्धमेवेत्यर्थः यतोर्थादेव [illegible] हेतोःपीवात्वंमेयोग्यंचेत् १७॥ ५५

किंचविज्ञानेनाद्यसमर्थोप्ययंजनस्तदर्थमुद्यमंकरोति त्वंतुसमर्थोपिकिमितिनकरोषीत्याह कविर्विद्वान् कल्यो
दक्षः निपुणदृक्चतुरः चित्राःप्रियाःलोकरंजनाःकथायस्य तथापिलोकस्यकर्मकुर्वतःसतःशेषे तद्वीक्षिता
ऽपिवा तत्तुसर्वंपश्यन्नपि॥पाठांतरेनद्वेष्टितत्कर्मनद्वेष्टि नौविवानवास्तौषीत्यर्थः २८ तस्यवामेवामृतंतेनयंत्रितो
वशीकृतः सन् २९ अध्यात्मचक्षुषाश्रुतदृष्ट्याभवान्वेदेव आर्याणांज्ञानिनांसम्मतो॥नतुभवानिदमितियदुक्तंतत्र
देवाह नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानिस्थानानिफलानीत्यर्थः २० वेदइत्यत्रहेतुः यस्येति हृदि

कविःकल्योनिपुणदृक्चित्रप्रियकथःसमः लोकस्यकुर्वतःकर्मशेषेतद्वीक्षितापिवा १८ नारदउवाच
सइत्थंदैत्यपतिनापरिपृष्टोमहामुनिः स्मयमानस्तमभ्याहतद्वागमृतयंत्रितः १९ ब्राह्मणउवाच वेदेदमसुर
श्रेष्ठभवान्नन्वार्यसंमतः ईहोपरमयोर्नृणांपदान्यध्यात्मचक्षुषा २० यस्यनारायणोदेवोभगवान्हृद्गतःस
दा भक्त्याकेवलयाज्ञानंधुनोतिध्वांतमर्कवत् २१ अथापिब्रूमहेप्रश्नांस्तवराजन्यथाश्रुतं संभाषणीयोहि
भवानात्मनःशुद्धिमिच्छता २२ तृष्णयाभववाहिन्यायोग्यैःकामैरपूरया कर्माणिकार्यमाणोहंनानायोनिषुयो
जितः २३ यदृच्छयालोकमिमंप्रापितःकर्मभिर्भ्रमन् स्वर्गापवर्गयोर्द्वारंतिरश्चांपुनरस्यच २४ श्रीराम राम॥

प्रविष्टःसन्अज्ञानंधुनोति अर्कोयथावह्निर्ध्वांतं २१ यथाश्रुतमित्यौद्धत्यपरिहारायोक्तं २२ लोकःकर्मसुप्रवर्ततेत्वंतुनिवृत्तःसन्
विशेषइतियदुक्तंतत्राह तृष्णयेतिचतुर्भिः॥भवप्रवाहकारिण्यायोग्यैरपिविषयैःपूरयितुमशक्ययात्तयाकर्मसुप्रवर्तमानोहंसर्वेनाना
योनिषुयोजितःप्रवेशितः २३ तथैवमेलोकंमनुष्यलोकंयदृच्छयाप्रापितः कथंभूतंलोकंधर्मेणस्वर्गस्यद्वारंसाधनमधर्मेणतिरश्चांचस्वकरा
दियोनिषुद्वारं मिश्राभ्यांताभ्यांपुनरप्यस्यमनुष्यत्वस्यद्वारंसर्वतोनिवृत्त्याअपवर्गस्यद्वारमित्यर्थः २४ ॥ श्रीराम राम

अत्रापि मनुष्यत्वेपि अन्यापनुत्तये दुःखनिवृत्त्यै विपर्ययं दृष्ट्वा निवृत्तोस्मि २५ प्रवृत्त्या कदाचित्सुखं स्यादपि निवृत्त्या तु किं स्यादिति चेत्तत्राह सुखमस्य जीवस्य स्वरूपमेव तर्हि किं न प्रकाशते तत्राह सर्वेति तनोतीति तनुः सर्वक्रियानिवृत्तौ सत्यां तत एव प्रकाशत इत्यर्थः भोगांश्च मनःसंस्पर्शजान् मनोरथमात्रजान् अशाश्वतान् दृष्ट्वा स्वप्स्यामि निरुद्यमोस्मीत्यर्थः तर्हि कदाचित्कथं भुंक्ते तत्राह संविशन् प्रारब्धभोगान् भुंजान इत्यर्थः २६ एवं चेत्तर्हि कोपि संसारं न प्राप्नुयात्तत्राह इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वस्मिन्ने

अत्रापि दंपतीनां च सुखायान्यापनुत्तये कर्माणि कुर्वतां दृष्ट्वा निवृत्तोस्मि विपर्ययं २५ सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः मनःसंस्पर्शजान् दृष्ट्वा भोगान् स्वप्स्यामि संविशन् २६ इत्येतदात्मनः स्वार्थं संतं विस्मृत्य वै पुमान् विचित्रामसति द्वैते घोरामाप्नोति संसृतिं २७ जलं तदुद्भवैश्छन्नं हित्वाज्ञो जलकाम्यया मृगतृष्णामुपाधावेत् यथान्यत्रार्थदृक् स्वतः २८ देहादिभिर्दैवतंत्रैरात्मनः सुखमीहतः दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः २९ आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किं ३० पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनां भयादलब्धनिद्राणां सर्वतोभिविशंकिनां ३१ श्रीराम

वसंतं पुरुषार्थं विस्मृत्य असत्यपि द्वैते २७ एतदेव दृष्टांतेन स्पष्टयति जलमिति तदुद्भवैः तृणशेवलादिभिः जलकाम्यया जलेच्छया स्वतः आत्मस्वरूपादन्यत्र पुरुषार्थं पश्यन् २८ एवं स्वस्य निरुद्यमत्वे कारणमुक्त्वा विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति देहादिभिरिति पंचभिः॥ ईहतः अनीशस्य निर्दैवस्य पुनः पुनः प्रारब्धाः क्रिया मोघा विफला एव भवंति २९ क्रियाणां सफलत्वेपि निःफलस्यानुपयोगमाह आध्यात्मिकादिभिरिति मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः प्राप्तैः ३०॥
कृच्छ्रं विनैव प्राप्तेप्यर्थे दुःखं तदवस्थमित्याह पश्यामीति ३१

भयंप्रपंचयतिराजन्तइति स्वस्मान्मत्तएवकथंचित्यागभोगविस्मरणादिनानाशः स्यादिति प्राणवतामर्थेवतांचभयंनि
त्यं ३२ अतोत्यनर्थहेतुत्वात्प्राणेर्थयोर्थस्पृहानकार्येत्याह शोकेति ३३ नन्वेवमनर्थाननुभवंतोपिनके चिद्धिरज्यंते न
चयथालाभेनतुष्यंति त्वंतुकथंवैराग्यादिकंप्राप्तोसि तत्राह मधुकारेति मधुमक्षिकाजगरौययोःशिक्षया हत्तपर्यालो

राजतश्चौरतः शत्रोः स्वजनात्पशुपक्षितः अर्थिभ्यःकालतःस्वस्मान्नित्यंप्राणार्थवद्भयं ३२ शोकमोहभ
यक्रोधरागक्लैब्यश्रमादयः यन्मूलाःस्युर्नृणांजह्यात्स्पृहांप्राणार्थयोर्बुधः ३३ मधुकारमहासर्पौ
लोकेस्मिन्नोगुरूत्तमौ वैराग्यंपरितोषंचप्राप्तायच्छिक्षयावयं ३४ विरागःसर्वकामेभ्यःशिक्षितोमेमधु
व्रतात् कृच्छ्राप्तंमधुवद्वित्तंहत्वाप्यन्योहरेत्पतिं ३५ अनीहःपरितुष्टात्मायदृच्छोपनतादहं नोचेच्छये
बह्वहानिमहाहिरिवसत्ववान् ३६ क्वचिदल्पंक्वचिद्भूरिभुंजेन्नंस्वाद्वस्वादुवा क्वचिद्भूरिगुणोपेतं
गुणहीनमुतक्वचित् ३७ श्रद्धयोपहृतंक्वापिकदाचिन्मानवर्जितं भुंजेभुक्त्वाथकस्मिंश्चिद्दिवान
क्तंयदृच्छया ३८ क्षौमंदुकूलमजिनंचीरंवल्कलमेववा वसेन्यदपिसंप्राप्तंदिष्टभुक्तुष्टधीरहं ३९ क्व
चिच्छयेधरोपस्थेतृणपर्णाश्मभस्मसु क्वचित्प्रासादपर्यंकेकशिपौवापरेच्छया ४० क्वचित्स्नातोनुलिप्तां
गः सुवासाःस्रग्व्यलंकृतः रथेभाश्वैश्चरेक्वापिदिग्वासाग्रहवद्विभो ४२ श्रीराम राम

चनया ३४ मधुकराच्छिक्षितमाह विरागइति वित्तपतिंहत्वाप्यन्योवित्तंहरेदित्येवं ३५ अजगराच्छिक्षितमाह अनीह
इति सत्ववान्धैर्यवान् ३६ पीनत्वेहेतुत्वेनयदृच्छयाप्राप्तात्परितोषंप्रपंचयतिक्वचिदल्पमितिषड्भिः ३७ ३८ चीरंजीर्ण
वस्त्रखंडंवसेपरिदधेदिष्टभुक्प्रारब्धभोगी ३९ प्रासादमध्येपर्यंकेतत्रापिकशिपौ ४० चरेविचरामिक्वचिन्नग्नवद्दिगंबरो विच

नचमानापमानकर्तृषुममवैषम्यमित्याह नाहंनिंदामिमहात्मनिविष्णौ ४२ एवंभूतत्वेनस्थितावुपायमाह विकल्पमितिद्वा
भ्यां चित्तोभेदमाहकमनोवृत्तौ अर्थरूपोविभ्रमोयस्मिन् वैकारिकेअहंकारे अनुअनंतरंमहतत्त्वद्वारेणेत्यर्थः ४३ सत्यमेवपश्यती
तितथा ४४ मंदहदृष्ट्यालोकशास्त्राभ्यांव्यपेतंनतुतत्त्वदृष्ट्यायतोभवान्भगवत्परः ४५ ॥ इतिश्रीभावार्थदीपिकायांसप्तमेत्रयोद
शोध्यायः १३ ॥ चतुर्दशेगृहस्थस्यपरमोधर्मईर्यते देशकालादिभेदेनपुनःश्रेयोविशेषकृत् १ गृहस्थस्तुत्र्यघ्यमोक्षंप्रतिअं

नाहंनिंदेनचस्तौमिस्वभावविषमंजनम् एतेषांश्रेयआशासेउतैकात्म्यंमहात्मनि ४२ विकल्पंजुहुयाच्चित्तौतां
मनस्यर्थविभ्रमे मनोवैकारिकेहुत्वातंमायायांजुहोत्यनु ४३ आत्मानुभूतौतांमायांजुहुयात्सत्यदृङ्मुनिः ततो
निरीहोविरमेत्स्वानुभूत्यात्मनिस्थितः ४४ स्वात्मवृत्तंमयेत्थंतेसुगुप्तमपिवर्णितम् व्यपेतंलोकशास्त्राभ्यांभवान्हि
भगवत्प्रियः ४५ नारदउवाच धर्मंपारमहंस्यंवैमुनेःश्रुत्वासुरेश्वरः पूजयित्वाततःप्रीतआमंत्र्यप्रययौगृहं ४६ ॥
इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेत्रयोदशोध्यायः १३ युधिष्ठिरउवाच ॥ गृहस्थएतांपदवींविधिना
येनचांजसा यातिदेवऋषेब्रूहिमादृशोगृहमूढधीः १ नारदउवाच ॥ साधुपृष्टंमहाभागलोकानामनुगृह्ण
ता तत्वेनतदहंवक्ष्येनैष्कर्म्ययेनकर्मिणाम् २ गृहेष्ववस्थितोराजन्क्रियाःकुर्वन्गृहोचिताः वासुदेवार्पणंसाक्षा
दुपासीतमहामुनीन् ३ शृण्वन्भगवतोभीक्ष्णमवतारकथामृतं श्रद्दधानोयथाकालमुपशांतजनावृतः ४ ॥ तत्सं
गाच्छनकैःसंगमात्मजायात्मजादिषु विमुच्येन्मुच्यमानेषु स्वयंस्वप्नवदुत्थितः ५ ॥ राम राम

तरंगत्वेनप्रथमेवनस्ययतिधर्मेषु अभिहितेषुतर्हिगृहस्थस्यमोक्षोनस्यादितिशंकितचित्तःपृच्छतिगृहस्थइति १ तस्यमोक्षध
र्मानाह गृहेष्वित्यादियावदध्यायसमाप्ति साक्षाद्वासुदेवार्पणंयथाभवत्येवंकुर्वन्नुपासीत ३ स्वयमेवमुच्य
मानेषुवियुज्यमानेषुयथाउत्थितःपुमान् स्वप्नदृष्टेषुपुत्रादिषुसंगंविमुंचति तद्वत् ५ श्रीराम राम॥

नन्वेवंभूतस्यदुर्जनैरभिभूयमानस्यकुतोगृहोचिताः क्रियाःस्युः तत्राह यावदर्थमिति अंतरनासक्तः बहिस्त्वासक्तइवनृलोकेज
नमध्येनरतांमानुषत्वंन्यसेत् पुरुषकारमाविष्कुर्यादित्यर्थः ५ आग्रहंतुक्वापिनकुर्यादित्याह ज्ञातयइति ६ नन्वेवंसर्वानुमोदनेवि
त्तक्षयप्रसंगात् कुतोजीवनंकुतोवाकर्मकरणंतत्राह दिव्यंवृष्ट्यादिभिर्जातंधान्यादि भौमंनिधानादि आंतरिक्षमकस्मादेवप्रा॰
प्तं एवंस्वतएवअच्युतनिर्मितंदैवलब्धंयत् एतत्पूर्वोक्तंकर्मादि ७ दैवाद्भूरिलाभेजातेपितत्राभिमानोनकार्यइत्याह यावदि
ति भ्रियेतपूर्येत ८ अतएवयंकमपिस्वगृहेक्षेत्रेवाप्रविश्यभुंजानंननिवारयेदित्याह मृगेति,मर्कोमर्कटः सरीसृपः सर्पः

यावदर्थमुपासीनोदेहेगेहेचपंडितः विरक्तोरक्तवत्तत्रनृलोकेनरतांन्यसेत् ५ ज्ञातयःपितरौपुत्राभ्रातरःसु
हृदोपरे यद्वदंतियदिच्छंतिचानुमोदेतनिर्ममः ६ दिव्यंभौमंचांतरिक्षंवित्तमच्युतनिर्मितं तत्सर्वमुपयुं॰
जानएतत्कुर्यात्स्वतोबुधः ७ यावद्भ्रियेतजठरंतावत्स्वत्वंहिदेहिनां अधिकंयोभिमन्येतसस्तेनोदंडमर्हति
८॥ मृगोष्ट्रखरमर्काखुसरीसृपखगमक्षिकाः आत्मनःपुत्रवत्पश्येत्तैरेषामंतरंकियत् ९ त्रिव
र्गंनातिकृच्छ्रेणभजेतगृहमेध्यपि यथादेशंयथाकालंयावद्दैवोपपादितं १० आश्वाघांतेवसायिभ्यः
कामान्संविभजेद्यथा अप्येकामात्मनोदारांनृणांस्वत्वग्रहोयतः ११ श्रीरामायनमः श्रीराम॥

मक्षिकाश्चैतैःपुत्रैः एषांमृगादीनां ९ अतिकृच्छ्रेणपापेनभजेत् किंतुयावद्दैवप्रापितंतावदेवभजेत् १० श्वानश्चा
घाश्चपतिताः अंतेवसायिनश्चांडालादयः तानभिव्याप्ययथायथार्हंकामान्संविभजेत् स्वभोगान्विभज्यदद्यात्॥
यद्यप्येकैवात्मनोदाराःभार्यातस्यामतिथिशुश्रूषणेनियुक्तायांस्वस्यशुश्रूषाहीयेतयस्यांचनृणांस्वत्वग्रहः ममै
वेयमित्याग्रहः तामेकामपिसंविभजेत् —— अतिथ्यादिशुश्रूषणेनियुंजीतेत्यर्थः नत्वन्यथामंतव्यं
यथार्हंसंविभजेदित्युक्तत्वात् ११ ॥

श्री· भा· स· टी· ५८

एवं चेत्तेनेश्वरो वशीकृतः स्यादित्याह यदर्थे यन्निमित्तं अन्यैरजितोपीश्वरस्तेन जित एव १२ कथमेवं तस्यां स्वत्वाभिमानो
हातुं शक्यः तत्र विचारेणेत्याह क्रिमिविड्भस्मनिष्ठापर्यवसानमंतो यस्य तदीयादेहाद्यो रतिर्यस्यां सा स्वमहिम्ना नभो
पि आच्छादयतीति तथा १३ किंच सिद्धैर्दैवलब्धैः यज्ञावशिष्टार्थैः पंचयज्ञशेषैरन्नादिभिः महतां निवृत्तानां १४ एतद्वि
वृण्वन्नाह देवादीन्पंचयज्ञदेवताः आत्मानं च एवं पृथक् पुरुषमंतर्यामिणमेव यजेत् १५ १६ न तु नरतिर्निर्बंधो

जह्याद्यदर्थे स्वप्राणान् हन्याद्वा पितरं गुरुं तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः १२ क्रिमिविड्
भस्मनिष्ठांतं क्वेदं तुच्छं कलेवरं क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः १३ सिद्धैर्यज्ञावशिष्टार्थैः कल्पये
द्वृत्तिमात्मनः शेषे स्वत्वं त्यजन् प्राज्ञः पदवीं महतामियात् १४ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं ॥
स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् १५ यर्ह्यात्मनोधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः वैतानिकेन वि
धिना अग्निहोत्रादिना यजेत् १६ न ह्यग्निमुखतोयं वै भगवान् सर्वयज्ञभुक् इज्येत हविषा राजन् यथा
विप्रमुखे हुतैः १७ तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु ॥
॥ १८ ॥

यज्ञार्थं कार्यं इत्याह न हीति विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत इज्येत न तथा अग्निमुखतो हविषा इज्येत १७ ब्राह्म
णेषु देवेषु पंचयज्ञदेवतासु मर्त्यादिषु अन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञं अंतर्यामिणं ब्राह्मणाननु मर्त्यादि
यजने ब्राह्मणयजनानंतरं अन्येषु यजस्व पाठांतरे ब्राह्मणा आननं यस्य तं १८ श्रीराम राम·

प्रोष्ठपदे भाद्रपदे १९ २० शुक्लपक्षेऽक्षयतृतीयायामित्यर्थः। हेमंते शिशिरे च मार्गशीर्षादिमासचतुष्टयेपि याः तिस्रोष्टकाः
तासु २१ संपूर्णचंद्रा पौर्णमासी राका न्यूनचंद्रा सैवानुमतिः तथ्यामासर्क्षाणि नक्षत्रमास नाम प्रवृत्तिनिमित्तानि नक्षत्रा
णि युतानि यदा स्युः तदा तद्युक्तैस्त्रिकाद्या, पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा नाम्ना स पौषो मघाद्याश्चैवमेकादशापर

कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः श्राद्धं पित्रोर्यथावित्तं तद्वंश्यानां च वित्तवान् १९ अयने विषुवे कुर्या
द्व्यतीपाते दिनक्षये चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु च २० तृतीयायां शुक्लपक्षे नवम्यामथ कार्ति
के चतस्रष्वप्यष्टकासु हेमंते शिशिरे तथा २१ माघे च सितसप्तम्यां मघाराकासमागमे राकया चा
नुमत्या वा मासर्क्षाणि युतान्यपि २२ द्वादश्यामनुराधा स्याच्छ्रवणस्तिस्र उत्तराः तिसृष्वेकादशी वा
सु जन्मर्क्षश्रोणयोगयुक् २३ त एते श्रेयसः काला नृणां श्रेयोविवर्धनाः कुर्यात्सर्वात्मनैतेषु श्रेयोऽमोघं त
दायुषः २४ एषु स्नानं जपो होमो व्रतं देवद्विजार्चनं पितृदेवनृभूतेभ्यो यद्दत्तं तदनश्वरं २५ राम ॥

इति २२ अनुराधा श्रवण उत्तराफाल्गुनी उत्तराषाढा उत्तराभद्रपदा द्वादश्यां यदा स्यात् आसूत्तरासु एकादशी वा
यदा स्यात् तदा च जन्मर्क्षश्रोणयोगयुक् जन्मनक्षत्रस्य श्रवणस्य वा योगेन युक्तं दिनं यदा योग ग्रहणं संबंध
बाहुल्यार्थं २३ न केवलं श्राद्धस्यैवैते कालाः किंतु धर्ममात्रस्येत्याह त एत इति द्वाभ्यां तदेवायुषः
अमोघं साफल्यमित्यर्थः २४ ॥

श्री
भा०
स०
टी०
५९

संस्कारकाल इति जायायाः पुंसवनादिः अपत्यस्य जातकर्मादिः आत्मनो यज्ञदीक्षादि प्रेतस्य संस्था दहनादि मृता
हश्च सांवत्सरिकं यदा अन्यस्मिन्नपि अभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषंगः २६ यत्र यस्मिन्नेवमेतच्चराचरमस्ति
तस्य भगवतो विंबरूपं सत्पात्रं यत्र लभ्यते स वै पुण्यतमो देशः २७ अर्हैरुक्तमैराश्रितानि २८ २९ सीताया रामस्य वा

संस्कारकालो जायाया अपत्यस्यात्मनस्तथा प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप २६ अथ देशा
न् प्रवक्ष्यामि धर्मादिश्रेयआवहान् स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते २७ विंबं भगवतो यत्र सर्वमे
तच्चराचरं ॥ यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितं यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् २८ ॥
यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत २९ कुरुक्षेत्रं गय
शिरः प्रयागः पुलहाश्रमः नैमिषं फाल्गुनं सेतुः प्रभासोथ कुशस्थली ३० वाराणसी मधुपुरी पंपा विं
दुसरस्तथा नारायणाश्रमो नंदा सीताराामाश्रमादयः ३१ सर्वे कुलाचला राजन्महेंद्रमलयादयः
एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ३२ एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः धर्मो ह्यत्रेहितः
पुंसां सहस्राधिफलोदयः ॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः हरिरेवैक उर्वीश यन्मयं वै चराचरं ३४॥
देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु राजन्यदग्रपूजायां मतः पात्रतयाच्युतः ३५ श्रीराम॥

॥आश्रम आदिर्येषां तयोः पृथक्ग्रहणं वियोगकालाभिप्रायेण ३१ अर्चाश्रिताश्च स्थिरप्रतिमाश्रिताः एवं तु सालिग्रामशि
लाद्यर्चनदेश उक्त इत्यपौनरुक्त्यम् ३२ अत्र एषु देशेषु ईहितः कृतः सहस्रगुणमधिकस्य फलस्योदयो यस्मात्तथा ३३ ५९
हरिरेव पात्रं निर्णीतं तदाह हरिरेवेति॥ देवेषु ऋषिषु च अर्हत्सु च तपोयोगादिसिद्धेषु ब्रह्मात्मजादिषु सनकादिष्वपि सत्सु
तत्र त्वदीये राजसूये यद्यस्मादच्युत एव पात्रतया संमतः ॥३५॥

सेमतत्वे हेतुमाह जीवराशिभिर्व्याप्तो ब्रह्मांडकोश एव योऽङ्घ्रिपः सर्वजीवानामात्मनस्तर्पणं ३६ एतदेव पुरुषनामनिरुक्त्याह द्वय
तिपुराणीति नृतिर्यगादिरूपाणि पुराणि शरीराणि तेष्वंतर्यामिरूपेण प्रत्यगंशेन च यतः शेते अतः पुरुष इति प्रसिद्धः ३७ तार
तम्येन तिर्यगादिभ्यः पुरुषे यस्माद्वाधिक्येन वर्तते तस्मात्पुरुषः पात्रं तत्रापि यावानात्मा ज्ञानांशः यथा ईयते तपआदियोगेन य
त्र यत्र प्रतीयते तत्र तथा सो पात्रमित्यर्थः तथा च श्रुतिः पुरुषत्वे वाविस्तरामात्मेति ३८ तर्हि प्रतिमादौ पूजा किमि

जीवराशिभिराकीर्ण अंडकोशांघ्रिपो महान् तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं ३६ पुराण्यनेन सृ
ष्टानि नृतिर्यगृषिदेवताः शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ३७ तेष्वेषु भगवान् राजंस्तारतम्येन व
र्तते तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ३८ दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप त्रेतादि
षु हरेरर्चा क्रियायै कविभिः कृता ३९ ततोऽर्चायां हरिं केचित्संश्रद्धाय सपर्यया उपासत उपास्तापि नार्थ
दा पुरुषद्विषां ४० पुरुषेष्वपि राजेंद्र सुपात्रं ब्राह्मणं विदुः तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुं ४१
नन्वस्य ब्राह्मणा राजन् कृष्णस्य जगदात्मनः पुनंतः पादरजसा त्रिलोकीं दैवतं महत् ४२ ॥ इति श्रीभा
गवते महापुराणे सप्तमस्कंधे चतुर्दशोऽध्यायः १४ श्रीराम श्रीराम राम

तिऊर्वेति तत्राह दृष्ट्वेति द्वाभ्यां मिथोऽवज्ञानमवमानस्तस्मिन्नात्मबुद्धिर्येषां तेषां भावं दृष्ट्वा क्रियायै इज्याद्यर्थं हरिमुपासते ३९॥
उपासिताप्यर्चा पुरुषद्वेषिणामर्थदा न भवति पुरुषेषु द्वेषं हित्वाऽर्चिता सती सापि मंदाधिकारिणां पुरुषार्थप्रदा भवत्येवे
त्यर्थः ४० पुरुषेष्ववज्ञात्या तपआदिभिश्च पुनर्विशेषांतरमाह पुरुषेष्वपीति योधत्ते तं सुपात्रं विदुः ४१ एतदेव कैमुत्यन्या
येन दृढयति नन्वस्येति ४२ ॥ इति श्रीभावार्थदीपिकायां चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीराम राम

ततः पंचदशे सर्ववर्णाश्रमनिबंधनं सारतः संग्रहेणाख्यवर्ण्यते मोक्षलक्षणं॥ सर्वेषामपि मोक्षधर्माणां सासंग्रहार्थमध्यायारंभः
तत्र श्राद्धगतान्विशेषानाह कर्मनिष्ठाइति स्वाध्यायादिषुपरिनिष्ठिताइतिशेषः १ कव्यानिपितृनुद्दिश्यदेयानिदैवेचहव्यानिपितस्मैदेयानि यथार्हतइतिसर्वत्रज्ञानादितारतम्येन २३ ननु विस्तरः कुतः प्राप्तः येन निषिध्यते तत्राह स्वजनानाम

नारदउवाच कर्मनिष्ठाद्विजाःकेचित्तपोनिष्ठानृपापरे स्वाध्यायेन्येप्रवचनेयेकेचित्ज्ञानयोगयोः १ ज्ञाननिष्ठायदेयानिकव्यान्यानंत्यमिच्छता दैवेचतदभावेस्यादितरेभ्योयथार्हतः २ द्वौदैवेपितृकार्येत्रीनेकैकमुभयत्रवा भोजयेत्सुसमृद्धोपिश्राद्धेकुर्यान्नविस्तरं ३ देशकालोचितश्रद्धाद्रव्यपात्रार्हणानिच सम्यग्भवंतिनैतानिविस्तरात्स्वजनार्पणात् ४ देशेकालेचसंप्राप्तेमुन्यन्नंहरिदैवतं श्रद्धयाविधिवत्पात्रेन्यस्तंकामधुगक्षयम् ५ देवर्षिपितृभूतेभ्यआत्मनेस्वजनायच अन्नंसंविभजन्पश्येत्सर्वंतत्पुरुषात्मकम् ६ नदद्यादामिषंश्राद्धेनचाद्याद्धर्मतत्त्ववित् मुन्यन्नैःस्यात्पराप्रीतिर्यथानपशुहिंसया ७ नैतादृशःपरोधर्मोनृणांसद्धर्ममिच्छताम् न्यासोदंडस्यभूतेषुमनोवाक्कायजस्ययः ८ श्रीरामचंद्रगुरवेनमः श्रीराम ॥

र्पणात् जामाताचेन्निमंत्र्यतेतत्पित्रादयःकथंवर्ज्याइत्येवंप्राप्ताद्विस्तरादित्यर्थः ४ ॥ मुन्यन्नंआरण्यंव्रीह्यादि हरिदैवतं हरयेनिवेदितंसत् ५ पुरुषात्मकंईश्वररूपं ६ ७ दंडस्यन्यासः हिंसायाःत्यागोयः एतादृशोन्योनास्ति ८ श्रीराम राम॥

अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजंतीत्याह एक इति अनीहा निष्कामाः ज्ञानदीपिते आत्मस्फूर्तिमति आत्मसंय
मने जुह्वति मनो नियम्य तदंतरायतया त्यजंतीत्यर्थः तदुक्तं सर्वज्ञसूक्तैः प्रत्यक्स्फूर्तिरसंस्फूर्तिः तत्त्वनिष्ठाविघातकं सं
लक्ष्य संत्यजेत्कर्म त्यजन्न् विघ्नहतोन्यथेति ९ मा मां एषः ध्रुवं हन्यादिति ज्ञतः अकरुणः तत्कुतः असुतृप् प्राणतर्पकः तत्किं
अतज्ज्ञः आत्मतत्त्वानभिज्ञः तथा च श्रुतिः न तं विदाथ य इमा जजाना यद्युष्माकमंतरं बभूव नीहारेण प्रावृता जल्प्या चासु

सयमोध्यानैकाग्र्यसएवयोग सरवाभिसमित्

एके कर्ममयान्यज्ञान्ज्ञानिनो यज्ञवित्तमाः आत्मसंयमनेनीहा जुह्वति ज्ञानदीपिते ९ द्रव्ययज्ञैर्यक्ष्यमाणं द
ष्ट्वा भूतानि बिभ्यति एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृप् ध्रुवं १० तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् सं
तुष्टो हरहः कुर्यान्नित्यनैमित्तिकाः क्रियाः ११ विधर्मः परधर्मश्च आभास उपमा छलः अधर्मशाखाः पंचे
मा धर्मज्ञोऽधर्मवत्त्यजेत् १२ धर्मबाधो विधर्मः स्यात् परधर्मोन्यचोदितः उपधर्मस्तु पाखंडो दंभो वा शब्दभि
च्छलः १३ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात्पृथक् स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये १४॥

तृप उक्थशासश्चरंतीति १० प्रस्तुतमनुवर्णयति तस्मादिति ११ अधर्मवत्साक्षात्त्रिविधवत् १२ क्रमम्मनादृत्य पंचापि व्या
चष्टे धर्मबाधः धर्मबुद्ध्यापि यस्मिन् क्रियमाणे स्वधर्मबाधः अन्यस्य चोदितोन्यस्य परधर्मः उपमेति व्याचष्टे उपधर्मस्त्विति पा
खंड्यभित् भेदः अन्यथा व्याख्यानं यस्मिन् यथा दशावरान् भोजयेदित्युक्ते दशभ्यो वरानिति शब्दभृदिति पाठे धर्मशब्दमात्रं
बिभर्तीति यथा यं यथा गोष्ट्यादित्युक्ते मरिष्यं त्यागो दीनं १३ स्वधर्मानुष्ठानानंतरं धर्मभूयस्त्वार्थमपि परधर्मो ना
नुष्ठेयः अनुपयोगादित्याह स्वभावविहित इति १४ ॥ श्रीराम राम॥

श्री॰
भा॰
स॰
टी॰
६१

किंच अथनो धर्मार्थं धनं नेहेत नापेक्षेत धनार्थं न व्याप्रियेतेति वा दैवोपपन्नेनैव स्वधर्मसिद्धेः कृतत्वात् यात्रार्थमपि नेहेतेत्येतत्प्रपंचयति अनीहेति सार्द्धैर्वाक्यैः १५ १६ उपानहौ पादयोर्यस्य उपानत्पात् तस्य १७ गृहपालः श्वानवदाचरति १८ १९ क्षुधा च तृषा च जनः कामस्यान्तं याति अन्नोदकातिरिक्तकामान्तराभावात् क्रोधस्य चान्तं याति एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयान्निष्पत्तेः दिशो जित्वापि भुवो भुक्त्वापि लोभस्य नैवान्तं यातीत्यर्थः २० २१ इदानीं कामादिजयोपायानाह॥ असंकल्पादिति चतुर्भिः॥

धर्मार्थमपि नेहेत यात्रार्थं वाधनो धनं अनीहानीहमानस्य महाहेरिव वृत्तिदा १५ संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखं कुतस्तत्कामलोभेन धावतोर्थेहया दिशः १६ सदा संतुष्टमनसः सर्वाः शिवमया दिशः शर्कराकंटकादिभ्यो यथोपानत्पदः शिवं १७ संतुष्टः केन वा राजन्न वर्तेतापि वारिणा औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः १८ असंतुष्टस्य विप्रस्य तेजो विद्या तपो यशः स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते १९ कामस्यांतं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः २० पंडिता बहवो राजन् बहुज्ञाः संशयच्छिदः सदसस्पतयोप्येके असंतोषात्पतंत्यधः २१ असंकल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् २२ आन्वीक्षिक्या शोकमोहौ दंभं महदुपासया योगांतरायान्मौनेन हिंसां कामाद्यनीहया २३ राम राम राम राम॥

जयेदिति यथापेक्षमन्वेति अर्थेनर्थदर्शनेन तत्त्वावमर्शनात् अद्वैतानुसंधानेन २२ आन्वीक्षिक्या आत्मानात्मविवेकेन महतां सात्त्विकानां सेवया योगस्यांतरायान् लोकवार्तादीन् २३ राम राम राम॥ ६१

येभ्योभूतेभ्योभयंजायेत तेष्वेव कृपया हिताचरणेन दैवं दैवोपसर्गनिमित्तं हृयामनःपीडादि तदुक्तं याज्ञवल्क्येन॥ विमनाविफला
रंभः संसीदत्यनिमित्ततः इति॥ आत्मजं देहजं योगवीर्येण प्राणायामादिबलेन सत्त्वनिषेवया सात्त्विकाहारादिना २४ २५ ननु·
कथं गुरौ भक्त्या सर्वस्य जयः स्यात् तस्यापि मनुष्यत्वेन तद्वश्यत्वात् तत्राह॥ यस्येति मर्त्यासद्धीः मनुष्य इति तुच्छबुद्धिः तस्य·
शास्त्रश्रवणं कुंजरस्नानवद्व्यर्थं २६ ननु गुरोरपि ब्रह्मादयः तेनरमेव मन्यंते अतआह एष गुरुः साक्षाद्भगवानेव लोकस्य

कृपया भूतजं दुःखं दैवं जह्यात्समाधिना आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया २४ रजस्तमश्च सत्त्वेन स
त्त्वं चोपशमेन च एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् २५ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ मर्त्यास·
द्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् २६ एष वै भगवान्साक्षात्प्रधानपुरुषेश्वरः योगेश्वरैर्विमृग्यांघ्रिर्लोको
यं मन्यते नरं २७ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः तदंता यदि नो योगानावहेयुः श्रमावहाः
२८

नरोसाविति बुद्धिर्भ्रांतिरित्यर्थः यद्वा न हि तत्पुत्रादेर्मनुष्यबुद्ध्या प्रतीयमानोपि गुरुर्भगवान्नैव भवेत् यथैव श्रीकृष्ण इत्य·
र्थः २७ एवं सर्वैरुपायैः कामादिवेगं जित्वा नियतेंद्रियो हृत्वा ध्यानपरो भवेत् अन्यथा तं प्रति सर्वशास्त्रवैफल्यं स्यादित्याह॥ षड्वर्ग
ति॥ सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः॥ षडिंद्रियवर्गस्य यः संयमः तस्मिन्नेवैकस्मिन्नंतो यासां ता नदेकपरा इत्यर्थः॥
न च तावतापि चरितार्था इत्याह तदंताः सत्योपि यदि योगान् धारणाध्यानसमाधीन् नो आवहेयुः न साधयेयुः तर्हि केवलं श्रमाव
हा एवेत्यर्थः॥ २८ ॥

एतदेवदृष्टांतेनाह यथावार्तादयः कृष्यादयश्चार्थाः तत्फलानिचयोगस्यार्थंमोक्षंनसाधयंति प्रत्युतानर्थायसंसारायैव असं
तोबहिर्मुखस्येष्टापूर्तौह्यपितथा २९ एवंयोगंयुंजतोपियस्यकुटुंबादिसंगेनचित्तंविक्षिप्यतेतस्यकृत्यमाह यश्चित्तस्य तस्मात्
विजयेयत्तउद्यतः सभिक्षुःस्यात् संन्यसेत् ॥ तथाचस्मृतिः॥ द्वंद्वाहतस्यगार्हस्थ्येध्यानभंगादिकारणं। लक्षयित्वागृहीसम्य
क्संन्यसेदविचारयन्निति भिक्षयाप्राप्तंमितमशनंयस्य ३० ऋजुसममंगंयस्यसत्त्वंयथाभवत्येवमासीत ३१मिति।

यथावार्तादयोह्यर्थायोगस्यार्थंनबिभ्रति अनर्थायभवेयुस्तेपूर्तमिष्टंतथासतः २९ यश्चित्तविजयेयत्तःस्या
न्निःसंगोपरिग्रहः एकोविविक्तशरणोभिक्षुर्भैक्ष्यमिताशनः ३० देशेशुचौसमेराजन्संस्थाप्यासनमात्मनः ॥
स्थिरंसमंसुखंतस्मिन्नासीतर्ज्वंगओमिति ३१ प्राणापानौसंनिरुध्यात्पूरकुंभकरेचकैः यावन्मनःत्यजेत्कामान्
स्वनासाग्रनिरीक्षणः ३२ यतोयतोनिःसरतिमनःकामहतंभ्रमत् ततस्ततउपाहृत्यहृदिरुंध्याच्छनै
र्बुधः ३३ एवमभ्यसतःचित्तंकालेनाल्पीयसायतेः अनिशंतस्यनिर्वाणंयात्यनिंधनवह्निवत् ३४ कामादिभि
रनाविद्धंप्रशांताखिलवृत्तियत् चित्तंब्रह्मसुखस्पृष्टंनैवोत्तिष्ठेतकर्हिचित् ३५ यःप्रव्रज्यगृहात्पूर्वंत्रिव
र्गावपनात्पुनः यदिसेवेततान्भिक्षुःसवैवांताश्यपत्रपः ३६ ॥ राम राम।

उच्चारयन्नितिशेषः ३२ ३३ एवमविश्राममभ्यसतस्तस्ययतेश्चित्तंनिर्वाणंशांतिंयाति ३४ नचपुनर्विक्षिप्यतइत्याह कामादिभिरद्व
भितंयच्चित्तंतन्नोत्तिष्ठेत् यतःप्रशांताअखिलावृत्तयोयस्य अतःब्रह्मसुखेनस्पृष्टं ३५ यस्तुप्रव्रज्यांकृत्वापिभोगमभिलिप्सुः
स्यात् तंनिंदति॥ यद्वित्रयाणांधर्मादीनांवर्गःआसमंतादुप्यतेयस्मिंस्तस्मात्गृहात् तान्धर्मादीन् वांताशीछर्दितभोजीनि ६२
र्लज्जश्चसः ३६

नचेदमघटितं दृष्टत्वादित्याह येः सर्वे स्वदेहः अनात्मादिरूपः स्मृतः विचिंतितः तएव पुनरेनमात्मेति मत्वा श्लाघयंति स्तावयंति
३७ यतिमुपलक्षणीकृत्य अन्यानपि स्वधर्मत्यागिनो निंदति गृहस्थस्येति द्वाभ्यां ३८ ३९ नन्वात्मतत्त्वज्ञस्य भिक्षोरिंद्रियलौल्ये पि को
दोषस्तत्राह ॥ आत्मानं परं ब्रह्म चेत् जानीयात् ज्ञानेन धुता निरस्ता आशाया वासना यस्य तस्य ज्ञानिनो लौल्यमेव न संभवति. इत्यर्थः ॥ त
थाच श्रुतिः आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् इति ४० अज्ञस्य तु लौल्येन नरकपात
पतेरप्रमत्तेन सदा तत्त्वज्ञाने यतितव्यमिति तीममर्थं आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिश्रुत्युक्त रथरूपक द्वारेण आह ॥

येः स्वदेहः स्मृतो नात्मा मर्त्यो विट्कृमिभस्मसात् तमेनमात्मसात्कृत्वा श्लाघयेतिस्य सत्तमाः ३७ गृहस्थस्य क्रिया-
त्यागो व्रतत्यागो वटोरपि तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलोल्यता ३८ आश्रमापसदा ह्येते खल्वाश्रमविडंबकाः
देवमायाविमूढांस्तानुपेक्षेतानुकंपया ३९ आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति
लंपटः ४० आहुः शरीरं रथमिंद्रियाणि हयानभीषून्मन इंद्रियेशं वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बंधुरमीशसृ
ष्टम् ४१ अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवं धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यं ४२

आहुरिति षड्भिः इंद्रियेशं मनो अभीषून् रश्मीनाहुः मात्राः शब्दादीन् वर्त्मानि गंतव्यदेशानाहुः सत्त्वं चित्तं बृहत् देहव्यापि
बंधुरं बंधनं चित्तं विना ह्यनिबद्धमिव शरीरं भवति ॥ ईशसृष्टमिति बंधनकर्तात्वीश एवेत्यर्थः ४१ प्राणादयः पंच.
नागः कूर्मश्च कृकरो देवदत्तो धनंजयश्चेत्येवं दशविधं प्राणमक्षम् अभिमानं साहंकारं जीवं रथिनं ॥
शुद्धं जीवं शरं परं ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्य
तइत्यर्थः ॥ ४२ ॥

४३

श्री॰ भा॰ स॰ टी॰ ६३ रागादयोजेतव्याः शत्रवः॥ तत्ररजोभिनिवेशःक्वचिदारूढसमाधेः सत्त्वप्रकृतयोपिपरोपकारादिप्रवृत्तयः शत्रवः ४४ नृकायरूपं
रथमात्मवशः उपकल्पः इंद्रियादिपरिकरोयस्मिन् तथाभूतंयावद्धत्तेतावदेवगरिष्ठानांगुरूणांचरणसेवयानिशितंज्ञानखड्
गं बिभ्रत् अच्युताश्रयःसन्निरस्तशत्रुः उपशांतः स्वानंदेनतुष्टोभूत्वाइदंदेहादिकमुपेक्षेतेत्यर्थः ४५ अच्युताश्रयाभावेबाध॰
कमाह नोचेदिति॥ असंतोबहिर्मुखायेइंद्रियवाजिनः सूतश्चतेउत्पथंप्रवृत्तिमार्गंनीत्वाविषयाख्येषुदस्युषुनिक्षिपंति हे

रागोद्वेषश्चलोभश्चशोकमोहौभयंमदः मानोवमानोसूयाचमायाहिंसाचमत्सरः ४३ रजःप्रमादःक्षुन्निद्राशत्रवस्त्वे
वमादयः रजस्तमःप्रकृतयः सत्त्वप्रकृतयःक्वचित् ४४ यावन्नृकायरथमात्मवशोपकल्पंधत्तेगरिष्ठचरणा
र्चनयानिशातं ज्ञानासिमच्युतबलोदधदस्तशत्रुः स्वानंदतुष्टउपशांतइदंविजह्यात् ४५ नोचेत्प्रमत्तमसदिं
द्रियवाजिसूतानीत्वोत्पथंविषयदस्युषुनिक्षिपंति तेदस्यवः सहयसूतममुंतमोंधेसंसारकूपउरुमृत्युभयेक्षि
पंति ४६ प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकम् आवर्ततेप्रवृत्तेननिवृत्तेनाश्नुतेमृतम् ४७ हिंस्रंद्रव्यमयं॰
काम्यमग्निहोत्राद्यशांतिदम् दर्शश्चपूर्णमासश्चचातुर्मास्यंपशुःसुतः ४८ एतदिष्टंप्रवृत्ताख्यंहुतंप्रहुतमेव
च पूर्तंसुरालयारामकूपाजीव्यादिलक्षणं ४९

हयैः सूतेनचवर्त्मानंतमोंधेतमसाव्याप्ते उरुमृत्युभयंयस्मिन् ४६ ननुचवेदविहितेष्वाग्न्यादिकारिणः ध्वंसः कथमेवमनर्थ
प्राप्तिःस्यादित्याशंक्य वेदोक्तकर्मणांद्वैविध्यंदर्शयन्फलभेदमाह प्रवृत्तंचेतिदशभिः ४७ हिंस्रंपश्वेनादिकर्म अशांतिदं अत्यास
क्तियुक्तं आदिशब्दार्थविवरणं दर्शश्चेति पशुः पशुयागः सुतः सोमयागः ४८ हुतंवैश्वदेवं प्रहुतंबलिहरणं तत्सर्वमि
ष्टमुच्यते एतदेवयदिकाम्यंअशांतिदंचतर्हिप्रवृत्ताख्यमपीत्यर्थः आजीव्यप्रपादि ४९ श्रीराम श्रीराम॰ ६३

प्रवृत्तेनकर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह द्रव्यस्यचरुपुरोडाशादेः सूक्ष्मोविपाकः परिणामोदेहांतरारंभकः येनसंप
रिष्वक्तोगच्छति यएवश्रुतावप्शब्देनोक्तइतितुपंचम्यामाहुतावापःपुरुषवचसोभवंतीति पावांतरेद्रव्यशब्देनते
जोमात्रशब्दोक्तानींद्रियाणि ऊष्मविपाकशब्देनहृदयाग्रप्रद्योतः तथाचश्रुतिः सइमास्तेजोमात्राःसमभ्याददानोहृ
दयमेवान्ववक्रामतीति तथा तस्यहैतस्यहृदयस्याग्रंप्रद्योततेतेनैषआत्मानिष्क्रामतीति धूमादिशब्दैस्तत्तदभिमा
निन्योदेवताः तत्रापक्षयःकृष्णपक्षः सोमःसोमलोकः तत्रभुक्तभोगस्यावरोहणप्रकारमाह दर्शइत्यादि दर्श

द्रव्यसूक्ष्मविपाकश्चधूमोरात्रिरपक्षयः अयनंदक्षिणंसोमोदर्शओषधिवीरुधः अन्नंरेतइतिक्ष्मेश
पितृयानंपुनर्भवः॥५०॥एकैकश्येनानुपूर्वंभूत्वाभूत्वेहजायते निषेकादिश्मशानान्तैःसंस्कारैःसं
स्कृतोद्विजः ५१ इंद्रियेषुक्रियायज्ञान्ज्ञानदीपेषुजुह्वति ५२ श्रीराम राम राम

इतिविपरीतलक्षणयाविशिष्टभोगक्षयशोकाग्निनादेहलयेनादर्शनमुच्यते एतदुक्तंभवति भूतसूक्ष्मयुक्तोधूमाद्यातिवा
हिकदेवताभिः सोमलोकंप्रापितः तद्भोगावसानेविलीनदेहोवृष्टिद्वारेणौषधिवीरुधादिसाम्यापत्तिक्रमेणजायते एवंपु
नर्भवहेतुः पितृयानंप्रवृत्तकर्ममार्गइतिक्ष्मेशहेभूपते ५० पुनर्भवमेवाह एकैकश्येनप्रत्येकक्रमेणभूत्वातत्तत्सान्निध्यंप्राप्य
इहभूमौजायते तत्राधिकारिणमाह निषेकादीति अन्यस्त्विष्टादिकार्यप्येवंजन्मनलभतइत्यर्थः ५१ निवृत्तकर्मनिष्ठस्योपासनावि
शेषमुपदिशन्नर्चिरादिमार्गेणब्रह्मलोकप्राप्तिमाह इंद्रियेष्वित्यादिना यज्ञाद्रव्ययज्ञेषुहिंसायाःघोरत्वादितिमत्वानिवृत्तकर्मैव
दर्शयन्नाह ज्ञानेनदीप्यतेइतितथातेषुइंद्रियव्यापाराणामिष्टहृतादीनामिंद्रियतावन्मात्रतांभावयंतीत्यर्थः एवमु
त्तरत्रापि ५२ ॥

ऊर्मिदर्शनादिसंकल्पद्रूपेमनसिवैकारिकंविकारयुक्तंमनोवाचिविध्यादिलक्षणयावाचाहिमनःकर्तृत्वादिविकारंभजति वर्णा
नांसमाम्नायेसमुदायेतद्विशेषत्वाद्वाचःस्वरेअकारादिस्वरत्रयात्मकेउंकारंबिंदौतंचनादेप्राणेसूत्रात्मनिमहतिब्रह्मणि ५३
अग्निरितितत्तदभिमानिन्योदेवताः ताः प्राप्नोतीतिपूर्ववत् दिवाह्नः प्राह्णः तस्यैवांशः राकाशुक्लपक्षःस्यात् यद्वा प्राह्णोराकेति
चपुराणांतरमतं उत्तरमयनंस्वराट्ब्रह्मा एवंब्रह्मलोकंगतस्यभोगावसानेमोक्षप्रकारमाह विश्वइति विश्वःस्थूलो
पाधिःतंस्थूलंसूक्ष्मेविलाप्यसूक्ष्मोपाधिस्तैजसोभवति सूक्ष्मंचकारणेविलाप्यकारणोपाधिःप्राज्ञोभवति कारणंचसर्वज्ञसाक्षि

इंद्रियाणिमनस्यूर्मौवाचिवैकारिकंमनः वाचंवर्णसमाम्नायेतमोंकारस्वरेन्यसेत् उंकारंबिंदौनादेतंतंतुप्राणेमह
त्यमुं ५३ अग्निःसूर्योदिवाप्राह्णःशुक्लोराकोत्तरंस्वराट् विश्वश्चतैजसःप्राज्ञस्तुर्येआत्मासमन्वयात् ५४
देवयानमिदंप्राहुर्भूत्वाभूत्वानुपूर्वशः आत्मयाज्युपशांतात्माह्यात्मस्थोननिवर्तते ५५ यएतेपितृदेवानाम
यनेवेदनिर्मिते शास्त्रेणचक्षुषावेद जनस्थोपिनमुह्यति ५६ आदावंतेजनानांसद्बहिरंतःपरावरं ज्ञा
नंज्ञेयंवचोवाच्यंतमोज्योतिस्त्वयंस्वयम् ५७ राम

त्वेनान्वयात्साक्षित्वरूपेविलाप्यतुर्योभवति तेषांचव्यभिचारिणांसाक्ष्याणांलयेशुद्धआत्माभवतिमुच्यतेइत्यर्थः ५४ यथे
तरोभूत्वाभूत्वानिवर्ततेनतथाननिवर्ततइत्यर्थः ५५ वेदेननिर्मितेतेधूममभिसंभवंतीत्यादिना तेअर्चिरभिसंभवंतीत्यादिना
चनिश्चयेनविविच्यज्ञापितेइत्यर्थः जनस्थोपिदेहस्थोपिनमुह्यति ५६ तत्रहेतुमाह आदाविति जनानांदेहादीनांआ
दौकारणत्वेन अंतेचावधित्वेनयत्सत् तथाबहिर्भोग्यमंतर्भोक्तृपरमवरंचउच्चंनीचं तमःअप्रकाशः ज्योतिःप्रकाशः
तत्सर्वमयंज्ञानी स्वयमेव नतुस्माद्व्यतिरिक्तंवस्तुकिंचिदस्तियेनमुह्येदित्यर्थः ५७ ॥ राम राम॥

श्री भा॰ स॰ टी॰ ९५

नन्वद्वयविनोऽभावे आगमापायिषु बाल्यादिषु सोऽयं देवदत्त इति प्रत्यभिज्ञानं न स्यात् तदुक्तं आविर्भावतिरोभावधर्मक
ष्वनपायिय वत्तद्धर्मीति तत्राह स्यादिति वस्तुनः परमात्मनो विकल्पे भेदे असति यद्वा वस्तुनोऽविद्यया विकल्पे सति
सर्वस्य सर्वारोपसादृश्यात् स एवेति भ्रमः स्यात् स च तावदेव यावदविद्यानिवृत्तिः ननु सर्वमिथ्यात्वे शास्त्रस्य विधिनिषेधता
कथं तत्राह स्वप्नमध्ये जाग्रत्स्वापव्यवस्था यथेति ॥६१॥ इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति भावाद्वैत
मिति चतुर्भिः वर्तयन् आलोचयन् स्वानुभूत्या आत्मतत्त्वानुभावेन त्रीन् जाग्रदादीन् त्रय अवस्थास्त्रयः स्वप्नाः इति

स्यात्सादृश्यभ्रमस्तावद्विकल्पे सति वस्तुनः जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ६१ भावाद्वैतं क्रि
याद्वैतं द्रव्याद्वैतं यथात्मनः वर्तयन् स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ६२ कार्यकारणवस्त्वैक्यमर्शनं पट
तन्तुवत् अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ६३ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणम् मनो
वाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ६४ राम राम राम॰

स्फूर्तेः यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः ततस्तैरधिकारभेदे बुद्धिर्द्वितीयः ततो मत्कर्मसाधितमेतत्फलं ममैव भोग्यमि
ति तृतीयः तान्धुनुते निवर्तयति ६२ कार्यकारणयोर्वस्त्वैक्यस्य मर्शनं तन्तुरेव न पट इति ६३ ॥ मनोवाक्तनुभिः कृ
तानां कर्मणां समर्पणं तैः समर्पणमिति वा उद्देश्यफलभेदो हि क्रियाभेदे हेतुः ईश्वरार्पणे च तदभावात् क्रियाणाम ९५
द्वैतम् ॥६४॥

ननु तर्हि कथं दृष्टपृथगर्थः तस्यापि प्रतीयते तत्राह आबाधितः तर्कविरोधेन सर्वतो बाधितोपि आभासः प्रतिबिंबादिर्वस्तुत
या यथा स्मृतः तद्वदैंद्रियकं सर्वमर्थत्वेन विकल्पितं न तु परमार्थतः दुर्घटत्वात् ५८ तदेवाह क्षित्यादीनां पंचभूता
नां छाया ऐक्यं तु आलंबनरूपं देहादि संघातारंभपरिणामानां मध्ये कतमापि न भवति न तावत्तेषां संघातः वृक्षाणा
मिव वनं एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः नह्येकस्मिन् वृक्षे आकृष्टे सर्वं वनमाकृष्यते नच विकार आरंभो,
ऽवयवी अपि शक्यः न परिणामोपि कुतः स किं स्वावयवेभ्यो वा परिणतेभ्यो वा पृथक् तदन्वितो वा न तावदत्यंतपृ

आबाधितोपि ह्याभासो यथा वस्तुतया स्मृतः। दुर्घटत्वादैंद्रियकं तद्वदर्थविकल्पितं ५८ क्षित्या
दीनामिहार्थानां छाया न कतमापि हि। न संघातो विकारोपि न पृथङ्नान्वितो मृषा ५९ धातवोवयवित्वाच्च
तन्मात्रावयवैर्विना। न स्युर्ह्यसत्यवयविन्यसन्नवयवोंततः ६० राम राम राम॥

पृथक्तया अप्रतीतेः नचान्वितः॥ स किं प्रत्यवयवं सर्वोपि अन्वेति, अंशेन वा॥ आद्ये अंगुलिमात्रेपि देहबुद्धिः स्यात् द्वि
तीये तस्याप्यंशांगीकारे सत्यनवस्था स्यात् अतो मृषैवेत्यर्थः ५९ एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादी
नामपि मिथ्यात्वमाह, धारयंतीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः अवयवित्वात्तेषाम
पि तर्ह्यवयवः सत्यः इति चेत्तत्राह उक्तप्रकारेण अवयविनि असति अवयवोप्यंततः असन्नेव स्यात्॥
अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः॥ तदुक्तं पंचमस्कंधे॥ एवं निरुक्तं
क्षितिशब्दवृत्तमित्यादि॥६०॥

आत्मनः स्वस्य जायादीनां च स्वार्थस्य कामस्य च तयोः देहादीनां पंचभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदालोचनेन
नार्थकामयोर्यदैक्यदर्शनमित्यर्थः ९५ उक्तानाश्रमधर्माननुसंदिष्याह यदिति॥ यद्द्रव्यं येनोपायेन यतः स कारणात्
९६ प्रस्तुतमुपसंहरति एतैरिति, अस्य श्रीकृष्णस्य गतिं तद्भक्तिभाक् तस्य भक्तः ९७ एतच्च सर्वसाधारणमुक्तं भक्तस्य

आत्मजायासुतादीनामन्येषां सर्वदेहिनां यत्स्वार्थकामयोरैक्यं दद्यादिदं तदुच्यते ९५ यद्यस्य चानिवि
र्द्दस्याद्येन यत्र यतो नृप स तेनेहेत कार्याणि नरो नान्यैरनापदि ९६ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः
गृहेऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ९७ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः
प्रभोः यत्पादपंकेरुहसेवया भवानहार्षीन्निर्जितदिग्गजः क्रतून् ९८ ॥ श्रीराम राम॥

तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पाण्डवानेव लक्षीकृत्याह यथा हीति हे नृपदेव नृपैर्देवैश्च सहायैः
दुस्त्यजादिति वा आत्मनः श्रीकृष्णदेवप्रभोर्हेतोः अङ्गभावश्चापि उत्कर्षेणोत्तरतेत्यर्थः ॥ यथा
यथावत् तमेव भजतेति शेषः यद्वा यथा आपद्गणादुत्तीर्णास्त्वं यया उक्रतून् अहार्षीत् तथा श्रीकृष्णदेव
तारकात्संसारादप्युत्तरतेत्यर्थः ९८ ॥

श्रीकृष्णसेवामहत्तामवज्ञयाभ्रश्यति तत्कृपयाचसिद्ध्यतीतिदर्शयन् स्वपूर्ववृत्तांतमाह अहमितिसार्द्धैः पंचभिः ॥

अहंपुराभवंकश्चिद्गंधर्वउपवर्हणः नाम्नातीतेमहाकल्पेगंधर्वाणांसुसंमतः ६९ रूपपेशलमा
धुर्यसौगंध्यप्रियदर्शनः स्त्रीणांप्रियतमोनित्यंमत्तस्तुपुरुलंपटः ७० एकदादेवसत्रेतुगंधर्वा
प्सरसांगणाः उपहूताविश्वसृग्भिर्हरिगाथोपगायने ७१ अहंचगायंस्तद्विद्वान्स्त्रीभिःपरिवृतोगतः
ज्ञात्वाविश्वसृजस्तन्मेहेलनंशेपुरोजसा ७२ याहित्वंशूद्रतामाशुनष्टश्रीःकृतहेलनः ७२ ताव
द्दास्यामहंजज्ञेतत्रापिब्रह्मवादिनाम् शुश्रूषयानुषंगेणप्राप्तोहंब्रह्मपुत्रताम् ७३ धर्म
स्तेगृहमेधीयोवर्णितःपापनाशनः गृहस्थोयेनपदवीमंजसान्यासिनामियात् ७४ ॥

श्रीरामचंद्रायनमः

नाम्ना उपवर्हणः ६९ पेशलंसौकुमार्यं रूपादिभिः प्रियंदर्शनंयस्य ७० ७१ ॥
तदाह्वानंविद्वान् उन्मत्तः सन्गायन्नेवगतः ॥ ७२ ७३ ७४

श्रीराम श्रीराम श्रीराम श्रीराम

त्वंतुकृतार्थएवेतिहर्षेणपुनः पूर्वश्लोकानेवपठति यूयमिति ७५ शेषंस्पष्टम् ॥ ८० ॥ ग्रं ॥

यूयंनृलोकेबतभूरिभागालोकंपुनानामुनयोभियंति येषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्म
मनुष्यलिंगम् ७५ सवाअयंब्रह्ममहद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः प्रियःसुहृद्वःख
लुमातुलेयआत्मार्हणीयोविधिकृद्गुरुश्च ७६ नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयो
पवर्णितम् मौनेनभक्त्योपशमेनपूजितः प्रसीदतामेषससात्वतांपतिः ७७ श्रीशुकउवाच
इतिदेवर्षिणाप्रोक्तंनिशम्यभरतर्षभः पूजयामाससुप्रीतः कृष्णंचप्रेमविह्वलः ७८ कृष्ण
पार्थावुपामंत्र्यपूजितः प्रययौमुनिः श्रुत्वाकृष्णंपरंब्रह्मपार्थः परमविस्मितः ७९ ॥
इतिदाक्षायणीनांतेपृथग्वंशाःप्रकीर्तिताः देवासुरमनुष्याद्यालोकायत्रचराचराः ८० ॥

इतिश्रीभागवतेमहापुराणे सप्तमस्कंधेप्रह्लादानुचरितेयुधिष्ठिरनारदसंवादे सदाचारोनामपंच
दशोध्यायः ॥ १५ ॥ इतिश्रीभावार्थदीपिकायांसप्तमेपंचदशोध्यायः ॥ श्रीरामचंद्रायनमः शुभं ॥